[illegible]

॥ परमात्मप्रकाशगांरभायं ॥ ७ ॥

॥६०॥ॐनमोवीतरागाय॥श्रीगुरुभ्योनमः॥श्रीपरमगुरुभ्योनमः॥ चिदानंदे करूपाय।जिनायपरमात्मने।परमात्मप्रकाशा
य।नित्यंसिद्धात्मनेनमः॥ श्रीयोगींद्रदेवकृतपरमात्मप्रकाशाभिधानदोहकछंदोग्रंथेप्रक्षेपकान्विहायव्याख्यानार्थमधिकार
रूपाधिकथ्यते॥ तद्यथा॥ प्रथमस्तावत्पंचपरमेष्ठिनमस्कारमुख्यत्वेन॥ जेजायाझाणग्गियए।इत्यादि।सप्तदोहकसूत्राणिभ
वंति॥७॥ तदनंतरंविज्ञापनमुख्यतयाभाविंपणविवि।इत्यादिसूत्रत्रयं॥३॥अतऊर्द्धंबहिरंतःपरमभेदेनत्रिधात्मप्रतिपादन
मुख्यत्वेन।पुणपुणुपणविविइत्यादिसूत्रपंचकं॥६॥ अथानंतरंमुक्तिगतव्यक्तिरूपपरमात्मकथनमुख्यत्वेनतिहुवणवंदि
उइत्यादिसूत्रदशकं॥१०॥अतऊर्द्धंदेहस्थितशक्तिरूपपरमात्मकथनमुख्यत्वेनजेहउनिम्मलुइत्यादिअंतर्भूतप्रक्षेपपंचकसहि
तचतुर्विंशतिसूत्राणिभवंति॥२४॥अथजीवनरयस्वदेहप्रमितिविषयेस्वपरमतविचारमुख्यतयाकिंविभणतिजिउसव्वगउइत्या
दिसूत्रषट्कं॥६॥ तदनंतरंद्रव्यगुणपर्यायस्वरूपकथनमुख्यतयाअप्पाजणियउइत्यादिसूत्रत्रयं॥३॥ अथानंतरंकर्मविचा

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

परमात्म० रमुख्यत्वेनजीवहंकम्मुअणाइजियइत्यादिसूत्राष्टकं॥ ६॥तदनंतरंसामान्यभेदभावनाकथनेनअप्पाअप्पुजिइत्यादिसूत्रनवकं॥
१ ॥ ९॥अतऊर्द्धंनिश्चयसम्यग्दृष्टिकथनरूपेणअप्पेअप्पुइत्यादिसूत्रमेकं॥१॥ तदनंतरंमिथ्याभावकथनमुख्यत्वेनपज्जय
रत्तउइत्यादिसूत्राष्टकं॥८॥अतऊर्द्धंसम्यग्दृष्टिभावनामुख्यत्वेनकालुलहेविणुइत्यादिसूत्राष्टकं॥८॥तदनंतरंसामान्यभेदभा
वनामुख्यत्वेनअप्पासंजमुइत्यादिएकाधिकत्रिंशत्प्रमितानिदोहकसूत्राणिभवंति॥३१॥इतिश्रीयोगींद्रदेवविरचितेपरमात्म
प्रकाशशास्त्रेत्रयोविंशत्यधिकशतदोहकसूत्रैर्बहिरंतःगतव्यक्तिपरमात्मस्वरूपकथनमुख्यत्वेनप्रथमप्रकरणपातनिकास
माप्ता॥ अथानंतरंद्वितीयमहाधिकारप्रारंभेमोक्षमोक्षफलमोक्षमार्गस्वरूपंकथ्यते॥तत्रप्रथमस्तावत्सिरिगुरुइत्यादि
मोक्षस्वरूपकथनमुख्यत्वेनदोहकसूत्राणिदशकं॥१०॥अतऊर्द्धंदंसणुणाणुइत्याद्येकसूत्रेणमोक्षफलं॥१॥तदनंतरंजीवहं १
मोरकहंहेउवरुइत्याद्येएकोनविंशतिसूत्रपर्यंतंनिश्चयव्यवहारमोक्षमार्गमुख्यतयाव्याख्यानं॥१९॥ अथानंतरंअभेदरत्न

त्रयमुख्यत्वेनजोभत्तउइत्यादिसूत्राष्टकं॥८॥अतऊर्द्धंसमभावमुख्यत्वेनकम्मुपुरक्किउइत्यादिसूत्राणिचतुर्दश॥१४॥अथानं
तरंपुण्यपापसमानमुख्यत्वेनबंधहंमोक्खहंहेउणिउइत्यादिसूत्राणिचतुर्दश॥१४॥अतऊर्द्धंएकचत्वारिंशत्सूत्रपर्यंतंप्रक्षे
पकान्विहायशुद्धोपयोगस्वरूपमुख्यत्वमितिसमुदायपातनिका।तत्रप्रथमतःएकचत्वारिंशन्मध्येसुद्धहंसंजमुइत्यादि
सूत्रपंचकपर्यंतंशुद्धोपयोगमुख्यतयाव्याख्यानं॥५॥अथानंतरंदाणिंलद्धइइत्यादिपंचदशसूत्रपर्यंतंवीतरागस्वसं
वेदनज्ञानमुख्यत्वेनव्याख्यानं॥१५॥तदनंतरंलेणहंइच्छइमूढुइत्यादिसूत्राष्टकपर्यंतंपरिग्रहत्यागमुख्यतयाव्याख्यानं
॥८॥अथऊर्द्धंजोभत्तउरयणत्तयहंइत्यादित्रयोदशसूत्रपर्यंतंशुद्धनयेनषोडशवर्णिकासुवर्णवत्सर्वेजीवाःकेवलज्ञा
नादिस्वभावलक्षणेनसमानाइतिमुख्यत्वेनव्याख्यानं॥१३॥इत्येकचत्वारिंशत्सूत्राणिगतानि॥४१॥अतऊर्द्धंपरुजाणं
तुवित्यादिसमाप्तिपर्यंतंप्रक्षेपकान्विहायसप्तोत्तरशतसूत्रैश्चूलिकाव्याख्यानं॥१०७॥तत्रसप्तोत्तरशतमध्येअवसानेप

रमसमाहिइत्यादिचतुर्विंशतिसूत्रेषुसप्तस्थलानिभवंति।तस्मिन्प्रथमस्थलेनैर्विकल्पसमाधिमुख्यत्वेनपरमसमाहिमहास
रहिंइत्यादिसूत्रषट्कं॥६॥तदनंतरमर्हत्पदमुख्यत्वेनसयलवियप्पहंइत्यादिसूत्रत्रयं॥३॥अथानंतरंपरमात्मप्रकाशना
ममुख्यत्वेनसयलहंदोसहंइत्यादिसूत्रत्रयं॥३॥अथानंतरंसिद्धपदमुख्यत्वेनणुगणेकम्मक्खउकरिविइत्यादिसूत्रत्रयं
॥३॥तदनंतरंपरमात्मप्रकाशाराधकपुरुषाणांफलकथनमुख्यत्वेनजेपरमप्पपयासमुणिइत्यादिसूत्रत्रयं॥३॥अतऊ
र्द्ध्वंपरमात्मप्रकाशाराधनायोग्यपुरुषकथनमुख्यत्वेनजेभवदुक्खहंइत्यादिसूत्रत्रयं॥३॥अथानंतरंपरमात्मप्रकाशग्रं
थफलकथनमुख्यत्वेनतथैवोद्धत्यपरिहारमुख्यत्वेनचलक्खणछंदइत्यादिसूत्रत्रयं॥३॥एवंचचतुर्विंशतिदोहकसूत्रे
षुचूलिकावसानेसप्तस्थलानिगतानि॥एवंप्रथमपातनिकासमाप्ता॥अथवाप्रकारांतरेणद्वितीयपातनिकाकथ्यते॥ २
तद्यथा॥प्रथमतस्तावद्बहिरात्मांतरात्मपरमात्मकथनरूपेणप्रक्षेपकान्विहायत्रयोविंशत्यधिकशतसूत्रपर्यंतंव्या

ख्यानंक्रियतइति।समुदायपातनिका॥१२३॥तत्रादौजेजायाइत्यादिपंचविंशतिसूत्रपर्यंतंत्रिविधात्मपीठिकाव्याख्यानं॥२५॥
अथानंतरंजेहउणिम्मलुइत्यादिचतुर्विंशतिसूत्रपर्यंतंसामान्यविवरणं॥२४॥अतऊर्द्ध्वंअप्पाजोइयसव्वगउइत्यादित्रिच
त्वारिंशत्सूत्रपर्यंतंविशेषविवरणं॥४३॥अतऊर्द्ध्वंअप्पासंजमुइत्याद्येकत्रिंशत्सूत्रपर्यंतंचूलिकाव्याख्यानमिति॥३१॥
प्रथममहाधिकारःसमाप्तः॥अथानंतरंमोक्षमोक्षफलमोक्षमार्गस्वरूपकथनमुख्यत्वेनप्रक्षेपकान्विहायचतुर्दशा
धिकशतद्वयसूत्रपर्यंतंद्वितीयमहाधिकारःप्रारभ्यतइतिसमुदायपातनिका॥२१४॥तत्रादौसिरिगुरुइत्यादित्रिंशतसूत्र
पर्यंतंपीठिकाव्याख्यानं॥३०॥तदनंतरंजोभत्तउइत्यादिषट्त्रिंशत्सूत्रपर्यंतंसामान्यविवरणं॥३६॥अथानंतरंरूढइहं
संजमुइत्यादिएकचत्वारिंशत्सूत्रपर्यंतंविशेषविवरणं॥४१॥तदनंतरंप्रक्षेपकान्विहायसप्तोत्तरशतपर्यंतमभेदरत्न
त्रयमुख्यतयाचूलिकाव्याख्यानं॥१०७॥इतिद्वितीयपातनिकाज्ञातव्या॥इदानींप्रथमपातनिकाभिप्रायेणव्याख्यानंक्रिय

परमात्म०
३ माणेग्रंथकारोग्रंथस्यादौमंगलार्थमिष्टदेवतानमस्कारंकुर्व्वाणःसन्दोहकसूत्रमेकंप्रतिपादयति॥तद्यथा॥जेजायाझा ण
ग्गियएकम्मकलंकडहेविणिच्चणिरंजण णाणमयतेपरमप्पणवेवि॥१॥जेजायायेकेचनकर्त्तारोमहात्मानोजाताउत्पन्नाः
।के।करणभूतेनझाणग्गियएध्यानाग्निनाकिंकृत्वापूर्व्वंकम्मकलंकडहेवि।कर्म्मकलंकमलान्दग्ध्वाभस्मीकृत्वाकथंभूताजा
ताःणिच्चणिरंजणणाणमयनित्यनिरंजनज्ञानमया।तेपरमप्पणवेवितान्परमात्मनःकर्म्मतापन्नान्नत्वाप्रणम्येतितात्पर्यार्थ
व्याख्यानं।समुदायकथनेसंपिंडितार्थनिरूपणमुपोद्घातःसंग्रहवाक्यंवार्त्तिकमितियावत्।इतोविशेषः।तद्यथाजेजाता
उत्पन्नामेघपटलविनिर्गतदिनकरणप्रभावत्कर्म्मपटलविघटनसमयेसकलविमलकेवलकेवलज्ञानाद्यनंतचतुष्टयव्यक्ति
रूपेणलोकालोकप्रकाशनसमर्थेनसर्व्वप्रकारोपादेयभूतेनकार्यसमयसारूपेणपरिणताः।कयानयविवक्षयाजाताःसि ३
द्धपर्यायपरिणतिव्यक्तरूपतयाधातुपाषाणेस्वर्णपर्यायपरिणतिव्यक्तिवत्॥तथाचोक्तं॥पंचास्तिकायेपर्यायार्थिकनयेन।

अभूदपूर्व्वोहवदिसिद्धो॥१॥द्रव्यार्थिकनयेनपुनःशक्त्यपेक्षयापूर्व्वमेवशुद्धबुद्धैकस्वभावस्तिष्ठतिधातुपाषाणेस्वर्णशक्तिवत्॥तथाचोक्तं॥द्रव्यसंग्रहेशुद्धद्रव्यार्थिकनयेनसव्वेसुद्धासुद्धनयाकेनजाताध्यानाग्निनाकरणभूतेनध्यानशब्देनआगमापेक्षयावीतरागनिर्विकल्पशुक्लध्यानंअध्यात्मापेक्षयावीतरागनिर्व्विकल्परूपातीतध्यानं॥तथाचोक्तं॥पदस्थंमंत्रवाक्यस्थंपिंडस्थंस्वात्मचिंतनंरूपस्थंसर्व्वचिद्रूपंरूपातीतंनिरंजनं।तच्चध्यानंवस्तुवृत्त्याशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकनिर्व्विकल्पसमाधिसमुत्पन्नवीतरागपरमानंदसमरसीभावस्वरवरसास्वादरूपमितिज्ञातव्यं॥७॥किंकृत्वाजाताःकर्म्ममलकलंकान्दग्ध्वाकर्म्ममलशब्देनद्रव्यकर्मभावकर्म्माणिगृह्यंतेपुद्गलपिंडरूपाणिज्ञानावरणादीन्यष्टौद्रव्यकर्म्माणिरागादिसंकल्पविकल्परूपाणिपुनर्भावकर्म्माणिद्रव्यकर्मदहनमनुपचरितासद्भूतव्यवहारनयेनभावकर्म्मदहनंपुनरशुद्धनिश्च

परमात्म॰ येनकारणेनशुद्धनिश्चयेनबंधमोक्षौनस्तः इत्थंभूतकर्म्ममलकलंकान्दग्ध्वाकथंभूताजाताः नित्यनिरंजनज्ञानमयाः। क्षणिकैकांतवा
४ दिसौगतमतानुसारिशिष्यंप्रतिद्रव्यार्थिकनयेननित्यटंकोत्कीर्णज्ञायकैकस्वभावपरमात्मद्रव्यव्यवस्थापनार्थंनित्यविशेषणं
कृतं। अथकल्पशतेगतेजगत्शून्यंभवति। पश्चात्सदाशिवेजगत्करणविषयेचिंताभवति। तदनंतरंमुक्तिगतानांजीवानांकर्म्मा
जनसंयोगंकृत्वासंसारेपतनंकरोतीति। नैयायिकावदंतितन्मतानुसारिशिष्यंप्रतिभावकर्म्मद्रव्यकर्म्मनोकर्म्मांजननिषेधार्थं
मुक्तजीवानांनिरंजनविशेषणंकृतं। मुक्तात्मनांसुप्तावस्थावद्बहिर्ज्ञेयविषयेपरिज्ञानंनास्तीतिसांख्यावदंतितन्मतानुसारिशि
ष्यंप्रतिजगत्त्रयकालत्रयवर्तिसर्व्वपदार्थयुगपत्परिच्छित्तिरूपेकेवलज्ञानस्थापनार्थंज्ञानमयविशेषणंकृतमितितानित्थंभूता
न्परमात्मनोनत्वाप्रणम्यनमस्कृत्येतिक्रियाकारकसंबंधः। अत्रनत्वेतिशब्दरूपोवाचनिकोद्रव्यनमस्कारोगृह्योसद्भूतव्यव ४
हारनयेनज्ञातव्यः॥ केवलज्ञानाद्यनंतगुणस्मरणरूपोभावनमस्कारःपुनरशुद्धनिश्चयनयेनेतिशुद्धनिश्चयनयेनवंद्यवंदक

भावोनास्तीतिएवंपदखंडनारूपेणशब्दार्थःकथितः। नयविभागकथनरूपेणनयार्थोऽपिभणितः बौधादिमतस्वरूपकथनप्रस्तावे
मतार्थोऽपिनिरूपितः। एवंगुणविशिष्टाःसिद्धाःमुक्ताःसंतीत्यागमार्थःप्रसिद्धः। अत्रनित्यनिरंजनज्ञानमयरूपेपरमात्म
द्रव्यमुपादेयमितिभावार्थः अनेनप्रकारेणशब्दनयमतागमभावार्थोव्याख्यानकालेयथासंभवंसर्वत्रज्ञातव्यमिति॥१॥
अथसंसारसमुद्रोत्तरणोपायभूतंवीतरागनिर्व्विकल्पसमाधिपोतंसमारुह्ययेशिवमयनिरूपमज्ञानमयाभविष्यंतीत्य
तेतानहंनमस्करोमीत्यभिप्रायंमनसिधृत्वाग्रंथकारःसूत्रमाह इत्यनेनक्रमेणपातनिकास्वरूपंसर्वत्रज्ञातव्यं। ७ तेवंद
उसिरिसिद्धगणहोसहिंजेविअणंतसिवमयमणिरुवमणाणमयपरमसमाहिभजंत तेहउंवंदउंतान्अहंवंदेतान्का
न्सिरिसिद्धगण श्रीसिद्धगणान् येकिंकरिष्यंति होसहिंजेविअणंत। भविष्यंत्यग्रेयेप्यनंताः कथंभूताभविष्यंनि। सिवम

परमात्म॰ यनिरुवमणाणमयशिवमयनिरूपमज्ञानमयाकिंभजंतःसंतःइत्थंभूताभविष्यंति॥परमसमाहिभजंतरागादिविकल्परहितसमा
५ धिंभजंतःसंतः॥सेवमानाइतोविशेषः॥तथाहि॥तान्सिद्धगणान्कर्म्मतापन्नान्॥अहंवंदेकथंभूतान्।केवलज्ञानादिमोक्षलक्ष्मी
सहितान्क्षाद्यष्टगुणविभूतिसहितान्।अनंतान्किंकरिष्यंति।येवीतरागसर्वज्ञप्रणीतमार्गेणदुर्लभबोधिंलब्ध्वाभविष्यंत्यग्रेनिश्रे
णिकादयःकिंविशिष्टाभविष्यंतिशिवमयनिरुपमज्ञानमयाःअत्रशिवशब्देनस्वशुद्धात्मभावनोत्पन्नवीतरागपरमानंदसुखंग्राह्यं
निरुपमशब्देनसमस्तोपमानरहितंग्राह्यंज्ञानशब्देनकेवलज्ञानंग्राह्यं॥किंकुर्वाणाःसंतःइत्थंभूताभविष्यंति।विशुद्धज्ञानदर्शनस्व
भावशुद्धात्मतत्वसम्यक्श्रद्धानज्ञानानुचरणरूपाभूत्परत्नत्रयभारपूर्णमिथ्यात्वविषयकषायादिरूपसमस्तविभावजलप्रवेशर
हितांशुद्धात्मभावनोत्थसहजानंदैकरूपसुखामृतविपरीतनरकादिदुःखरूपेणक्षारजलेनपूर्णास्यसंसारसमुद्रस्यतरणोपायभू

DR BHAU DAJI

तंसमाधिपोतंभजंतः सेवमानास्तदाधारेणगच्छंतइत्यर्थःअत्रशिवमयनिरुपमज्ञानमयशुद्धात्मस्वरूपमुपादेयमितिभावार्थः॥
२अथानंतरंपरमसमाध्यग्निनाकर्म्मेंधनहोमंकुर्वाणान्वर्त्तमानसिद्धानहंनमस्करोमि॥ दोहा॥तेहउंवंदउंसिद्धगणअच्छहिंजेवि
हवंत परमसमाहिमहग्गियएकम्मिंधणइंहुणंत॥२॥तेहउंवंदउंसिद्धगणतानहंसिद्धगणान्वंदेयेकथंभूताःअच्छहिंजेविहवं
त।इदानींतिष्ठतियेभवंतःसंतःकिंकुर्वाणास्तिष्ठंतिपरमसमाहिमहग्गियएकम्मिंधणइंहुणंत।परमसमाध्यग्निनाकर्म्मेंधनानि
होमयंतः।अतोविशेषः॥तद्यथा॥तान्सिद्धसमूहानहंवंदेवीतरागनिर्विकल्पस्वसंवेदनज्ञानलक्षणपारमार्थिकसिद्धभक्त्या
नमस्करोमियेकिंविशिष्टाःइदानींपंचमहाविदेहेषुभवंतस्तिष्ठंतिश्रीसीमंधरस्वामिप्रभृतयःकिंकुर्वंतस्तिष्ठंति॥वीतरागपरम
समायिकभावनाविनाभूतनिर्दोषपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिवैश्वानरेक

र्म्मेंधनाहुतिभिःकृत्वाहोमंकुर्वंतइतिअत्रशुद्धात्मद्रव्यस्योपादेयभूतस्यप्राप्त्युपायभूतत्वान्निर्विकल्पसमाधिरेवोपादेयइतिभावा
र्थः॥३॥अथपूर्वकालेशुद्धात्मस्वरूपंप्राप्यस्वसंवेदनज्ञानबलेनकर्म्मक्षयंकृत्वायेसिद्धाभूत्वानिर्वाणेवसंतितानहंवंदे॥तेपुणवं
दउंसिद्धगणजेणिव्वाणिंवसंतिणाणिंतिहुयणिगरुयाविभवसायरिणपडंति॥४॥तेपुणुवंदउंसिद्धगणतान्पुनर्वंदेसिद्धग
गणान्किंविशिष्टान्जेणिव्वाणिवसंति येनिर्वाणेमोक्षपदेवसंतितिष्ठंति पुनरपिकथंभूतायेणाणिंतिहुयणिगरुयावि
भवसायरिणपडंति ज्ञानेनत्रिभुवनेगुरुकाअपिभवसागरेनपतंति अतऊर्द्ध्वंविशेषः तथाहि तान्पुनर्वंदेहंसिद्ध
गणान्येतीर्थंतरपरमदेवभरतराघवपांडवाद्यःपूर्वकालेवीतरागनिर्विकल्पस्वसंवेदनज्ञानबलेनस्वशुद्धात्मस्वरूपं ६
प्राप्यकर्म्मक्षयंकृत्वेदानींनिर्वाणेतिष्ठंतिसदापिनशंसयतानपिलोकालोकप्रकाशककेवलज्ञानस्वसंवेदनत्रिभुवनगुरुत

रान्त्रैलोक्यालोकनपरमात्मस्वरूपंनिश्चयव्यवहारपदपदार्थव्यवहारनयकेवलज्ञानप्रकाशेनसमाहितस्वस्वरूपभूतेनिर्वा
णपदेतिष्ठंतियतोनिर्वाणपदोपादेयमितितात्पर्यार्थः॥४॥अतऊर्द्ध्वंव्यवहारनिश्चयशुद्धात्मनोहिसियद्यपिव्यवहारेणलोका
लोकयंतस्तिष्टतिस्तथापिनिश्चयनयेनशुद्धात्मस्वरूपेतिष्ठंतीतितानहंवंदेइतिकथयति॥ ॥तेपुणुवंदउंसिद्धगणजेअप्पाणि
वसंत॥लोयालोउविसयलुइहुअच्छहिंविमलुणियंत॥५॥तेपुणुवंदउंसिद्धगणतान्पुनर्वंदेसिद्धगणान्येकथंभूताःजे
अप्पाणिवसंतलोयालोउविसयलुइहु॥अच्छहिंविमलुणियंत येवसंतितिष्ठंतिक्वआत्मनिवसंतःकिंकुर्वन्लोकालोकंसम
स्तमपिइदंप्रत्यक्षीभूतंविमलंनिर्मलंअवलोकयंतःपदार्थस्वरूपंव्यवहारेणनिश्चयेनस्वकीयस्वरूपंनिश्चयंतोतिष्ठंतीति।पा
ठांतरंइहअस्मिन्निजस्वरूपेवाइदानींविशेषः॥तद्यथा॥तान्पुनरहंवंदेसिद्धगणान्सिद्धसमूहंवंदेकर्म्मक्षयनिमित्तंपुन

परमात्म० रथिकथंभूतंसिद्धस्वरूपंचैतन्यानंदस्वभावंलोकालोकव्याप्तिसूक्ष्मपर्यायशुद्धस्वरूपंज्ञानदर्शनोपयोगलक्षणंनिश्चयएकी
७ भूतंव्यवहाराभावेस्वात्मनितिष्ठंति। उपचरितासद्भूतव्यवहारेलोकालोकअवलोकनंस्वसंवेद्यंप्रतिभातिंआत्मस्वरूपंकेवलज्ञ
ज्ञानोपशमनंयथापुरुषार्थपदार्थदृष्टोभवति। तेषांबाह्यवृत्तिनिमित्तमुत्पत्तिस्थूलसूक्ष्मपदपदार्थव्यवहारात्मानमेवजानंतिय
दिनिश्चयेनतिष्टंतितर्हिंपरकीयसुखदुःखपरिज्ञानेसुखदुःखानुभवःप्राप्नोति॥ परकीयरागद्वेषहेतुपरिज्ञानेचरागद्वेष
मयत्वंचप्राप्नोतीतिमहद्दूषणं। अत्रयत्निश्चयेनस्वस्वरूपेवस्थानंभणितंतदेवोपादेयमितिभावार्थः॥५॥अथनिष्कलात्मा
नंसिद्धपरमेष्टिनंनत्वेदानींतस्यसिद्धस्वरूपस्यतत्प्राप्त्युपायस्यचप्रतिपादकसकलात्मानंनमस्करोमि॥६॥केवलदंस ७
णणाणमयकेवलसुखसहाव॥जिणवरवंदउंभत्तियएजेहिंपयासियभाव। केवलदर्शनज्ञानमयाःकेवलसुखस्वभावा

येतान्जिनवरानहंवंदेकयाभक्त्यायेःकिंकृतंप्रकासिताभावाजीवाजीवादिपदार्थाइति॥इनोविशेषः॥केवलज्ञानाद्यनंतच
तुष्टयस्वरूपपरमात्मतत्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्न त्रयात्मकंसुखदुःखजीवितमरणलाभालाभसत्रुमित्रस
मानभावनाविनाभूतवीतरागनिर्विकल्पसमाधिपूर्वंजिनोपदेशंलब्ध्वापश्चादनंतचतुष्टयस्वरूपाजातायेःपुनश्चकिंकृतंयैःअनुवा
दरूपेणजीवादिपदार्थाःप्रकाशिता। विशेषेणतुकर्माभावेसतिकेवलज्ञानाद्यनंतगुणस्वरूपलाभात्मकोमोक्षःशुद्धात्मसम्यक्
श्रद्धानज्ञानानुष्टानरूपाभेदरत्नत्रयात्मकोमोक्षमार्गश्चतानहंवंदे। अत्रार्हद्गुणस्वरूपस्यशुद्धात्मस्वरूपमेवोपादेयमितिभावा
र्थः॥६॥अथानंतरंभेदाभेदरत्नत्रयाराधकानाचार्योपाध्यायसाधून्नमस्करोमि॥७॥जेपरमप्पुणियेतिमुणिपरमसमाहि
धरेवि॥परमाणंदहंकारणेणतिणिवितेविणवेवि॥७॥जेपरमप्पुणियंतिमुणिजेकेचनपरमात्मानंनिर्गछंति॥स्वसंवे
दनज्ञानेनजानंतिमुनयस्तपोधनाःकिंकृत्वापूर्वंपरमसमाहिंधरेवि॥रागादिविकल्परहितंपरमसमाधिंधृत्वाकेनकारणेन

परमात्मः परमाणदहंकारणिणनिर्विकल्पसमाधिसमुत्पन्नसदानंदपरमसमरसीभावरूपस्वरसास्वादनिमित्तेनतिणिवित्तेविणवैवि
८ श्रीनप्याचार्योपाध्यायसाधूनत्वानमस्कृत्येत्यर्थः॥अतोविशेषः॥अनुपचरितासद्भूतव्यवहारसंबंधःद्रव्यकर्मनोकर्मरहितंतथै
वाशुद्धनिश्चयसंबंधः मतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायरहितंचयच्चिदानंदैकस्वभावंशुद्धात्मतत्वंतदेवभूतार्थं।
परमार्थरूपसमयसारशब्दवाच्यंसर्वप्रकारोपादेयभूतंतस्माच्चयदन्यत्तद्धेयमितिचलमलिनावगाढरहितत्वेननिश्चयश्रद्धा
नबुद्धिःसम्यक्त्वंतत्राचरणंपरिणमनंदर्शनाचारस्तत्रैवसंशयविपर्यासानध्यवसायरहितत्वेनस्वसंवेदनज्ञानरूपेणग्राहक
बुद्धिःसम्यक्ज्ञानंतत्राचरणंपरिणमनंज्ञानाचारः॥तत्रैवशुभाशुभसंकल्पविकल्परहितत्वेननित्यानंदमयसुखरसास्वादस्थि
रानुभवनंचसम्यक्चारित्रंतत्राचरणंपरिणमनंचारित्राचारः॥तत्रैवपरद्रव्येच्छानिरोधेनसहजानंदैकरूपेणप्रतपनंतपश्चर ९
णंतत्राचरणंपरिणमनंतपश्चरणाचारः।तत्रैवशुद्धात्मस्वरूपेस्वशक्त्यानवगूहनेनाचरणंपरिणमनंवीर्याचारइतिनिश्चयपंचा

चाराःनिःशंकाद्यष्टगुणाभेदोबाह्यदर्शनाचारः॥कालविनयाद्यष्टभेदोबाह्यज्ञानाचारःपंचमहाव्रतपंचसमितित्रिगुप्तिनिर्ग्रंथरूपोबाह्य
चारित्राचारः।अनशनादिद्वादशभेदरूपोबाह्यतपश्चरणाचारः।बाह्यस्वशक्त्यानवगूहनरूपोबाह्यवीर्याचारइतिअयंतुव्यवहा
रपंचाचारः।पारंपर्येणसाधकइतिविशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्वसम्यक्श्रद्धानज्ञानानुष्ठानबहिर्द्रव्येच्छानिवृत्तिरूपंतपश्चरणं
।स्वशक्त्यानवगूहनवीर्यरूपाभेदपंचाचाररूपात्मकंशुद्धोपयोगभावनांतर्भूतंवीतरागनिर्विकल्पसमाधिंस्वयमाचरंत्यन्याना
चारयंतीतिभवंत्याचार्यास्तानहंवंदे।पंचास्तिकायषड्द्रव्यसप्ततत्वनवपदार्थेषुमध्येशुद्धजीवास्तिकायशुद्धजीवद्रव्यशुद्धजीव
तत्वशुद्धजीवपदार्थसंज्ञंस्वशुद्धात्मभावमुपादेयंतस्मादन्यद्धेयंकथयंति।शुद्धात्मस्वभावसम्यक्श्रद्धानज्ञानानुचरणरूपाभे
दरत्नत्रयात्मकंनिश्चयमोक्षमार्गंचयेकथयंतितेभवंत्युपाध्यायास्तानहंवंदे शुद्धबुद्धैकस्वभावशुद्धात्मतत्वसम्यक्श्रद्धान
ज्ञानानुचरणतपश्चरणरूपाभेदचतुर्विधनिश्चयाराधनात्मकवीतरागनिर्विकल्पसमाधिंयेसाधयंतितेभवंतिसाधवस्ता

परमात्मः नहंवंदे अत्रयमेवयेसमाचारंतिकथयंतिसाधयंतिचवीतरागनिर्विकल्पसमाधिंतमेवोपादेयभूतस्यस्वशुद्धात्मतत्वस्यसाधक
९ त्वादुपादेयंजानीहिइतिभावार्थः॥इतिप्रभाकरभट्टस्यपंचपरमेष्टिनमस्कारकरणमुख्यत्वेनप्रथममहाधिकारमध्येप्रथमस्थ
लेदोहकसूत्रसप्तकंगतं॥७॥अथप्रभाकरभट्टःपूर्वोक्तप्रकारेणपंचपरमेष्टिनोनत्वापुनरिदानींश्रीयोगींद्रदेवान्विज्ञापयति
॥८॥भाविंपणविविपंचगुरुसिरिजोइंदुजिणाउ॥भट्टपहायरिविणयउविमलुकरेविणुभाउ॥८॥भाविपणविविपंचगुरुभावे
नभावशुद्ध्याप्रणम्यकान्। पंचगुरून्पश्चात्किंकृत्वासिरिजोइंदुजिणाउ। भट्टपहायरिविणविउविमलुकरेविणुभाउ॥श्रीयोगीं
द्रदेवनामाभगवान्प्रभाकरभट्टेनकर्तृभूतेनविज्ञापितः।विमलंकृत्वाकंभावंपरिणाममिति॥अत्रप्रभाकरभट्टःशुद्धात्मतत्वपरि
ज्ञानार्थंश्रीयोगींद्रदेवंभक्तिप्रकर्षेणविज्ञापितवानित्यर्थः॥तद्यथा॥गउसंसारवसंताहंसामियकालुअणंतु। परमइंकिंपिण ९
पत्तुसुहु। दुक्खजिपत्तुमहंतु॥९॥गउसंसारिवसंताहंसामियकालुअणंतु। गतःसंसारेवसतांतिष्टतांहेस्वामिन्कोसौकालः

कियान्अनंतःपरमइंकिंपिनपत्तुसुहु।दुक्खजिपत्तुमहंतु।परंकिंतुमयाकिमपिनप्राप्तंसुखंदुःखमेवप्राप्तंमहदिति॥इतोविस्तरः।
।तथाहि॥स्वशुद्धात्मभावनासमुत्पन्नवीतरागपरमानंदसमरसीभावरूपसुखामृतविपरीतनारकादिदुःखरूपेणक्षारनीरेणपू
र्णेअजरामरपदविपरीतजातिजरामरणरूपेणमकरादिजलचरसमूहेनसंकीर्णेअनाकुलत्वलक्षणपारमार्थिकसुखविप
रीतनानामानसादिदुःखरूपवडवानलशिखासंदीपिताभ्यंतरेवीतरागनिर्विकल्पसमाधिविपरीतसंकल्पविकल्पजालरूपेण
कल्लोलमालासमूहेनविराजतेसंसारसागरेवसतांतिष्टतांहेस्वामिन्ननंतःकालोगतः॥कस्मादेकेंद्रियविकलेंद्रियपंचेंद्रियसंज्ञिप
र्याप्तमनुष्यत्वदेशकुलरूपेंद्रियपटुत्वनिर्व्याध्यायुष्कवरबुद्धिसद्धर्मश्रवणग्रहणधारणश्रद्धानसंयमविषयसुखव्यावर्त्तनक्रो
धादिकषायनिर्वर्त्तनेषुपरंपरदुर्लभेषुकथंभूतेषुलब्धेष्वपितपोभावनाधर्मेषुशुद्धात्मभावनालक्षणवीतरागनिर्विकल्पसमाधि
दुर्लभत्वात्।तदपिकथंवीतरागनिर्विकल्पसमाधिबोधिप्रतिपक्षभूतानांमिथ्यात्वविषयकषायादिविभावपरिणामानांप्रबल

त्वादितिसम्यग्दर्शनज्ञानचारित्राणामप्राप्तप्रापणंबोधिस्तेषामेवनिर्विघ्नेनभवांतरप्रापणंसमाधिरिति। समाधिबोधिलक्षणं
यथासंभवंसर्वत्रज्ञातव्यं॥तथाचोक्तं॥इत्यतिदुर्लभरूपांबोधिंलब्ध्वायदिप्रमादीस्यात्। संसृतीभीमारण्येभ्रमतिवराकोनरःसुचि
रं॥३॥परंकिंतुबोधिसमाध्यभावेपूर्वोक्तसंसारेभ्रमतापिमयाशुद्धात्मसमाधिसमुत्पन्नवीतरागपरमानंदसुखामृतंकिमपि
नप्राप्तंकिंतुतद्विपरतमाकुलत्वोत्पादकंविविधशारीरमानसरूपंचतुर्गतिभ्रमणसंभवंदुःखमेवप्राप्तमिति। अत्रयस्यवीतराग
परमानंदसुखस्यालाभेभ्रमितोजीवस्तदेवोपादेयमितिभावार्थः॥९॥ अथयस्यैवपरमात्मस्वभावस्यालाभेऽनादिकालेभ्रमितो
जीवस्तमेवपृच्छति॥छ॥चउगइदुक्खहंतत्ताहंजोपरमप्पउकोइ। चउगइदुक्खविणासयरुकहहुपसाएंसोहि॥छ॥चउगइ
दुक्खहंतत्ताहंजोपरमप्पउकोहि इ॥चतुर्गतिदुःखतप्तानांजीवानांयःकश्चिच्चिदानंदैकस्वभावःपरमात्मापुनरपिकथंभूतः॥
चउगइदुक्खविणासयरुहोत्र्आरभयमैथुनपरिग्रहसंज्ञारूपादिसमस्तविभावरहितानांवीतरागनिर्विकल्पसमाधिबलेन १०

DR. BHAU DA[JI]

परमात्मोत्थसहजानंदैकसुखामृतसंतुष्टानांजीवानांचतुर्गतिदुःखविनाशकः। कहहुपसाएंसोइहेभगवन्तमेवपरमात्मा
नंमहाप्रसादेनकथयेति। अत्रयोसौपरमसमाधिरतानांचतुर्गतिदुःखविनाशकःसएवसर्वप्रकारेणोपादेयइतितात्पर्यार्थः॥१०
॥एवंत्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्येप्रभाकरभट्टविज्ञप्तिकथनमुख्यत्वेनदोहकसूत्रत्रयंगतं॥३॥अथ
प्रभाकरभट्टविज्ञापनानंतरंश्रीयोगींद्रदेवास्त्रिविधात्मानंकथयंति। पुणुपुणुपणविविपंचगुरु। भाविंचित्तिधरेवि। भट्ट
पहायरणिसुणितुहुं। अप्पातिविहुकहेवि॥७॥पुणुपुणुपणविविपंचगुरुभाविचित्तिधरेवि। चिनःपुनःप्रणम्यपंचगु
रूनहंकिंकृत्वाभावेनभाक्तिपरिणामेनमनसिधृत्वापश्चात्भट्टपहायरणिसुणितुहुं।अप्पातिविहुकहेविहेप्रभाकर
भट्टनिश्चयेनशृणुत्वंत्रिविधमात्मानंकथयाम्यहमिति॥ बहिरात्मांतरात्मपरमात्मभेदेनत्रिविधात्माभवति।अयंत्रिविधा
त्मायथात्वयापृष्टोहेप्रभाकरभट्टतथाभेदाभेदरत्नत्रयभावनाप्रियाःपरमात्मभावनोत्थवीतरागपरमानंदसुधारसपि

परमात्म० पासितावीतरागनिर्व्विकल्पसमाधिसमुत्पन्नसुखामृतविपरीतज्ञौनारकादिदुःखभयभीताः॥ भव्यवरपुंडरीकाभरतसगर
११ रामपांडवश्रेणिकादयोपिवीतरागसर्व्वज्ञतीर्थंकरपरमदेवानांसमवसरणेसपरिवाराभक्तिभरनमितोत्तमांगाःसंतःसर्व्वागम
प्रश्नानंतरंसर्व्वप्रकारोपादेयंशुद्धात्मानंपृच्छंतीति। अत्रत्रिविधात्मस्वरूपमध्येशुद्धात्मस्वरूपमुपादेयमितिभावार्थः॥ ११॥ अथ
त्रिविधात्मानंज्ञात्वाबहिरात्मानंविहायस्वसंवेदनज्ञानेनपरंपरमात्मानंभावयत्वमितिप्रतिपादयति॥ १२॥ अप्पातिविहुमुणे
विलहुमूढउमिल्लहिभाउ। मुणिसण्णाणेंणाणमउजोपरमसहाउ॥ १२॥ अप्पातिविहुमुणेविलहुमूढउमिल्लहिभाउ। हेप्रभाक
रभट्टआत्मानंत्रिविधंमत्वालघुशीघ्रंमूढंबहिरात्मस्वरूपंभावंपरिणामंमुंचमुणिसण्णाणिंणाणमउजोपरमप्पसहाउपश्चात्
त्रिविधात्मपरिज्ञानानंतरंमन्यस्वजानीहिकेनकरणभूतेनअंतरात्मलक्षणवीतरागनिर्विकल्पस्वसंवेदनज्ञानेनकंजानीहियंपर ११
मात्मस्वभावंकिंविशिष्टंज्ञानमयंकेवलज्ञानेननिर्वृत्तमिति॥ अत्रयोसौस्वसंवेदनज्ञानेनपरमात्माज्ञातसएवोपादेयइतिभा

वार्थः॥ स्वसंवेदनज्ञानेवीतरागविशेषणंकिमर्थमितिपूर्व्वपक्षःपरिहारमाह। विषयानुभवरूपस्वसंवेदनज्ञानंसरागमपि
दृश्यतेतन्निषेधार्थमित्यभिप्रायः॥ १२॥ अथत्रिविधात्मसंज्ञाबहिरात्मलक्षणंचकथयति॥ १३॥ मूढुवियरकणुबंभुपरु। अप्पा
तिविहुहवेइ। देहुजिअप्पाजोमुणइ। सोजणुमूढुहवेइ। मूढवियरकणुबंभुपरुअप्पातिविहुहवेइ। मूढोमिथ्यात्वरागादि
परिणतोबहिरात्माविचक्षणोवीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतोंतरात्माब्रह्मशुद्धबुद्धैकस्वभावःपरमात्माशुद्धबु
द्धस्वभावलक्षणंकथ्यते। शुद्धोरागादिरहितोबुद्धोनंतज्ञानादिचतुष्टयसहितइति॥ शुद्धबुद्धस्वभावलक्षणंसर्व्वत्रज्ञातव्यंस
चकथंभूतब्रम्हापरमोभावकर्म्मद्रव्यकर्म्मनोकर्म्मरहितः। एवमात्मात्रिविधोभवतिदेहुजिअप्पाजोमुणइसोजणुमूढुहवेइ
वीतरागनिर्व्विकल्पसमाधिसंजातसदानंदैकसुखामृतस्वभावमलभमानःसन्देहमिवमात्मानंयोमनुतेजानातिसजनो
लोकोमूढात्माभवतिइत्ति। अत्रबहिरात्माहेयस्तदपेक्षयायद्यप्यंतरात्मोपादेयस्तथापिसर्व्वप्रकारोपादेयभूतःपरमा

त्मापरमात्मापेक्षयासहेयइतितात्पर्यार्थः॥१३॥अथपरमसमाधिस्थितःसन्देहविभिन्नंज्ञानमयंपरमात्मानंयोसोजानातिसो
तरात्माभवतीतिनिरूपयति॥छ॥देहविभिण्णउणाणमउजोपरमप्पुणिएइ। परमसमाहपरिठियउपंडिउसोजिहवेइ॥छ॥दे
हविभिणउणाणमउजोपरमप्पुणिएइ।अनुपचरितासद्भूतव्यवहारनयेनदेहादभिन्नंनिश्चयनयेनभिन्नंज्ञानमयंकेवलज्ञानेननिर्वृ
त्तपरमात्मानंयोसोजानातिपरमसमाहिपरिट्ठियउपंडिउसोजिहवेइ।वीतरागनिर्विकल्पसहजानंदैकरूद्धात्मानुभूतिलक्षण
परमसमाधिप्रतिष्ठितःसन्पंडितोतरात्माविवेकीसएवभवति।कःपंडितोविवेकीतिवचनादितित्रयंतरात्मनोध्येयरूपोयोसोपर
मात्माभणितः।सएवसाक्षादुपादेयइतिभावार्थः॥१४॥अथसमस्तपरद्रव्यंमुक्त्वाकेवलज्ञानमयकर्म्मरहितःशुद्धात्मायेनलब्धः
सपरमात्माभवतीतिकथयति॥छ॥अप्पालद्धउणाणमउकम्मविमुक्किंजेण।मिल्लिविसयलुविदव्बुपरुसोपरमुणाहिमणेण १२
॥छ॥अप्पालद्धउणाणमउकम्मविमुक्किंजेण।आत्मालब्धःप्राप्तःकिंविसिष्टोज्ञानमयः।केवलज्ञानेननिर्वृत्तःकथंभूतेनस

ताज्ञानावरणादिद्रव्यकर्म्मभावकर्म्मरहितेनयेनकिंकृत्वात्मालब्धःमिल्लिविसयलुविदव्बुपरुसोपरुमुणाहिमणेणमुक्त्वापरित्यज्य
किंपरद्रव्यंदेहरागादिकंकतिसंख्योपेतमपिसमस्तमपितमित्थंभूतमात्मानंपरंपरमात्मानमितिमन्यस्वजानीहि। हेप्रभाकरभट्टकेन
कृत्वामायामिथ्यानिदानशल्यत्रयस्वरूपादिसमस्तविभावपरिणामरहितेनमनसेतित्रयत्रोक्तलक्षणपरमात्मोपादेयोज्ञानावरणा
णादिसमस्तविभावरूपंपरद्रव्यंतुहेयमितिभावार्थः।एवंत्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्येसंक्षेपेणत्रिविधात्मसू
नमुख्यतयात्तृतीयस्थलेसूत्रपंचकंगतं॥१५॥तदनंतरंमुक्तिगतकेवलज्ञानादिव्यक्तिरूपसिद्धजीवव्याख्यानमुख्यत्वेनदोहकसूत्रद
शकंप्रारभ्यते॥तद्यथा॥लक्षमलक्षेणध्यत्वाहरिहरादिविसिष्टपुरुषायंध्यायंतितंपरमात्मानंजानीहीतिप्रतिपादयति॥ तिहुवण
वंदिउसिद्धिगउहरिहरकायहिजोजि। लक्खुअलक्खेंधरिविथिरुमणिपरमप्पउसोजि॥छ॥तिहुवणवंदिउसिद्धिगउहरिहरकाय

परमात्म० हिंज्ञोज्ञि। त्रिभुवनवंदितंसिद्धगतंयंकेवलज्ञानादिव्यक्तिरूपंपरमात्मानंहरिहरहिरण्यगर्भादयोध्यायंतिकिंकृत्वापूर्वंलखुअल।
१३ रु रव्यंधुरिविथिर्लक्ष्यंसंकल्परूपंचित्तंअलक्ष्येणवीतरागनिर्विकल्पनित्यानंदैकस्वभावपरमात्मरूपेणधृत्वास्थिरंकथंभूतंस्थिरं
परिहोषपसंगोरक्षभितंमुणिपरमप्पउसोजित्तमित्थंभूतंपरमात्मानंहेप्रभाकरभट्टमन्यस्वज्ञानीहिभावयेत्यर्थः।अत्रकेवलज्ञाना
दिव्यक्तिरूपमुक्तिगतपरमात्मसदृशोरागादिरहितःस्वशुद्धात्मासाक्षादुपादेयइतिभावार्थः।संकल्पविकल्पस्वरूपंकथ्यते॥त
था॥बहिर्द्रव्यविषयेपुत्रकलत्रादिचेतनाचेतनरूपेममेदमितिस्वरूपसंकल्पः।अहंसुखीःदुःखीत्यादिचित्तगतोहर्षविषादा
दिपरिणामोविकल्पइति।एवंसंकल्पविकल्पलक्षणंसर्वत्रज्ञातव्यं॥७॥अथनित्यनिरंजनज्ञानमयपरमानंदस्वभाव।शांतशिव
स्वरूपंदर्शयन्नाह॥णिच्चुणिरंजणुणाणमउपरमाणंदसहाउ।जोएहउसोसंतसिउतासुमुणिज्जहिभाउ॥७॥णिच्चुणिरंजणु १३

णाणमउपरमाणंदसहाउ।द्रव्यार्थिकनयेननित्योऽविनश्वरः।रागादिकर्ममलरूपांजनरहितत्वान्निरंजनःकेवलज्ञानेननिर्वृत्तत्वा
त्॥ज्ञानमयःशुद्धात्मभावनोत्थवीतरागपरमानंदपरिणतत्वात्परमानंदस्वभावः।जोएहउसोसंतसिउयइत्थंभूतःसशांतः
शिवोभवतिहेभाप्रेकरभट्टतासुमुणिज्जाहिभाउ।तस्यवीतरागत्वात्शांतस्यपरमानंदसुखमयत्वात्शिवस्वरूपस्यत्वंजानी
हि।भावकंभावयशुद्धबुद्धैकस्वभावमित्यभिप्राय॥१७॥पुनश्चकिंविशिष्टोभवति॥जोणियभाउणपरिहरइजोपरभाउणलेइ
।जाणइसयलुविणिच्चुपरसोसिउसंतुहचेइ॥७॥यःकर्त्तानिजभावमनंतज्ञानादिस्वभावंनपरिहरति।यश्चपरभावंकामक्रो
धादिरूपमात्मस्वरूपत्तयानगृह्णाति।पुनरपिकथंभूतः॥जानातिसर्वमपिजगत्त्रयकालत्रयवर्त्तिवस्तुस्वभावंनकेवलंजानाति
द्रव्यार्थिकनयेननित्यएव॥अथचानिर्वसर्वकालमेवजानातिपरंनियमेनसइत्थंभूतःशिवोभवतिशांतश्चभवतीति।किंच
अयमेवजीवःमुक्तावस्थायांव्यक्तिरूपेणशांतःशिवःसंसारावस्थायांतुशुद्धद्रव्यार्थिकनयेनशक्तिरूपेणेति

॥तथाचोक्तं॥परमानयायसदाशिवायनमोस्तु॥पुनश्चोक्तं॥शिवंपरमकल्याणंनिर्वाणंशांतमक्षयं।प्राप्तंमुक्तिपदंयेनसशिवः
परिकीर्त्तितः॥अन्यःकोप्येकोजगत्कर्त्ताव्यापीसदामुक्तःशांतःशिवोस्तीत्येवंनअत्रायमेवशांतशिवसंज्ञःशुद्धात्मोपादेयइतिभा
वार्थः॥१८॥अथपूर्वोक्तंनिरंजनस्वरूपंसूत्रत्रयेणव्यक्तीकरोति॥त्रिकलं॥जासुणवण्णुणगंधुरसुजाणसदुणफासुजासुण
जम्मणुमरणुणविणाउणिरंजणुतासु॥१९॥यस्यमुक्तात्मनःशुक्लकृष्णरक्तपीतनीलरूपःपंचप्रकारवर्णोनास्तिसुरभिदुरभिरूपो
द्विःप्रकारोगंधोनास्ति।कटुकतीक्ष्णमधुराम्लकषायरूपःपंचप्रकारोरसोनास्ति।भाषात्मकाभाषात्मकादिभेदभिन्नःशब्दोनास्ति
शीतोष्णस्निग्धरूक्षगुरुलघुमृदुकठिनरूपोष्टप्रकारःस्पर्शोनास्तिपुनःश्चयस्यजन्ममरणमपिनैवास्ति।तस्यचिदानंदैकस्वभा
वपरमात्मनोनिरंजनसंज्ञांलभते॥१९॥पुनश्चकिंरूपःसनिरंजनः॥जासुणकोहुणमोहुमउजासुणमायणमाणु।जासुणठाणुणझा १४
णुजियसोजिनिरंजणुजाणु॥२०॥यस्यनविद्यतेकिंकिनविद्यतेक्रोधोमोहोविज्ञानाद्याष्टविधमदभेदोयस्यैवमायामानकषयोय

स्यैवनाभिहृदयललाटादिध्यानस्थानानिचित्तनिरोधलक्षणंध्यानमपियस्यनतमित्थंभूतंस्वशुद्धात्मानंहेजीवनिरंजनंजानीहि
ख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षादिरूपसमस्तविभावपरिणामान्त्यक्त्वास्वशुद्धात्मानुभूतिलक्षणनिर्विकल्पसमा
धौस्थित्वानुभवयेत्यर्थः॥२०॥पुनरपिकिंस्वभावःसनिरंजनः॥अत्थिणपुण्णुणपाउजसुअत्थिणहरिसुविसाउ॥अत्थिण
इक्कुविदोसुजसुसोजिणिरंजणुभाउ॥२१॥यस्यास्तिनकिंनास्तिद्रव्यभावरूपंपुण्यपापंचपुनरपिकिंनास्तिरागरूपोहर्षोद्वेषरू
पोविषादश्चपुनश्चनास्तिक्षुधाद्यष्टादशदोषेषुमध्येचैकोपिदोषःसएवशुद्धात्मानिरंजनइतिहेप्रभाकरभट्टत्वंजानीहिस्वशु
द्धात्मसंवित्तिलक्षणवीतरागनिर्विकल्पसमाधौस्थित्वानुभवेत्यर्थः॥किंच॥एवंभूतसूत्रत्रयव्याख्यानलक्षणोनिरंजनोज्ञात
व्योनचान्यःकोपिनिरंजनोस्तिपरकल्पितःअत्रसूत्रत्रयोपिविशुद्धज्ञानदर्शनस्वभावोयोसौनिरंजनोव्याख्यातःसएवोपादेयइ
तिभावार्थः॥२१॥अथधारणधेययंत्रमंत्रमंडलमुद्रादिकंव्यवहारध्यानविषयमंत्रवादशास्त्रकथितंयत्तन्निर्दोषपरमात्मारा

परमात्म:
१९

धनाध्यानेनिषेधयंति॥छ॥ जासुणधारणुधेउणविजासुणजंतुणमंतु।जासुणमंडलुमुद्दणविसोमुणिदेउअणंतु॥छ॥य
स्यपरमात्मनोनास्तिनविद्यतेकिंकिंकुंभकरेचकपूरकसंज्ञावायुधारणादिकंप्रतिमादिकंध्येयमित्ति॥छ॥पुनरपिकिंकिंतस्यनास्ति
रस्वभाविन्यासरूपस्तंभनमोहनादिविषयंयंत्रस्वरूपंविविधाक्षरोच्चारणरूपंमंत्रस्वरूपंचअपुमंडलवायुमंडलवायुमंडलपृ
थ्वीमंडलादिकंगारुडमुद्राज्ञानमुद्रादिकंचयस्यनास्तितंपरमात्मानंदेवमाराध्यंद्रव्यार्थिकनयेनानंतमविनश्वरमनंतज्ञानादि
गुणस्वभावंचमन्यस्वजानीहि॥अतींद्रियसुखास्वादविपरीतस्यजिह्वेंद्रियविषयस्यनिर्मोहशुद्धात्मस्वभावप्रतिकूलस्यमोहस्य
वीतरागसहजानंदपरमसमरसीभावसुखरसानुभवप्रतिपक्षस्यनवप्रकाराब्रह्मव्रतस्यवीतरागनिर्विकल्पसमाधिघातकस्य
मनोगतसंकल्पविकल्पजालस्यचविजयंकृत्वाहेप्रभाकरभट्टशुद्धात्मानमनुभवेत्यर्थः॥तथाचोक्तं॥अक्खाणरसणीकमाणमो
हणंतहवयाणबंभंचगुत्तीसुयमणगुत्तीचउरोदुक्खेहिंसिज्झंति॥२२॥अथवेदशास्त्रेंद्रियादिपरद्रव्यालंबनाविषयंचवीतराग

Dr. BHAU DAJI
डाक्टर भाऊ दाजी

निर्विकल्पसमाधिविषयंचपरमात्मानंप्रतिपादयंत्ति॥छ॥वेयहिंसत्थहिंइंदियहिंजोजियमुणहुणजाइ।णिम्मलझाणहंजोवि
सउसोपरमप्पुअणाइ।वेदशास्त्रेंद्रियैःकृत्वायोसौमंतुंज्ञातुंनयात्तिपुनश्चकथंभूतोयःमिथ्यात्वाविरत्तिप्रमादकषाययोगाभि
धानपंचप्रत्ययरहितस्यनिर्मलस्यस्वशुद्धात्मसंवित्तिसंजातनित्यानंदैकसुखामृतास्वादपरिणतस्यध्यानस्यविषयःपुनरपि
कथंभूतोअनादिःसपरमात्माभवतीत्तिहेजीवजानीहि॥तथाचोक्तं॥अन्यथावेदपांडित्यंशास्त्रपांडित्यमन्यथाअन्यथापरमं
तत्वंलोकाःक्लिश्यंत्तिचान्यथा।अत्रार्थभूतएवंशुद्धात्मोपादेय।अन्यद्धेयमितिभावार्थः॥२३॥अथयोसौवेदादिविषयोनभवति
परमात्मासमाधिविषयोभवति।पुनरपितस्यैवस्वरूपंव्यक्तिंकरोत्ति॥छ॥ ॥केवलदंसणणाणमउकेवलसुखसहाउ।केवल
वीरिउसोमुणहिजोजिपरावरुभाउ॥छ॥ केवलोऽसहायःज्ञानदर्शनाभ्यांनिर्वृत्तःकेवलदर्शनज्ञानमयःकेवलानंतसुखस्व
भावः।केवलानंतवीर्यस्वभावइति।यस्तमात्मानंमन्यस्वजानीहि।पुनश्चकथंभूतोयएवयःपरापरःपरेभ्योऽर्हत्परमेष्ठिभ्यःपर

परमात्म: उत्कृष्टोमुक्तिगतःशुद्धात्माभावःपदार्थः।सएवसर्व्वप्रकारेणोपादेयइतितात्पर्यार्थः॥२४॥अथत्रिभुवनवंदितइत्यादिलक्षणैर्युक्तो
१६ योसौशुद्धात्माभणितःसलोकाग्रेतिष्ठतीतिकथयति॥७॥एयहिंजुत्तउलखणिहिंजोपरुणिक्कलुदेउ।सोतहिंणिवसइपरमपइ
जोतइलोयहकेउ॥छ॥एतैस्त्रिभुवनवंदितादिलक्षणैः॥ पूर्वोक्तैःयुक्तोयःपुनश्चकथंभूतोयःपरःपरमात्मस्वभावःपुन
२ रपिकिंविशिष्टोनिष्कलःपंचविधशरीररहितः।पुनरपिकिंविशिष्टःदेवस्त्रिभुवनाराध्यःसएवपरमपदेमोक्षेनिवसतियस्तदेकथंभू
तंत्रैलोक्यस्यावसानमिति॥अत्रतदेवमुक्तजीवसदृशंस्वशुद्धात्मस्वरूपमुपादेयमितिभावार्थः॥२५॥एवंत्रिविधात्मकथनप्रथ
ममहाधिकारमध्येमुक्तिगतसिद्धजीवव्याख्यानमुख्यत्वेनचतुर्थस्थलेदोहकसूत्रदशकंगतं।अतऊर्द्ध्वंप्रक्षेपकपंचकमंतर्भूतच १६
तुर्विंशतिसूत्रपर्यंतंयादृशोव्यक्तिरूपःपरमात्मामुक्तौतिष्ठतितादृशः।शुद्धनिश्चयनयेनशक्तिरूपेणदेहेपितिष्ठतीतिकथयति
॥तद्यथा॥जेहउणिम्मलुणाणमउसिद्धिहिंणिवसइदेउ।तेहउणिवसइबंभुपरुदेहहंमंकरिभेउ॥छ॥यादृशःकेवलज्ञानादि

व्यक्तिरूपःकार्यसमयसारःनिर्म्मलोभावकर्म्मद्रव्यकर्मनोकर्म्ममलरहितःज्ञानमयःकेवलज्ञानेननिर्वृत्तःकेवलज्ञानांतर्भू
तानंतगुणपरिणतःसिद्धोमुक्तोमुक्तौनिवसतितिष्ठति।देवःपरमाराध्यःतादृशःपूर्वोक्तलक्षणसदृशनिवसतितिष्ठतिब्रह्म
शुद्धबुद्धैकस्वभावः।परमात्मापरउत्कृष्टः।क्वनिवसतिदेहेकेनशुद्धद्रव्यार्थिकनयेनकथंभूतेनशक्तिरूपेणहेप्रभाकरभट्टभे
दंमाकार्षीस्त्वमिति॥तथाचोक्तं॥श्रीकुंदकुंदाचार्यदेवैःमोक्षप्राभृते॥एमिएहिंजंणमिज्जइकाइएहिंअप्पावरयं॥पुव्वुत्तेहिंप्पु
णिज्जइदेहत्थंकिंपितंमुणहं।अत्रसएवपरमात्मोपादेयइतिभावार्थः॥२६॥अथयेनशुद्धात्मनास्वसंवेदनज्ञानचक्षुषावलो
कितेनपूर्वकृतकर्म्माणिनश्यंतितंकिंनजानासित्वंहेयोगिन्नितिकथयंति॥जिंदिट्ठिंतुट्टंतिलहुकम्मइंपुव्वकियाइं।सोपरुजाणहि
हिजोइयादेहिवसंतुणकाइं॥७॥जेंदिट्ठेंतुट्टंतिलहुकम्मइंपुव्वकियाइं।येनपरमात्मनादृष्टेनसदानंदैकरूपवीतरागनिर्वि
कल्पसमाधिलक्षणनिर्म्मलसलोचनेनावलोकितेनत्रुट्यंतिशतचूर्णानिभवंति।लघुसीघ्रंअंतर्म्मुहूर्त्तेनकानि।परमात्मनः

परमात्म॰ प्रतिबंधकानिस्वसंवेद्याभावोपार्जितानिपूर्व्वकृतकर्म्माणि सोपरुजाणहिंजोइयादेहिवसंतुनकाइ तंनित्यानंदैकस्वभावंस्वा
१७ त्मानंपरमोत्कृष्टंकिंनजानासिहेयोगिन्कथंभूतमपिस्वदेहेवसंतमपीतिअत्रसएवोपादेयइतिभावार्थः॥२७॥अतऊर्द्धंप्रक्षे
पमंचकंकथयंति॥तद्यथा॥जित्थुणइंदियसुहदुहइंजित्थुणमणवावारु सोअप्पामुणिजीवतुहुंअणुपरिअवहारु॥छ॥
जित्थनइंद्रियसुहदुहइंजित्थुणमणवावारुयत्रशुद्धात्मस्वरूपेनसंतिनविद्यंते।कानिअनाकुलत्वलक्षणपरमार्थिकसौख्यवि
परीतान्याकुलोत्पादकानींद्रियसुखदुःखानियत्रचनिर्व्विकल्पपरमात्मनोविलक्षणः संकल्पविकल्परूपोमनोव्यापारोना
स्ति।सोअप्पामुणिजीवतुहुंअणुपरिअवहारु।तंपूर्व्वोक्तलक्षणंस्वशुद्धात्मानंमन्यस्वनित्यानंदैकरूपंवीतरागनिर्व्विकल्पस
माधौस्थित्वाजानीहि।हेजीवत्वंअन्यत्परमात्मस्वभावाद्विपरीतंपंचेंद्रियविषयस्वरूपादिविभावसमूहंपरस्मिन्दूरेसर्वप्र १७
कारेणपहरत्यजेतितात्पर्यार्थः॥निर्व्विकल्पसमाधौसर्वत्रवीतरागविशेषणंकिमर्थंकृतमितिपूर्व्वपक्षः।परिहारमाह।यतएवहे

हेतोवीतरागस्ततएवनिर्व्विकल्पइतिहेतुहेतुमद्भावज्ञापनार्थंअथवायेसरागिणोपिसंतोवयंनिर्व्विकल्पसमाधिस्थाइतिवदंति
तन्निषेधार्थंअथवाश्वेतशंखवत्स्वरूपविशेषणमिदंइतिपरिहारन्त्रयंनिर्द्दोषपरमात्मन्शब्दादिपूर्व्वपक्षेपियोजनीयं॥२८॥अ
थयः परमात्माव्यवहारेणदेहेतिष्ठतिनिश्चयेनस्वस्वरूपेतमाह॥छ॥देहादेहहिजोवसइभेयाभेयणएण।सोअप्पामुणिजीवतु
हुंकिंअणेवहुएण॥छ॥देहादेहयोरधिकरणभूतयोर्योवसतिकेनभेदाभेदनयेनतथाहि।अनुपचरितासद्भूतव्यवहारेणाभेद
नयेनस्वपरमात्मनोभिन्नेस्वदेहेवसतिशुद्धनिश्चयनयेनतुभेदनयेनस्वदेहाद्भिन्नेस्वात्मनिवसतियस्तमात्मानंमन्यस्वजानीहि
हेजीवनित्यानंदैकवीतरागनिर्व्विकल्पसमाधौस्थित्वाभावयेत्यर्थः।किमन्येनशुद्धात्मनोभिन्नेनदेहरागादिनाबहुनाअत्रयोसौदे
हेवसन्नपिनिश्चयेनदेहरूपोनभवतिसएवस्वशुद्धात्मोपादेयइतितात्पर्यार्थः॥२९॥अथजीवाजीवयोरेकत्वमाकार्षीर्द्देलक्षणभेदेन
भेदोस्तीतिनिरूपयंति॥छ॥जीवाजीवमएछुकरिलखणभेएंभेउ।जोपरसोपरुभणमिमुणिअप्पाअप्पुअभेउ॥छ॥हेप्रभाकरभट्ट

जीवाजीवाविवेकोमाकार्षीःकस्माल्लक्षणभेदेनभेदोस्ति॥तद्यथा॥रसादिरहितंशुद्धचैतन्यंजीवलक्षणं॥तथाचोक्तंप्राभृते॥अर
समरूवमगंधंअव्वत्तंचेदणागुणमसद्दं।जाणमलिंगग्गहणंजीवमणिद्दिट्ठसंठाणं॥छ॥इत्थंभूतशुद्धात्मनोभिन्नमजीवलक्ष
णंतच्चद्विविधंजीवसंबंधमजीवसंबंधं।चदेहरागादिरूपंजीवसंबंधंपुद्गलादिपंचद्रव्यरूपमजीवसंबंधमजीवलक्षणंअत्तए
वभिन्नंजीवादजीवलक्षणंततःकारणात्यत्परंरागादिकंतत्परंज्ञानीहिकथंभूतंभेद्यमभेद्यमित्यर्थः।अत्रयोसौशुद्धलक्षणसं
युक्तःशुद्धात्मासएवोपादेयइतिभावार्थः॥३०॥ ॥अथतस्यशुद्धात्मनोज्ञानमयादिलक्षणंविशेषेणकथयन्ति॥छ॥अमणुअणिंदि
उणाणमउमुत्तुविहिंरउविमित्तु।अप्पाइंदियविसउणविलक्खणुएहुणिरुत्तु॥छ॥ परमात्मविपरीतमानसविकल्पजालर
हितत्वादमनस्कः।अतींद्रियशुद्धाविपरीतेनेंद्रियग्रामेणरहितत्वादतींद्रियःलोकालोकप्रकाशककेवलज्ञानेननिर्वृतत्वात्ज्ञानमयः। १८
अमूर्त्तात्मविपरीतलक्षणयास्पर्शरसगंधवर्णवत्यामूर्त्यावर्जितत्वान्मूर्त्तिविरहितः।अन्यद्रव्यासाधारणयाशुद्धचेतनयानिष्पन्नत्वाच्चि

न्मात्रःकोसौआत्मापुनश्चकिंविशिष्टोवीतरागस्वसंवेदनज्ञानेनग्राह्योपींद्रियाणामविषयश्चलक्षणमिदंनिरुत्तुनिश्चितमिति॥अत्रोक्तलक्षण
एवपरमात्मोपादेयइतितात्पर्यार्थः॥३१॥ अथसंसारसरीरभोगनिर्विण्णोभूत्वायःशुद्धात्मानंध्यायतितस्यसंसारवल्लीनस्यतीतिकथय
ति॥भवतणुभोयविरत्तमणुजोअप्पाझाएइ॥तासुगुरुक्कीवेल्लडीसंसारिणितुट्टेइ॥छ॥ भवतणुभोगेषुरंजितंमूर्छितंवासितमाशक्तं
चित्तंस्वसंवित्तिसमुत्पन्नवीतरागपरमानंदसुखरसास्वादेनव्यावर्त्यस्वशुद्धात्मसुखेरतत्वात्संसारशरीरभोगविरक्तमनाःसन्यःशुद्धात्मा
नंध्यायतितस्यगुरुक्कीमहतीसंसारवल्लीतुट्टतिनश्यतिशतचूर्णीभवति॥अत्रयेनपरमात्मध्यानेनसंसारवल्लीविनश्यन्ति।सएवपर
मात्मोपादेयोभावनीयश्चेतितात्पर्यार्थः।इतिचतुर्विंशतिसूत्रमध्येप्रक्षेपपंचकंगतं॥३२॥ तदनंतरंदेहदेवगृहेयोसौवसत्तिसएवशु
द्धनिश्चयेनपरमात्मातन्निरूपयति॥छ॥देहादेवलिजोवसइदेउअणाइअणंतु॥केवलणाणफुरंततणुसोपरमप्पुणिभंतु॥छ॥
व्यवहारेणदेहदेवकुलेवसन्नपिनिश्चयेनदेहाद्भिन्नत्वाद्देहवन्मूर्त्तःसर्वाशुचिमयोनभवतियद्यपिदेहो,नाराध्यस्तथापिस्वयंपरमात्मा

परमात्माराध्योदेवपूज्यः यद्यपिदेहः आद्यंतस्तथापिस्वयंशुद्धद्रव्यार्थिकनयेनानाद्यनंतः यद्यपिदेहोजडस्तथापिस्वयंलोकालो
कप्रकाशकत्वात्केवलज्ञानस्फुरिततनुः केवलज्ञानप्रकाशरूपशरीरइत्यर्थः। सपूर्वोक्तलक्षणयुक्तपरमात्माभवतीतिकथंभूतोनिभ्रां
तोनिःसंदेहइति अत्रयोसौदेहेवसन्नपिसर्वाशुच्यादिदेहधर्म्मैर्नस्पृशतिसएवशुद्धात्मोपादेयइतिभावार्थः॥ ३३॥ अथशुद्धात्मविल
क्षणेदेहेवसन्नपिहंनस्पृशतिदेहेनसोपिनस्पृश्यतइतिप्रतिपादयति॥ ॥ देहवसंतुविणविछिबइणियमिदेहुजिज्ञोजि॥ देहंछिप्प
इजोजिणविमुपरमप्पउसोजि॥ छ॥ देहेवसन्नपिनैवस्पृशतिनियमेनदेहमपियएवदेहेननस्पृश्यतेयोपिमनस्वजानीहि
परमात्मासोपिइतोविशेषस्तद्यथाशुद्धात्मानुभूतिविपरीतेनक्रोधमानमायालोभस्वरूपादिविभावपरिणामेनोपार्ज्जितेनपू
पूर्वकर्म्मणानिर्मित्तेदेहेअनुपचरितासद्भूतव्यवहारेणवसन्नपिनिश्चयेनएवदेहंभैनस्पृशतितथाविधदेहेनस्पृश्यतेयोपितं १९
मन्यस्वजानीहीपरमात्मानंतमेवंकिंकृत्वावीतरागनिर्विकल्पसमाधौस्थित्वेतिअत्रयएवशुद्धात्मानुभूतिरहितदेहेवसन्नपिदेहेम

ममत्वपरिणामेनसहितानांहेयः सएवशुद्धात्मादेहममत्वपरिणामरहितानामुपादेयइतिभावार्थः॥ ३४॥ अथयः समभावस्थि
तानांयोगिनांपरमानंदंजनयन्कोपिशुद्धात्मास्फुरतितमाह॥ छ॥ जोसमभावपरिट्ठियहंजोइहिंकोइफुरेइपरमाणंदुजणंतुफुडु
सोपरमप्पहवेह॥ छ॥ यःकोपिपरमात्माजीवितमरणलाभालाभसुखदुःखशत्रुमित्रादिसमभावपरिणतस्वशुद्धात्मसम्यक्
श्रद्धानज्ञानानुष्ठानरूपाभेदरत्नत्रयात्मकवीतरागनिर्विकल्पसमाधौप्रतिष्ठितानां परमयोगिनांकश्चित्स्फुरतिसंवित्तिमा
यातिकिंकुर्वन्वीतरागपरमानंदंजनयन्॥ स्फुटंनिश्चितं॥ तथाचोक्तं॥ आत्मानुष्ठाननिष्टस्यव्यवहारबहिस्थितेजायतेपरमानं
दःकश्चिद्योगेनयोगिनः। हेप्रभाकरभट्टसएवंभूतः परमात्माभवतीतिअत्रवीतरागनिर्विकल्पसमाधिरतानांसएवोपादे
यःतद्विपरीतानांहेयइतितात्पर्यार्थः॥ ३५॥ अथशुद्धात्मप्रतिपक्षभूतकर्मदेहप्रतिबंधोप्यात्मानिश्चयेनसकलोनभवतीति
ज्ञापयति॥ छ॥ कम्मणिबद्धविजोइयादेहिवसंतुविजोजि॥ होइणसयलुकयाविफुडुमुणिपरअप्पउसोजि॥ छ॥ कर्म्मनिबद्धो

पिहेयोगिन्देहेवसन्नपियएवनभवतिसकल:क्वापिकालेस्फुटंमन्यस्वजानीहिपरमात्मानंतमेवेति अतोविशेष:परमात्मभावना
नाविपक्षभूतै:रागद्वेषमोहै:समुपार्जितै:कर्म्मभिरशुद्धनयेनबद्धोपित्तथैवदेहस्थितोपिनिश्चयनयेनसकलसदेहोनभवतिक्वापि
तमेवपरमात्मानंहेप्रभाकरभट्टमन्यस्वजानीहिवीतरागस्वसंवेदनज्ञानेनभावयेत्यर्थ: अत्रसदैवपरमात्मावीतरागनिर्विक
ल्पसमाधिरतानामुपादेयोभवत्यन्येषांहेयइतिभावार्थ: य:परमार्थेनदेहकर्म्मरहितोपिमूढात्मानांसकलइतिप्रतिभातीत्ये
वंनिरूपयति जोपरमत्थेंनिकलुविकम्मविभिणउजोजि मूढासयलुभणंतिफुडुमुणिपरमप्पउसोजि · य:परमार्थेननि:
कलोपिदेहरहितोपिकर्म्मविभिन्नोयएचभेदाभेदरत्नत्रयभावनारहितंमूढात्मानस्तमात्मानंसकलमितिभणंतिस्फुटंनिश्चितंहेप्र
भाकरभट्टतमेवपरमात्मानंमन्यस्वजानीहियीतरागसदानंदैकसमाधौस्थित्वानुभवेत्यर्थ: अत्रसएवपरमात्माशुद्धात्मसंवित्तिप्र
तिपक्षभूतंमिथ्यात्वरागादिनिवृत्तिकालेसम्यगुपादेयोभवति तदभावेहेयइतितात्पर्यार्थ: अथानंताकाशेएकनक्षत्रमिवयस्य
केवलज्ञानेत्रिभुवनंप्रतिभातिसपरमात्माभवतीतिकथयति गयणिअणंतुजिएक्कुउडुजेहउभुवणविहाइ मुक्कहंजसुपइबिंबि

यउसोपरमप्पुअणाइ ॥छ॥ गगनेअनंतेप्येकनक्षत्रंयथातथाभुवनंजगत्प्रतिभातिकंप्रतिभातिमुक्तस्ययस्यपदेकेवलज्ञानेबिं
बितंप्रतिस्फलितंदर्प्पणेबिंबमिव। सएवंभूत:परमात्माभवतीति॥छ॥अत्रयस्यैवकेवलज्ञानेनक्षत्रमेकमिवलोक:प्रतिभातिस
एवरागादिसमस्तविकल्परहितानामुपादेयोभवतीतिभावार्थ:॥३८॥ ॥अथयोगींद्रवृंदैर्योनिरवधिज्ञानमयोनिर्विकल्पसमा
धिकालेध्येयरूपश्चिंत्यतेतंपरमात्मानमाह॥जोइयविंदहंणाणमउजोझाइज्जइझेउ। मोरकहंकारणिअणवरुउसोपरमप्पउदेउ
॥छ॥ योगींद्रवृंदै:शुद्धात्मवीतरागनिर्विकल्पसमाधिरतै:ज्ञानमय:केवलज्ञानेननिवृत्त:य:कर्म्मतापन्नोध्यायतेचिंत्यतेध्येयो
ध्येयरूपोपिकिमर्थंध्यायतेमोक्षकारणेमोक्षनिमित्तेअनवरतंनिरंतरंसएवपरमात्मादेव:परमाराध्यइतिअत्रयएवपरमात्मा
मुनिवृंदानांध्येयरूपोभणित:सएवशुद्धात्मासंवित्ति:प्रतिपक्षभूतार्त्तरौद्रध्यानरहितानामुपादेयइतिभावार्थ:॥३९॥ अथयोयं
शुद्धबुद्धैकस्वभावोजीवोज्ञानावरणादिकर्म्महेतुंलब्ध्वात्रसस्थावररूपंजगज्जनयतिसएवपरमात्माभवतिनान्य:कोपिजगत्कर्त्ता

ब्रह्मादिरिति प्रतिपादयति ॥७॥ जो जिउ हेउ लहेवि विहि जगु बहुविह उ जणेइ। लिंगत्तयपरिमंडियउ सो परमप्पु हवेइ ॥७॥ यो जीवः कर्ता हेतुं लब्ध्वा किं विधिसंज्ञा ज्ञानावरणादिकर्म पश्चाज्जंगमस्थावररूपं जगज्जनयति। स एव लिंगत्रयमंडितः सन् परमात्मा भण्यते न चान्यः कोपि जगत्कर्ता हरिहरादिरिति ॥ तद्यथा ॥ योसौ पूर्वं बहुधा शुद्धात्मा भणितः स एव शुद्धद्रव्यार्थिकनयेन शुद्धोपि सन् अनादिसंतानावरणादिकर्मबंधप्रच्छादितत्वाद्वीतरागनिर्विकल्पसहजानंदैकसुखास्वादमलभमानो व्यवहारनयेन त्रसो भवति ॥ स्थावरो भवति स्त्रीपुंनपुंसकलिंगो भवति। तेन कारणेन जगत्कर्ता भण्यते नान्यः कोपि परकल्पितपरमात्मेति अत्रायमेव शुद्धात्मा परमात्मोपलब्धिप्रतिपक्षभूतवेदत्रयोदयजनितं रागादिविकल्पजालं निर्विकल्पसमाधिना यदा विनाशयति तदोपादेयभूतमोक्षसुखसाधकत्वात् उपादेय इति भावार्थः ॥४०॥ अथ यस्य परमात्मनः केवलज्ञानप्रकाशमध्ये जगद्वसति जगन्मध्ये सोपि वसति तथापि तद्रूपो न भवतीति कथयंति ॥७॥ जसु अब्भंतरि जगु वसइ जग अब्भंतरि जो जि। जगि जि वसंतु वि जगु जि ण वि मुणि परमप्पउ सो जि ॥

यस्य केवलज्ञानस्याभ्यंतरे जगत् त्रिभुवनं ज्ञेयभूतं वसति। जगतो अभ्यंतरे यः सो ज्ञायको भगवान् अपि च वसति। जगति च सन्नेव रूपविषये चक्षुरिव निश्चयतन्मयो न भवति इति मन्यस्व जानीहि। हे प्रभाकरभट्ट तमित्थंभूतं परमात्मानं वीतरागनिर्विकल्पसमाधौ स्थित्वा भावयेत्यर्थः। अत्र योसौ केवलज्ञानादिव्यक्तिरूपस्य कार्यसमयसारस्य वीतरागस्वसंवेदनज्ञानकाले मुक्तिकारणं भवति ॥ स एवोपादेय इति भावार्थः ॥४१॥ अथ देहे वसन्नपि हरिहरादयोयं परमसमाधेरभावादेव न जानंति स परमात्मा भवतीति कथयंति ॥७॥ देहि वसंतु वि हरिहर वि जं अज्ज वि ण मुणंति। परमसमाहितवेण विणु तं परमप्पु भणंति ॥ परमात्मस्वभावविलक्षणे देहे अनुपचरितासद्भूतव्यवहारेण नयेन वसन्नपि हरिहरादि अपि यमद्यापि न जानंति केन विना वीतरागनिर्विकल्पनित्यानंदैकसुखामृतरसास्वादरूपपरमसमाधितपसा तं परमात्मानं भणंति वीतरागसर्वज्ञा इति। किंच। पूर्वभवे कोपि जीवो भेदाभेदरत्नत्रयाराधनां कृत्वा विशिष्टपुण्यबंधं च कृत्वा पश्चादज्ञानभावेन निदानबंधं करोति तदनंतरं स्वर्गे गत्वा पुनर्मनुष्यो भूत्वा त्रिखंडाधिपतिर्वासुदेवो भ

MEMORIAL · DR. BHAU DAJI

वति। अन्यः कोपिजिनदीक्षांगृहीत्वाप्यत्रैवभवेशिविशिष्टसमाधिबलेनपुन्यबंधंकृत्वापश्चात्पूर्वकृतचारित्रमोहोदयेनविषयासक्तोभूत्वारुद्रो
भवति। कथंतेपरमात्मस्वरूपंनजानंति ॥ इतिपूर्वपक्षः॥ तत्रपरिहारंददाति ॥ युक्तमुक्तंभवतायद्यपिरत्नत्रयाराधनांकृतवंतस्तथापि
यादृशेनवीतरागनिर्विकल्परत्नत्रयस्वरूपेणतद्भवेमोक्षोभवति। तादृशंनजानंतीति। अत्रायमेवशुद्धात्मानंसाक्षादुपादेयभूतंतद्भ
वमोक्षसाधकाराधनासमर्थंचतेहरिहरादयोनजानंतीति। सएवोपादेयोभवतीतिभावार्थः॥ ४२॥ अथोत्पादव्ययाभ्यांपर्यायार्थिक
नयेनसंयुक्तोपियःद्रव्यार्थिकनयेनउत्पादव्ययरहितःसएवपरमात्मानिर्विकल्पसमाधिबलेनजिनवरैर्देहेपिदृष्टइतिनिरूपयति।
भावाभावहिंसंजुवउभावाभावहिंजोजि। देहिजिदिट्ठउजिणवरहिंमुणिपरमप्पउसोजि॥ भावाभावाभ्यांसंयुक्तः पर्यायार्थिकनयेनो
त्पादव्ययाभ्यांपरिणतःद्रव्यार्थिकनयेनभावाभावयोरहितः॥ यएववीतरागनिर्विकल्पसदानंदैकसमाधिनातद्भवमोक्षसाधकाराधना २२
समर्थेनजिनवरैर्देहेपिदृष्टः। तमेवपरमात्मानंमन्यस्वजानीहि। वीतरागपरमसमाधिबलेनानुभवेत्यर्थः॥ अत्रयएवपरमात्माकृष्ण

नीलकापोतलेश्यास्वरूपादिसमस्तविभावरहितेनशुद्धात्मोपलब्धेध्यानेनजिनवरैर्देहेपिदृष्टः। सएवसाक्षादुपादेयइतितात्पर्या
र्थः॥ ४३॥ अथयेनदेहेवसतांपंचेंद्रियग्रामोवसति। गतेनोद्वसोभवतिसएवपरमात्माभवतीतिकथयति॥ छ॥ देहिवसंतेजेण
परइंदियगामुवसेइ। उव्वसहोइगएणफुडुसोपरमप्पुहवेइ॥ छ॥ देहेवसतायेनपरंनियमेनेंद्रियग्रामोवसति। येनात्मनानि
श्चयेनातींद्रियस्वरूपेणापिव्यवहारनयेनशुद्धात्मविपरीतेदेहेवसतास्पर्शनादींद्रियग्रामोवसति। स्वसंवित्त्यभावेस्वकीयविष
येप्रवर्त्ततइत्यर्थः॥ उद्वसोभवति॥ गतेनसएवेंद्रियग्रामोयस्मिन्भवांतरगतेसत्युद्वसोभवति। स्वकीयविषयव्यापाररहितोभवति
स्फुटंनिश्चितंसएवलक्षणश्चिदानंदैकस्वभावपरमात्माभवतीति। अत्रएवातींद्रियसुखास्वादसमाधिरतानांध्यानंमुक्तिकारणंभव
तिसएवसर्वप्रकारोपादेयातींद्रियसुखसाधकत्वादुपादेयइतिभावार्थः॥ ४४॥ अथयःपंचेंद्रियैःपंचविषयान्जानातिसत्वैर्नज्ञायतेस
परमात्माभवतीतिनिरूपयति॥ छ॥ जोणियकरणहिंपंचहिंविपंचविविसयमुणेइ। मुणिउणयंचहिंविसोपरमप्पहवेइ॥ छ॥

परमात्मः जोणियकरणहिंपंचहिविपंचविविसयमुणेइ। इत्यादिव्याख्यानंक्रियतेयोनिजकरणैःपंचभिरपिपंचापिविषयान्मनुतेजानाति॥तद्य
२३ था॥यःकर्ताशुद्धनिश्चयनयेनातींद्रियज्ञानमयोपिसन्ननादिबंधवसात् असद्भूतव्यवहारेणेंद्रियमयशरीरंगृहीत्वास्वयमर्थान्गृही
तुमसमर्थत्वात्पंचेंद्रियैःकृत्वापंचविषयान्जानाति इंद्रियज्ञानेनपरिणमतीत्यर्थः। पुनश्चकथंभूतः। मुणिउणयेन्नहिंपंचहिविसो
परमप्पुहवेइ मतोनज्ञातोनपंचभिरिंद्रियैःपंचभिरपिस्पर्शादिविषयैस्तथाहिवीतरागनिर्विकल्पस्वसंवेदनज्ञानविषयोपि।पं
चेंद्रियैश्चनज्ञातइत्यर्थः। सएवंलक्षणःपरमात्माभवतीति।अत्रयएवपंचेंद्रियविषयसुखास्वादविपरीतेनवीतरागनिर्विकल्पप
रमानंदसमरसीभावसुखरसास्वादपरिणतेनसमाधिनाज्ञायते सएवात्मोपादानसिद्धमित्यादिविशेषेणविशिष्टस्योपादे
यभूतस्यातींद्रियसुखस्यसाधकत्वादुपादेयइतिभावार्थः॥४९॥अथयस्यपरमार्थेनबंधसंसारोनभवतस्तमात्मानंव्यवहारंमु २३
क्त्वाजानीहिइतिकथयति॥५०॥ जसुपरमत्थेंबंधुणविजोइयणविसंसारु। सोपरमप्पउजाणितुहुंमणिमल्लहिववहारु॥५०॥ज

सुपरमत्थेंबंधुणविइत्यादि। जसुपरमत्थेंबंधुणविजोइयणविसंसारु। यस्यपरमार्थेनबंधोनैवहेयोगिन्नपिसंसारः॥तद्यथा॥य
स्यचिदानंदैकस्वभावशुद्धात्मनस्तद्विलक्षणोद्रव्यक्षेत्रकालभवभावरूपःपरमागमप्रसिद्धःपंचप्रकारसंसारोनास्तिइत्थंभूतसं
सारस्यकारणभूतप्रकृतिस्थित्यनुभागप्रदेशभेदभिन्नकेवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपमोक्षपदार्थाद्विलक्षणोबंधोपिना
स्ति। सोपरमप्पउजाणिउतुहुंमणिमिल्लहिववहारु। तमेवंभूतलक्षणंपरमात्मानंमनसिव्यवहारंमुक्त्वाजानीहिवीतरागनिर्विक
ल्पसमाधौस्थित्वाभावयेत्यर्थः॥अत्रयएवशुद्धात्मानुभूतिविलक्षणेनसंसारेणबंधनेनचरहितःसएवानाकुलत्वलक्षणस
र्वप्रकारोपादेयभूतमोक्षसुखसाधकत्वादुपादेयइतितात्पर्यार्थः॥४९॥ अथयस्यपरमात्मनोज्ञानंवल्लीवत्ज्ञेयास्तित्वाभावेन
निवर्ततेनचशक्त्यभावेनेतिकथयति॥५१॥ णेयाभाविंविल्लिजिमथक्कइणाणुबलेवि। मुक्कहंजसुपयबिंबियउपरमसहाउभणे
वि॥५१॥णेयाभाविंविल्लिजिमथक्कइणाणुबलेवि। ज्ञेयाभावेवल्लीयथाज्ञानंतिष्ठतिव्यावृत्त्येतियथामंडपाद्यभावेवल्लीव्यावृत्त्यातिष्ठति।

परमात्म: तथाज्ञेयावलंबनाभावेज्ञानंव्याघुट्यतिष्ठति। नचज्ञातृत्वशक्त्यभावेनेत्यर्थः। कस्यसंबंधिज्ञानंमुक्कहंमुक्तात्मानोज्ञानंचकथंभूतंजस्स
२४ पइंबिंबियउ। यस्यभगवतःपदेपरमात्मस्वरूपेबिंबितंप्रतिस्फलितंतदाकारेणपरिणतंकस्मात्परमसहाउभणेविपरमस्वभावइति
भणित्वामत्वाज्ञात्वेवत्यर्थः॥अत्रयस्येत्थंभूतंज्ञानंसिद्धसुखस्योपादेयस्याविनाभूतंसएवशुद्धात्मोपादेयइतिभावार्थः॥४७॥अथयस्य
कर्म्माणियद्यपिसुखदुःखादिकंजनयंतितथापिसनजनितोनहतइत्यभिप्रायंमनसिधृत्वासूत्रंकथयति॥छ॥कम्मइंजासुजणंत
हिंविणिउणिउकज्जसमावि।किंपिणजणियउहरिउणवि सोपरमप्पउभावि॥छ॥ कर्म्मभिर्यस्यजनयद्भिरपिकिंनिजनिजका
र्येसदापितथापिकिमपिनजनितोहृतश्चनैवंतंपरमात्मानंभावयतयद्यपिव्यवहारनयेनशुद्धात्मस्वरूपप्रतिबंधकानिकर्म्मा
णिसुखदुःखादिकंनिजनिजकार्यंजनयंति।तथापिशुद्धनिश्चयेनअनंतज्ञानादिस्वरूपंनहतंनविनाशितंनचाभिनवंजनितमुत्पा २४
दितंकिमपियस्यात्मनस्तंपरमात्मानंवीतरागनिर्विकल्पसमाधौस्थित्वाभावयेत्यर्थः।अत्रयदेवकर्म्मभिर्नहृतंनचोत्पादितंचिदा

नंदैकस्वरूपंतदेवोपादेयमितितात्पर्यार्थः॥४८॥अथयःकर्म्मनिबद्धोपिकर्म्मरूपोनभवतिकर्म्मापितद्रूपंनसंभवतितंपरमात्मानं
भावयेतिकथयति॥छ॥कम्मनिबद्धुविहोइणविजोफुडुकम्मुकयावि।कम्मुविजोणकयाविफुडुसोपरमप्पउभावि॥छ॥कम्मनिब
द्धुविहोइणविजोफुडुकम्मकयावि॥ कर्मनिबद्धोपिभवतिनैवयःस्फुटंनिश्चितंकिंनभवतिकर्म्मकदाचिदपितथाहियःकर्त्ताशुद्धा
त्मोपलंभाभावेनोपार्जितेनज्ञानावरणादिशुभाशुभकर्म्मणाव्यवहारेणबद्धोपिशुद्धनिश्चयेनकर्मरूपोनभवतिकेवलज्ञाना
द्यनंतगुणस्वरूपंत्यक्त्वाकर्म्मरूपेणनपरिणमतीत्यर्थः।पुनश्चकिंविशिष्टः॥कम्मुविजोनकयाविफुडुकर्म्मापियोनकदाचिदपिस्फु
टंनिश्चितं॥तद्यथा॥ज्ञानावरणादिद्रव्यभावरूपंकर्म्मापिकर्तृभूतंयःपरमात्मानभवतिस्वकीयकर्म्मपुद्गलस्वरूपंविहायपरमात्मा
रूपेणनपरिणमतीत्यर्थः।सोपरमप्पउभावि।तमेवंलक्षणंपरमात्मानंभावयदेहरागादिपरिणतिरूपंबहिरात्मानंमुक्त्वाशु
द्धात्मपरिणतिभावनारूपेंतरात्मनिस्थित्वासर्वप्रकारोपादेयभूतंचिशुद्धज्ञानदर्शनस्वभावपरमात्मानंभावयेतिभावार्थः॥४९॥

एवंत्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्येयथानिर्मलोज्ञानमयोव्यक्तिरूपःशुद्धात्मासिद्धोतिष्ठति। तथाभूतःशुद्धनिश्चये
नशक्तिरूपेणदेहेपितिष्ठतीतिव्याख्यानमुख्यत्वेनपंचमस्थलेचतुर्विंशतिसूत्राणिगतानि। अतऊर्द्ध्वंस्वदेहप्रमाणव्याख्यानमुख्य
त्वेनषट्सूत्राणिकथयंति॥ तद्यथा॥ किविभणंतिजिउसव्वगउजिउजडुकेविभणंति। किविभणंतिजिउदेहसमसुण्णविकेविभणं
ति॥५०॥ केपिभणंतिजीवंसर्वगतं। जीवंकेपिजडंभणंति। केपिभणंतिजीवंदेहसमंशून्यमपिकेपिवदंति॥ तथाहि॥ केचननैया
यिक।मीमांसकाःसर्वगतंजीवंवदंति। सांख्याःपुनर्जडमपिकथयंति। जैनाःपुनर्देहप्रमाणंवदंति॥ बौद्धाश्चशून्यंवदंतीतिएवं
प्रश्नचतुष्टयंकृतमितिभावार्थः॥५०॥ अथवक्ष्यमाणनयविभागेनप्रश्नचतुष्टयस्याप्यभ्युपगतंस्वीकारंकरोति॥५१॥ अप्पा
जोइयसवगउअप्पाजविवियाणिअप्पादेहपमाणुमुणिअप्पासुण्णुवियाणि॥५१॥ आत्माहेयोगिन्सर्वगतोपिभवति। आत्मा २९
नंजडमपिविजानीहि। आत्मानंदेहप्रमाणंमन्यस्वआत्मानंशून्यमपिजानीहि॥ तद्यथा॥ हेप्रभाकरभट्टवक्ष्यमाणविवक्षितनय

विभागेनपरमात्मासर्वगतोभवतिजडोपिभवतिदेहप्रमाणोपिभवतिशून्योपिभवतिनापिदोषइतिभावार्थः॥५१॥ अथकर्म्मरहि
तात्माकेवलज्ञानेनलोकालोकंजानातितेनकारणेनसर्वगतोभवतीतिप्रतिपादयति॥ अप्पाकम्मविवज्जियउकेवलणाणेजेण। लो
यालोउविमुणइजियसव्वगुवुच्चइतेण॥५२॥ आत्माकर्म्मविवर्ज्जितःसन्केवलज्ञानेनकरणभूतेनयेनकारणेनलोकालोकंम
नुतेजानाति। हेजीवसर्व्वगतउच्यतेतेनकारणेनतथाहि। अयमात्माव्यवहारेणकेवलज्ञानेनलोकालोकंजानातिदेहमध्येस्थितोपिनि
श्चयनयेनस्वात्मानंजानाति। तेनकारणेनव्यवहारनयेनज्ञानापेक्षयारूपविषयेदृष्टवत्सर्व्वगतोभवति। नचप्रदेशापेक्षयेति। कश्चि
दाह। यदिव्यवहारेणलोकालोकंजानाति। तर्हिव्यवहारनयेनसर्व्वज्ञत्वंनचनिश्चयनयेनेति॥ परिहारमाह॥ यथास्वकीयमात्मानं
तन्मयत्वेनजानाति। तथापरद्रव्यंतन्मयत्वेननजानाति। तेनकारणेणव्यवहारोभण्यते। नचपरिज्ञानाभावात्। यदिपुनर्निश्चयेनस्व
द्रव्यवत्तन्मयोभूत्वापरद्रव्यंजानाति। तर्हिपरकीयसुखदुःखरागद्वेषपरिज्ञानेसुखीदुःखीरागीद्वेषीचस्यादितिमहद्दूषणंप्राप्नोतीति

अत्रयेनैवज्ञानेनव्यापकोभण्यते तद्देवोपादेयस्यानंतसुखस्याभिन्नत्वादुपादेयमित्यभिप्रायः॥५२॥अथयेनकारणेननिजबोधं
लब्ध्वात्मानंइंद्रियज्ञानंनस्यति। ~~तद्देवोपादेयस्यानंतसुखस्याभिन्नत्वादुपादेयमित्यभिप्रायः~~ तेनकारणेनजडोभवतीत्यभिप्रायंमनसि
धृत्वासूत्रमिदंकथयति। जेणियबोहपरिठियहंजीवहंतुदृइणाणु। इंदियजणियउजोइयातिंजिउजडुविवियाणि॥७॥ येनकारणेन
निजबोधप्रतिष्ठितानांजीवानांत्रुट्यतिविनश्यति। किंकर्तृज्ञानंकथंभूतंइंद्रियजनितंहेयोगिन्तेनकारणेणजीवंजडमपिविजानीहि
॥तद्यथा॥छद्मस्थानांवीतरागनिर्विकल्पसमाधिकालेस्वसंवेदनज्ञानेसत्यपींद्रियजनितंज्ञानंनास्तिकेवलज्ञानिनांपुनःसर्वदैवनास्ति
तेनकारणेनजडत्वमिति। अत्रइंद्रियज्ञानंहेयमतींद्रियज्ञानमुपादेयमितिभावार्थः॥५३॥ अथशरीरनामकर्मकारणरहितोजीवो
नवर्द्धतेनचहीयतेतेनकारणेनमुक्तात्माचरमशरीरप्रमाणोभवतीतिनिरूपयति॥७॥ कारणविरहिउसुद्धजिउवढ्ढइखिरइण २६
जेण। चरमसरीरपमाणुजिउजिणवरबोहइतेण॥७॥ ॥कारणविरहितःशुद्धजीवोवर्द्धतेक्षरतिहीयतेनयेनकारणेनचरमशरीर

प्रमाणंमुक्तजीवंजिनवराभणंतितेनकारणेनेति॥तथाहि॥यद्यपिसंसारवस्थायांहानिवृद्धिकारणभूतशरीरनामकर्मसहितत्वा
द्धीयतेवर्द्धतेचतथापिमुक्तावस्थायांहानिवृद्धिकारणाभावाद्वर्द्धतेहीयतेचनैवशरीरप्रमाणएवतिष्ठतीत्यर्थः॥कश्चिदाह॥मुक्ता
वस्थायांप्रदीपवदावरणाभावेसतिलोकप्रमाणविस्तारेणभाव्यमिति॥अत्रपरिहारमाह॥प्रदीपस्ययोसौप्रकाशविस्तारःसस्वभा
वजएवनत्वपरजनितः‌पश्चाद्भाजनादिनासाद्यावरणेनप्रच्छादितस्तेनकारणेनतस्यावरणाभावेपिप्रकाशविस्तारोघटतेए
वजीवस्यपुनरनादिकर्मप्रच्छादितत्वात्पूर्वस्वभावेनविस्तारोनास्तिकिंरूपसहारविस्तारोशरीरनामकर्मजनितौतेनकार
णेनशुष्कमृत्तिकाभाजनवत्कारणाभावादुपसंहारविस्तारौनभवतश्चरमशरीरप्रमाणेनतिष्ठतीति॥अत्रयएवमुक्तोशु
द्धबुद्धस्वभावःपरमात्मातिष्ठतितत्सदृशोरागादिरहितकालेस्वशुद्धात्मोपादेयइतिभावार्थः॥५४॥अथाष्टकर्माष्टादशदो
षरहितत्वापेक्षयाशून्योभवतीतिनचकेवलज्ञानादिगुणापेक्षयाचेतिदर्शयति॥अठविकम्मइबहुविहइंणवणवदोसविजेण॥

परमात्म: स्फटिकु एकु वि अछिणा विस्फणु विधुक्ष इतेण ॥ अष्टावपि कर्माणि बहुविधानि । नवनवदोषा अपि येन कारणेन शुद्धात्मनां तन्मध्ये
२७ चैकोप्यस्ति नैव सूत्रे पि भण्यते तेन कारणेनैवेति ॥ तद्यथा ॥ शुद्धनिश्चयेन येन ज्ञानावरणाद्यष्टद्रव्यकर्माणि क्षुधादिदोषकारणभू
तानि क्षुधात्वषादिरूपाष्टादशदोषा अपि कार्यभूता: अपि शब्दात्सत्ताचैतन्यबोधादिशुद्धप्राणरूपेण शुद्धजीवत्वे सत्यपि दशप्रा
णरूपमशुद्धजीवत्वं च नास्ति । तेन कारणेन संसारिणां निश्चयनयेन शक्तिरूपेण रागादिविभावशून्यं च भवति ॥ मुक्तात्मनां तु व्य
क्तिरूपेणापि न चात्मानंतज्ञानादिगुणशून्यत्वमेकांतेन बोधादिमतवदिति ॥ तथाचोक्तं ॥ पंचास्तिकाये ॥ छ ॥ जेसिं जीवसहावो
णत्थि अभावो य सव्वहा तस्स ते हुंति भिन्नदेहा सिद्धा वचिगोयरमदीया ॥ अत्र य एव ॥ मिथ्यात्वरागादिभावेन शून्य श्चिदा
नंदैकस्वभावेन भरितावस्थ: प्रतिपादित: परमात्मा स एवोपादेय इति तात्पर्यार्थ: ॥ ६९ ॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधि २७
कारमध्ये य एव ज्ञानापेक्षया व्यवहारनयेन लोकालोकव्यापको भणित: स एव परमात्मा निश्चयनयेनासंख्यातप्रदेशोपि स्वदेह

DR BHAU DAJI

मध्ये तिष्ठतीति व्याख्यानमुख्यत्वेन सूत्रषट्कं गतं । तदनंतरं द्रव्यगुणपर्यायनिरूपणमुख्यत्वेन सूत्रत्रयं कथयतीति ॥ तद्यथा ॥ अ
प्पा जणियउ केण णवि अप्पें जणियउ ण कोइ । दव्वसहावें णिच्चु मुणि पज्जउ विणसइ होइ ॥ छ ॥ आत्मा न जनित: केनापि आत्म
नाकर्तृभूतेन जनितं न किमपि द्रव्यस्वभावेन नित्यमात्मानं मन्यस्व जानीहि पर्यायोपि विनश्यति भवति चेति ॥ तथाहि ॥ संसा
रिजीव: शुद्धात्मसंवित्त्यभावेनोपार्जितेन कर्मणा कर्तृभूतेन यद्यपि व्यवहारेण जन्यते स्वयं च शुद्धात्मसंविच्च्युत: सन् क त्ति
र्माणि जनयति तथापि शुद्धनिश्चयनयेन शक्तिरूपेण कर्मकर्तृभूतेन नरनारकादिपर्यायेण न जन्यते स्वयं च कर्मनोकर्मादिकं
न जनयतीति आत्मा पुनः केवलं निश्चयनयेन व्यवहारेणापि । न च जन्यते न च जनयति तेन कारणेन द्रव्यार्थिकनयेन नित्यो भव
ति पर्यायार्थिकनयेनोत्पद्यते विनश्यति चेति ॥ अत्राह शिष्य: ॥ मुक्तात्मन: कथमुत्पादव्ययाविति । परिहारमाह । आगमप्रसि
द्धागुरुलघुकगुणहानिवृद्ध्यपेक्षया अवायेनोत्पादादिरूपेण ज्ञेयं वस्तु परिणमति । तेन परिच्छित्त्याकारेण ज्ञानपरिणत्यपेक्ष

याश्रथवामुक्तोसंसारपर्यायविनाशःसिद्धपर्यायोत्पादःशुद्धजीवद्रव्यध्रौव्यापेक्षयाचसिद्धानामुत्पादव्ययौज्ञातव्यविति। अत्रतदे
 वसिद्धस्वरूपमुपादेयमितिभावार्थः॥ अथद्रव्यगुणपर्यायस्वरूपप्रतिपादयति॥ छ॥ तंपरियाणहिंदव्वुतुहुंजंगुणपज्जयजुत्तु
। सहभुवजाणहिंताहंगुणकमभुयपज्जवुत्तु॥ छ॥ तंपरियाणहिंदव्वुतुहुंजंगुणपज्जयजुत्तु॥ तत्परिसमंताज्जानीहिद्रव्यंत्वंत
त्किंयद्गुणपर्याययुक्तंगुणपर्यायस्यस्वरूपंकथयति॥ सहभुवजाणहिताहंगुणकमभुयपज्जउवुत्तु॥ सहभुवोजानीहितेषांद्रव्याणां
गुणःक्रमभुवःपर्यायाःउक्ताःभणिताइति। तद्यथा॥ गुणपर्यायवद्द्रव्यंज्ञातव्यं। इदानींतस्यद्रव्यस्यगुणपर्यायाःकथ्यंते। सहभुवोगु
णाःक्रमेणभुवःपर्यायाःइदमेकंतावत्सामान्यलक्षणं॥ अन्वयिनोगुणाः॥ व्यतिरेकिणःपर्यायाइतिद्वितीयंचयथाजीवस्यज्ञाना
दयःपुद्गलस्यवर्णादयश्चेतितेचप्रत्येकंद्विविधास्वभावविभावभेदेनेति॥ तथाहि॥ जीवस्यनावत्कथ्यंतेसिद्धत्वादयः। स्वभावपर्या
याःकेवलज्ञानादयस्वभावगुणाअसाधारणाइति॥ छ॥ अगुरुलघुकाःस्वभावगुणातेषामेवगुणानांषट्हानिवृद्धिरूपस्वभाव

पर्यायाश्चसर्वद्रव्यसाधारणाःतस्यैवजीवस्यमतिज्ञानादिविभावगुणानरनारकादिविभावपर्यायाश्चइति। इदानींपुद्गलस्यक
थ्यंतेकेवलपरमाणुरूपेणावस्थानंस्वभावपर्यायावर्णांतरादिरूपेणपरिणमनंवा। तस्मिन्नेवपरमाणौवर्णादयःस्वभावगुणाद्
व्यणुकादिरूपस्कंधरूपाविभावपर्यायास्तेषेचद्व्यणुकादिस्कंधेषुवर्णादयोविभावगुणाः॥ इतिभावार्थः॥ धर्माधर्माकाश
कालानांस्वभावगुणपर्यायास्तेचयथावसरंकथ्यंते। विभावपर्यायास्तूपचारेणयथाघटाकाशमित्यादि। अत्रशुद्धगुणपर्या
यसहितःशुद्धजीवएवोपादेयइतिभावार्थः॥ ५७॥ अथजीवस्यविशेषणंद्रव्यगुणपर्यायान्कथयति॥ छ॥ अप्पावुझहि
दव्वुतुहुंगुणपुणुदंसणणाणु। पज्जइचउगइभावतणुकम्मविणिम्मियजाणु॥ छ॥ अप्पावुझहिदव्वुतुहुं। आत्मानंद्रव्यंबुध्य
स्वजानीहित्वं। गुणपुणुदंसणणाणु। गुणौपुनर्दर्शनंज्ञानंचपज्जयचउगइभावतणुकम्मविणिम्मियजाणु। तस्यैवजीवस्यप
र्यायाश्चतुर्गतिभावान्परिणामान्। तनुशरीरंचकर्थंभूतान्तान्कर्मविनिर्मितान्जानीहीति। इतोविशेषः। शुद्धनिश्चयेन

परमात्म: श्रुद्धबुद्धैकस्वभावमात्मानंद्रव्यंजानीहितस्यैवात्मनःसविकल्पंज्ञानंनिर्विकल्पंदर्शनंगुणइति।तत्रज्ञानमष्टविधंकेवलज्ञानंसक
२९ लमखंडंशुद्धमिति।तत्रसप्तकमध्येमत्यादिचतुष्टयंसम्यक्ज्ञानंकुमत्यादित्रयंमिथ्याज्ञानंइति।दर्शनचतुष्टयमध्येकेवलद
र्शनंसकलमखंडंशुद्धमितिचक्षुरादित्रयंविकलमशुद्धमिति।किंचगुणास्त्रिविधाभवंति।केचनसाधारणाःकेचनासाधारणाः
केचिनसाधारणासाधारणाइति।जीवस्यैवतावदुच्यंते।अस्तित्वंवस्तुत्वंप्रमेयत्वागुरुलघुत्वादयःसाधारणाःज्ञानसुखादयः।
स्वजातौसाधारणाअपिविजातौपुनरसाधारणाः।अमूर्तत्वंपुद्गलद्रव्यंप्रत्यसाधारणमाकाशादिकंप्रतिसाधारणंप्रदेशत्वं
पुनःकालद्रव्यंप्रतिपुद्गलपरमाणुद्रव्यंचप्रत्यसाधारणंशेषद्रव्यंप्रतिसाधारणमिति।संक्षेपव्याख्यानंएवंशेषद्रव्याणामपि
यथासंभवंज्ञातव्यमितिभावार्थः॥५८॥ एवंत्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्येद्रव्यगुणपर्यायनिरूपणव्याख्यानमु २९
ख्यत्वेनसप्तमस्थलेसूत्रत्रयंगतं॥७॥ अथानंतरंसुखस्योपादेयभूतस्याभिन्नत्वात्शुद्धगुणपर्यायप्रतिपादनमुख्यत्वेनसू

त्राष्टकंकथ्यते॥तत्राष्टकमध्येद्वैप्रथमचतुष्टयंकर्मशक्तिरूपमुख्यत्वेनद्वितीयचतुष्टयंकर्मफलमुख्यत्वेनेति॥तद्यथा॥जीव
कर्मणोरनादिसंबंधंकथयति॥७॥जीवहंकम्मुअणाइजियजणियउंकम्मुणतेण॥कम्मेंजीउविजणिउंणविदोहिविआइ
नजेण॥७॥जीवहंकम्मुअणाइजियजणियउंकम्मुनतेण॥जीवानांकर्मणामनादिसंबंधोभवति।हेजीवजनितंकर्मनतेनजी
वेनकम्मिंजीउविजणिउणविदोहिंविआइनजेण।कर्मणाकर्तृभूतेनजीवोपिजनितोनद्वयोरपादिनयेनकारणेमेतिइतोविशे
षः॥जीवकर्मणामनादिसंबंधः।पर्यायसंतानेनबीजवृक्षवद्व्यवहारनयेनसंबंधस्तिष्टति।तथापिशुद्धनिश्चयेनयेनविशु
द्धज्ञानदर्शनस्वभावेनजीवेननजनितंकर्मतथाविधजीवोपिस्वशुद्धात्मसंवित्यभावोपार्जितेनकर्मणानरनारकादि
रूपेणपर्यायेणनजनितः।कर्मात्मेतिचद्वयोरनादित्वादिति॥अत्रानादिजीवकर्मणोसंबंधव्याख्यानेनसदामुक्तःसदा
शिवःकोप्यस्तीतिनिराकृतमितिभावार्थः॥तथाचोक्तं॥मुक्तश्चेत्प्राग्भवेबद्धोनोबद्धोमोचनंवृथाअबद्धोमोचनंनैवमुंचेर

थोनिरर्थकः अनादितोविमुक्तश्चेत्यस्याबंधः कथंभवेत्तद्बंधनंमोचनंनोचेन्मुंचेरर्थोनिरर्थकः ॥५९॥ अथव्यवहारनयेन
जीवः पुण्यपापरूपोभवतीतिप्रतिपादयति ॥ एहुववहारिंजीवडउहेउलहेविणुकम्मु। बहुविहभावेंपरिणवइतेणजिधम्म
अहम्म ॥६०॥ एहुववहारिंजीवडउहेउलहेविणुकम्मु ॥ एषप्रत्यक्षीभूतोजीवोव्यवहारनयेनहेतुंलब्ध्वाकिंकर्मेतिबहुविहभाविं
परिणवइतेणजिधम्मुअहम्मु ॥ बहुविधभावेनविकल्पज्ञानेनपरिणमतितेनैवकारणेनधर्माधर्मश्चभवति ॥ तद्यथा ॥ एष
जीवः शुद्धनिश्चयेनवीतरागचिदानंदैकस्वभावोपिपश्चाद्व्यवहारेणवीतरागनिर्विकल्पस्वसंवेदनाभावेनोपार्जितंशुभाशुभं
कर्मदेहंतुलब्ध्वापुण्यरूपः पापरूपश्चभवति। अत्रयद्यपिव्यवहारेणपुण्यपापरूपोभवति। तथापिपरमात्मानुभूत्यविनाभूत
वीतरागसम्यग्दर्शनज्ञानचारित्रबहिर्द्रव्येच्छानिरोधलक्षणतपश्चरणरूपातुयानिश्चयचतुर्विधाराधनातस्याभावनाकाले
साक्षादुपादेयभूतवीतरागपरमानंदैकरूपोमोक्षसुखाद्भिन्नत्वात्शुद्धजीवोपादेयइतितात्पर्यार्थः ॥६०॥ अथतानिपुनः

कर्माण्यष्टौभवंतीतिकथयति ॥६१॥ तेपुणुजीवहंजोइयाअठविकम्मवहंति जेहिंजिझंपियजीवणविअप्पसहाउलहंति ॥६१॥
तेपुणुजीवहंजोईयाअठविकम्मवहंति। तानिपुनर्जीवानांहेयोगिन्नष्टावेवकर्माणिभवंति। जेहिंजिझंपियजीवनअप्पसहाए
लहंति। यैरेवकर्मभिर्झंपिताजीवानैवात्मस्वभावंलभंतइति ॥ तद्यथा ॥ ज्ञानावरणादिभेदेनकर्माण्यष्टावेवभवंति। यैर्झंपिता
ःसंतोजीवाः सम्यक्त्वाद्यष्टविधस्वकीयस्वभावंनलभन्ते ॥ तद्यथा ॥ सम्मत्तणाणदंसणवीरियसुहुमंतहेवअवगहणं ॥ अगुरु
लहुअव्वाबाहंहठगुणाहुंतिसिद्धाणं ॥ ॥ शुद्धात्मादिपदार्थविषयेविपरीताभिनिवेशरहितः परिणामः क्षायिकसम्यक्त्वमिति
भण्यते। जगत्त्रयकालत्रयवर्तिपदार्थयुगपद्विशेषपरिछित्तिरूपंकेवलज्ञानंभण्यते ॥ तत्रैवसामान्यपरिछित्तिरूपंकेवल
दर्शनंभण्यते ॥ तत्रैवकेवलज्ञानविषयेअनंतपरिछित्तिशक्तिरूपमनंतवीर्यंभण्यते। अतींद्रियज्ञानविषयंसूक्ष्मत्वंभण्यते। ए
कजीवावगाहप्रदेशेअनंतजीवावगाहानदानसमर्थमवगाहनत्वंभण्यते। एकांतेनगुरुलघुत्वस्याभावरूपेणअगुरुलघु

परमात्मः त्वंभण्यते॥ वेदनीयकर्म्मोदयजनितसमस्तबाधारहितत्वादव्याबाधगुणश्चेति॥ इदंसम्यक्त्वादिगुणाष्टकंसंसारावस्थायांकिमपि
३१ केनापिकर्म्मणाप्रछादितंतिष्टति। यथातथाकथ्यते। सम्यक्त्वंमिथ्यात्वकर्म्मणाप्रछादितंकेवलज्ञानंकेवलज्ञानावरणेनझंपि
तंकेवलदर्शनंकेवलदर्शनावरणेनझंपितंअनंतवीर्यंवीर्यांतरायेणप्रछादितंसूक्ष्मत्वमायुष्ककर्म्मणाप्रछादितंकस्मादितिचे
द्विवक्षितायुःकर्म्मोदयेनभवांतरेप्राप्तेसप्ततींद्रियज्ञानविषयंसूक्ष्मत्वंत्यक्त्वापश्चादिंद्रियज्ञानविषयोभवतीत्यर्थः। अवगाहन
त्वंशरीरनामकर्म्मोदयेनप्रछादितंसिद्धावस्थायोग्यंविशिष्टागुरुलघुत्वंनामकर्म्मोदयेनप्रछादितं। अथवागुरुत्वशब्देनोच्चगोत्र
जनितंमहत्वंभण्यतेलघुत्वशब्देननीचगोत्रजनितंतुछत्वमिति। तदुभयकरणभूतेनगोत्रकर्म्मोदयेनविशिष्टागुरुलघुत्वंप्रछा
द्यतइति। अव्याबाधगुणत्वंवेदनीकर्म्मोदयेनेति। संक्षेपेणअष्टगुणानांकर्म्माभिराछादनंज्ञातव्यमिति। तदेवगुणाष्टकंमुक्ता ३१
वस्थायांस्वकीयस्वकीयकर्म्मप्रछादनाभावेव्यक्तंभवतीति॥ संक्षेपेणाष्टगुणाः कथिताविशेषेणपुनरमूर्त्तत्वनिर्न्नामगोत्रादयः॥

साधारणासाधारणरूपअनंतगुणायथासंभवमागमाविरोधेनज्ञातव्याइति॥ अत्रसम्यक्त्वादिशुद्धगुणस्वरूपशुद्धात्मैवोपा
देयइतिभावार्थः॥६३॥ अथविषयकषायासक्तानांजीवानांयेकर्म्मपरमाणवःसंबंधाभवंतितत्कर्म्मेतिकथयन्ति॥ ७॥ विसय
कसायहिंरंजियहंजेअणुयालग्गंति॥ जीवपएसहमोहियहंतेजिणकम्मभणंति॥ ७॥ विसयकसायहिरंगियहंजेअणुयाल
ग्गंति। विषयकषायैरंगितानांरक्तानांयेपरमाणवोलग्नाभवंति। जीवपएसहिंमोहियहिंतेजिणकम्मभणंति॥ केषुलग्नाभवं
तिजीवप्रदेशेषुकेषांमोहितानांजीवानांतान्कर्म्मस्कंधान्जिनाःकर्म्मेतिकथयंति॥ तथाहि॥ शुद्धात्मानुभूतिविलक्षणैर्विषयकषा
येरक्तानांस्वसंवित्यभावोपार्जितमोहकर्म्मोदयपरिणतानांचजीवानांकर्म्मवर्गणायोग्यस्कंधास्तैलम्रक्षितानांमलपर्यायवदष्टविधज्ञा
नावरणादिकर्म्मरूपेणपरिणामतीत्यर्थः। अत्रयएवविषयकषायकालेकर्म्मोपार्ज्जनंकरोतिसएवपरमात्मावीतरागनिर्विकल्पसमा
धिकालेसाक्षादुपादेयोभवतीतितात्पर्यार्थः॥६१॥ इतिकर्म्मस्वरूपकथनमुख्यत्वेनसूत्रचतुष्टयंगतं॥ अथापींद्रियचित्तस

परमात्म: मस्तविभावचतुर्गतिसंतापा:शुद्धनिश्चयेनकर्म्मजनिताइत्यभिप्रायंमनसिधृत्वासूत्रंकथयंति॥छ॥ पंचविइंदियअण्णुमणुअणु
३२ विसयलुविभाव॥जीवहंकम्मइंजणियजियजियअण्णुविचउगइताव॥छ॥ पंचविइंदियअण्णुमणुअण्णुविसयलुविभाव।पंचेंद्रि
याणिअन्यन्मन:अन्यदपिपुनरपिसमस्तविभावा:॥जीवहंकम्मइंजणियजियअण्णुजिचउगइताव॥एतेजीवानांकर्म्मणाजनिताहे
जीवनकेवलमेतेअन्यदपिपुनरपिचतुर्गतिसंतापास्तेपिकर्म्मजनिताइति॥तद्यथा॥अतींद्रियान्शुद्धात्मनोयानिविपरीतानिपं
चेंद्रियाणिशुभाशुभसंकल्पविकल्परहितात्मनोयद्विपरीतमनेकसंकल्पविकल्पजालरूपंमन:येचशुद्धात्मतत्वानुभूतेर्भिन्नलक्ष
णा:समस्तविभावपर्याया:वीतरागपरमानंदसुखामृतप्रतिकूला:समस्तचतुर्गतिसंतापा:दु:खदाहाश्चेति।सर्वेप्येतेअशुद्धनि
न श्चयेनस्वसंवेद्याभावोपार्जितेनकर्म्मणानिर्मिताजीवानामिति।अत्रपरमात्मद्रव्यात्प्रतिकूलंयत्पंचेंद्रियादिसमस्तविकल्पजालंत ३२
द्धेयंतद्विपरीतंस्वशुद्धात्मतत्वंपंचेंद्रियविषयाभिलाषादिसमस्तविकल्परहितंपरमसमाधिकालेसाक्षादुपादेयमितिभावा

र्थ:॥६३॥अथसंसारिकसमस्तसुखदुखान्शुद्धनिश्चयनयेनजीवानांकर्म्मजनयतीतिनिरूपयति॥छ॥ दुखुविसुखु
विबहुविहउजीवहंकम्मुजणेइ॥अप्पादेखइमुणइंपरणिच्छउएउभणेइ॥छ॥दुखविसुखुविबहुविहउजीवहंकम्मुजणो
इ॥दु:खमपिसुखमपिकथंभूतंबहुविधंजीवानांकर्म्मजनयति अप्पादेखइमुणइंपरणिच्छउएउभणेइ॥आत्मापुन:पश्यति॥
जानातिपरंनियमेननिश्चयनयएवंब्रुवतइति॥ तथाहि॥नाकुलत्वलक्षणपरमार्थिकवीतरागसौख्यात्प्रतिकूलंसंसारिकसुख
दु:खं।यद्यप्यशुद्धनिश्चयनयेनजीवजनिततथापिशुद्धनिश्चयनयेनकर्म्मजनितंभवति।आत्मापुनर्वीतरागनिर्विकल्पसमाधिस्थ:
सन्वस्तुवस्तुस्वरूपेणपश्यति॥ जानाति॥चनचरागादिकंकरोतीति॥अत्रपरमार्थिकसुखाद्विपरीतंसंसारिकसुखदुखवि
कल्पजालंहेयमितितात्पर्यार्थ:॥६४ अथाननिश्चयेनबंधमोक्षौकर्म्मकरोतीतिप्रतिपादयति॥छ॥ बंधुविमोखुविसयलुजियजीव
हंकम्मुजणेइ॥अप्पाकिंपिविकुपाइणविणिच्छउएउभणेइ॥छ॥ बंधुविमोखुविसयलुजियजीवहंकम्मुजणेइ॥बंधमपिमो

परमात्मः
३२

क्षमपिसमस्तंहेजीवजीवानांकर्म्मकर्तृजनयति॥अप्पाकिंपिविकुणइंणविणिछ्उएउभणेइ॥आत्माकिंमपिनकरोति॥बंधमोक्ष
स्वरूपंनिश्चयएवंभणतीति॥ तद्यथा॥अनुपचरितासद्भूतव्यवहारेणद्रव्यबंधंतथैवाशुद्धनिश्चयेनभावबंधंनयद्येनद्रव्य
भावमोक्षमपियद्यपिजीवःकरोतितथापिशुद्धपरिणामिकपरमभावग्राहकेनशुद्धनिश्चयनयेननकरोत्येवंभणतिकोसौनिश्च
यनयेननकरोत्येवंभणतिकोसौनिश्चयइति॥अत्रयएवशुद्धनिश्चयेनबंधमोक्षौनकरोति॥सएवशुद्धात्मोपादेयइतिभावार्थः
॥६८॥अथरुछलसंख्याबाह्यंप्रक्षेपकंकथयति॥ ॥सोणछिन्निपएसौचउरासीजोणिलरकमझमि॥जिणवयणंणलहंतोज
थ्रणडुल्लुडुहिउजीवो॥ ॥सोणछिन्निपएसोसप्रदेशोनास्त्यत्रजगतिसकिंचउरासीजोणिलरकमझमि॥जिणवयणंणल
हंतोजच्छणडुल्लुडुहिउर्जीवे॥ चतुराशीतियोनिलक्षेषुमद्धेभूत्वाजिनवचनमलभमानोयत्रनभ्रमितोजीवइति॥तथाहि॥भेदा ३३
भेदरत्नत्रयप्रतिपादकंजिनवचनमलभमानःसन्नयंजीवोअनादिकालेयत्रचतुराशीतियोनिलक्षेषुमध्येभूत्वानभ्रमितःसो

डाक्टर भाऊ दाजी इस्लाह
Dr. BHAU DAJI
MEMORIAL

त्रजगतिकोपिप्रदेशोनास्तिइतिअत्रयदेवभेदाभेदरत्नत्रप्रतिपादकंजिनवचनमलभमानोभ्रमितोमितोजीवस्तदेवोपादे
यात्मस्वरूपप्रतिपादकत्वादुपादेयमितितात्पर्यार्थः॥६९॥अथात्मापंगुवत्स्वयंनयातिनचैतिकर्म्मैवनयत्यानयतिचेतिकथय
ति॥ ॥ अप्पापंगुकुअणुहरइअप्पुणजाइणएइ॥भुवणत्तयहंविमझिजियविहिआणइविहिणेइ॥अप्पापंगुकुअणुहर
इअप्पुणजाइणएइ॥आत्मापंगोरनुहरतिसदृशोभवति॥स्वयमात्मानयातिनचागछतिकभुवणत्तयहंविमझिजियविहि
अणइंविहिणेइ॥भुवनत्रयस्यापिमध्येहेजीवविधिरानयतिविधिर्नयतीति॥तद्यथा॥अयमात्माशुद्धनिश्चयेनानंतवीर्यत्वा
त्शुभाशुभकर्म्मरूपनिगलद्वयरहितोपिव्यवहारेणअनादिसंसारेस्वशुद्धात्मभावनाप्रतिबंधकेनमनोवचनकायत्रये
णोपार्जितेनकर्म्मणानिर्मितेनपुण्यपापनिमलद्वयेनदृढतरंबद्धःसन्पंगुबद्धत्वास्वयंनयातिनचागछतिसएवात्मापरमात्मोपलं
लंभप्रतिपक्षभूतेनविधिशब्दवाच्यनकर्म्मणाभुवनत्रयेनीयतेतथैवानीयतेचेति अत्रवीतरागसदानंदैकरूपात्सर्वप्रकारोपादेय

भूतात्परमात्मनोयद्भिन्नंशुभाशुभकर्मद्वयंतद्धेयमितिभावार्थः॥६७॥इतिकर्मशक्तिस्वरूपकथनमुख्यत्वेनप्रथमस्थलेसूत्राष्टकं
गतं॥अतऊर्ध्वंभेदाभेदभावनामुख्यतयापृथक्पृथक्स्वतंत्रसूत्रनवकंकथयति॥६८॥ अप्पाअप्पुजिपरुजिपरुअप्पापरुजिणहो
इ॥ परुजिकयाइविअप्पुणविणियमिपभणहिजोइ॥६८॥ अप्पाअप्पुजिपरुजिजिपरुअप्पापरुजिणहोइ॥आत्मात्मैवपरएवपरःआ
त्मापरएवनभवति॥परुजिकयाइविअप्पुणविणियमेंपभणहिंजोइ॥परएवकदाचिदप्यात्मानैवभवति॥नियमेननिश्चयेनभणंति
कथयंतिकेकथयंतिपरमयोगिनइति॥तथाहि॥शुद्धात्माकेवलज्ञानादिस्वभावःशुद्धात्मैवपरःकामक्रोधादिस्वभावःपरएव॥पूर्वो
क्तःपरमात्माभिधानंतदेकस्वस्वभावंत्यक्त्वाकामक्रोधादिरूपोनभवति॥कामक्रोधादिरूपःपरःक्वापिकालेशुद्धात्मानभवतीतिपरमयो
गिनःकथयंति॥अत्रमोक्षसुखादुपादेयभूतादभिन्नःकामक्रोधादिभ्योभिन्नोयःशुद्धात्मासएवोपादेयइतितात्पर्यार्थः॥६९॥अथा॥ ३४
शुद्धनिश्चयेनोत्पत्तिर्मरणबंधमोक्षौचनकरोत्यात्मेतिप्रतिपादयति॥७०॥णविउप्पज्जइणविमरइबंधुणमोक्खुकरेइ॥जिउ

परमत्थेंजोइयाजिणवरुएउभणेइ॥७०॥नाप्युत्पद्यतेनापिम्रियतेबंधंमोक्षंचनकरोति॥कोसौकर्त्ताजीवः॥केनपरमार्थेनहेयोगिन्जि
नवराएवंब्रूतेकथयति॥तथाहि॥यद्यप्यात्माशुद्धात्मानुभूत्यभावेसतिशुभाशुभोपयोगाभ्यांपरिणम्यजीवितमरणशुभाशुभबंधा
न्करोति॥शुद्धात्मानुभूतिसद्भावेतुशुद्धोपयोगेनपरिणम्यमोक्षंचकरोति॥तथापि॥शुद्धपारिणामिकपरमभावग्राहकेणशुद्धद्रव्या
र्थिकनयेननकरोति॥अत्राहशिष्यः॥यदिशुद्धद्रव्यार्थिकलक्षणेनशुद्धनिश्चयेनमोक्षंनकरोतितर्हिशुद्धनयेनमोक्षोनास्तीति॥तद
नुष्ठानंयथा॥परिहारमाह॥मोक्षोहिबंधपूर्वकःसचबंधःशुद्धनिश्चयेननास्तितेनकारणेनबंधप्रतिपक्षभूतोमोक्षःसोपिशुद्ध
निश्चयेननास्तियदिपुनःशुद्धनिश्चयेनबंधोभवति॥तदासर्वदैवबंधएवअस्मिन्नर्थेदृष्टांतमाह॥एकःकोपिपुरुषःशृंखलाबद्धस्ति
ष्ठतिद्वितीयस्तुबंधनरहितस्तिष्ठतियस्यबंधभावःसपश्चान्मुक्तस्तस्यमुक्तइतिव्यवहारोघटतेद्वितीयंप्रतिमोक्षोजातोभवतइतियदि
भण्यतेतदाकोपंकरोति॥कस्माद्बंधाभावेमोक्षवचनंकथंघटतइतितथाजीवस्यापिशुद्धनिश्चयेनबंधाभावेमुक्तवचनंनघटतइति

परमात्म:
३४ भूतात्परमात्मनोयद्भिन्नंशुभाशुभकर्मद्वयंतद्धेयमितिभावार्थः॥६७॥इतिकर्मशक्तिस्वरूपकथनमुख्यत्वेनअष्टमस्थलेसूत्राष्टकं
गतं॥अतऊर्ध्वंभेदाभेदभावनामुख्यतयापृथक्पृथक्स्वतंत्रसूत्रनवकंकथयति॥६८॥अप्पाअप्पुजिपरुजिपरुअप्पापरुजिणहो
इ॥ परुजिकयाइविअप्पुणविणियमिपभणहिजोइ॥६८॥अप्पाअप्पुजिपरुजिजिपरुअप्पापरुजिणहोइ॥आत्मात्मैवपरएवपरःआ
त्मापरएवनभवति॥परुजिकयाइविअप्पुणविणियमेंपभणहिंजोइ॥परएवकदाचिदपिआत्मानैवभवति।नियमेननिश्चयेनभणंति
कथयंतिकेकथयंतिपरमयोगिनइति॥तथाहि॥शुद्धात्माकेवलज्ञानादिस्वभावःशुद्धात्मैवपरःकामक्रोधादिस्वभावःपरएव॥पूर्वो
क्तःपरमात्माभिधानंतदेकस्वस्वभावंत्यक्त्वाकामक्रोधादिरूपेणनभवति।कामक्रोधादिरूपःपरःक्वापिकालेशुद्धात्मानभवतीतिपरमयो
गिनःकथयंति॥अत्रमोक्षसुखादुपादेयभूतात्भिन्नःकामक्रोधादिभ्योभिन्नोयःशुद्धात्मासएवोपादेयइतितात्पर्यार्थः॥६८॥अथा॥ ३४
शुद्धनिश्चयेनोत्पत्तिर्मरणबंधमोक्षौचनकरोत्यात्मेतिप्रतिपादयति॥६९॥णविउप्पज्जइणविमरइबंधुणमोक्खुकरेइ॥जिउ

परमत्थेंजोइयाजिणवरुएउभणेइ॥६९॥नाप्युत्पद्यतेनापिम्रियतेबंधंमोक्षंचनकरोति।कोसौकर्ताजीवः।केनपरमार्थेनहेयोगिन्जि
नवरएवंब्रूतेकथयति॥तथाहि॥यद्यप्यात्माशुद्धात्मानुभूत्यभावेसतिशुभाशुभोपयोगाभ्यांपरिणम्यजीवितमरणशुभाशुभबंधा
न्करोति।शुद्धात्मानुभूतिसद्भावेतुशुद्धोपयोगेनपरिणम्यमोक्षंचकरोति॥तथापि॥शुद्धपारिणामिकपरमभावग्राहकेणशुद्धद्रव्या
र्थिकनयेननकरोति॥अत्राहशिष्यः॥यदिशुद्धद्रव्यार्थिकलक्षणेनशुद्धनिश्चयेनमोक्षंनकरोतितर्हिशुद्धनयेनमोक्षोनास्तीति॥तद
नुष्ठानंवृथा॥परिहारमाह।मोक्षोहिबंधपूर्वकःसचबंधःशुद्धनिश्चयेननास्तितेनकारणेनबंधप्रतिपक्षभूतोमोक्षःसोपिशुद्ध
निश्चयेननास्तियदिपुनःशुद्धनिश्चयेनबंधोभवति।तदासर्वदैवबंधएवअस्मिन्नर्थेदृष्टांतमाह।एकःकोपिपुरुषःशृंखलाबद्धस्ति
ष्ठतिद्वितीयस्तुबंधनरहितस्तिष्ठतियस्यबंधभावःसपश्चान्मुक्तस्तस्यमुक्तइतिव्यवहारोघटतेद्वितीयंप्रतिमोक्षोजातोभवतइतियदि
भण्यतेतदाकोपंकरोति।कस्माद्बंधाभावेमोक्षवचनंकथंघटतइतितथाजीवस्यापिशुद्धनिश्चयेनबंधाभावेमुक्तवचनंनघटतइति

अत्रवीतरागनिर्विकल्पसमाधिरतोमुक्तजीवनसदृश:स्वशुद्धात्मोपादेयइतिभावार्थ:॥६९॥अथनिश्चयनयेनजीवस्योद्भवजरामरण
रोगलिंगवर्णसंज्ञानास्तीतिकथयंति॥ अछिणउभउजरमरणुरोयविलिंगविवण।णियमिंअप्पुवियाणितुहुंजीवहंएकुविसण॥७॥
अत्रिणाउभउजरमरणुरोयविलिंगविवण॥अस्तिननविद्यतेकिंकिंनास्ति।उभउउत्पत्ति:जरामरणरोगाअपिलिंगान्यपिवर्ण्या:।नि
यमिंअप्पुवियाणितुहुंजीवहंएकुविसण।नियमेननिश्चयेनहेआत्मन्हेजीवविजानीहित्वंकस्यनास्तिजीवस्यनकेवलमेतन्नास्ति
संज्ञापिनास्तीतिअत्रसंज्ञाशब्देनाहारादिसंज्ञानामसंज्ञावाग्राह्या॥तथाहि॥वीतरागनिर्विकल्पसमाधेर्विपरीतै:क्रोधमानमाया
लोभप्रभृतिविभावपरिणामैर्यान्युपार्जितानिकर्म्माणितदुदयजनितान्युद्भवादीनिशुद्धनिश्चयेननसंतिजीवस्यतानिकस्मान्नसंति
केवलज्ञानाद्यनंतगुणै:कृत्वानिश्चयेनानादिसंतानागतोद्भवादिभ्योभिन्नत्वादिति।अत्रउपादेयरूपानंतसुखवाचिनाभूतशुद्धजी ३९
वात्सकाशाद्यानिभिन्नान्युद्भवादीनितानिहेयानीतितात्पर्यार्थ:॥७०॥यद्युद्भवादीनिस्वरूपाणिशुद्धनिश्चयेनजीवस्यनसंति

तर्हिकस्यसंतीतिप्रश्नेदेहस्यसंभवंतीतिप्रतिपादयति।देहहंउभउजरमरणुदेहहंवण्णुविचित्तु।देहहंरोयवियाणितुहुंदेहहंलिंगुविचि
त्तु॥७॥देहस्यभवतिकिंकिंउभउउत्पत्ति:जरामरणंचवर्णोविचित्र:।वर्णशब्देनात्रपूर्वसूत्रेचश्वेतादिब्राम्हणादिवाग्रह्यते।तस्यैवदे
हस्यरोगान्विजानीहीति।लिंगमपिलिंगशब्देनात्रपूर्वसूत्रेचस्त्रीनपुंसकलिंगंयतिलिंगंवाग्राह्यंचित्तंमनश्चेति॥तद्यथा॥शुद्धा
त्मसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयभावनाप्रतिकूलैरागद्वेषमोहैर्यान्युपार्जितानिकर्म्माणितदुदयसंपन्ना:॥जन्म
मरणादिधर्म्माद्यपिव्यवहारनयेनजीवस्यसंतितथापिनिश्चयनयेनदेहस्येतिज्ञातव्यं।अत्रदेहादिममत्वरूपविकल्पजालंत्यक्त्वा
यदावीतरागसदानंदैकरूपेणसर्वप्रकारोपादेयभूतेनपरिणमतितदास्वशुद्धात्मैवोपादेयइतिभावार्थ:॥७१॥अथदेहस्य
जरामरणंदृष्ट्वामाभयंजीवकार्षीरितिनिरूपयति॥७॥देहहंपिक्खिविजरमरणुमाभउजीवकरेहि॥जोअजरामरुबंभुपरुसो
अप्पाणुमुणेहि॥७॥देहहंसंबंधिदृष्ट्वाकिंजरामरणंमाभयंकार्षीहेजीवअयमर्थोयद्यपिव्यवहारेणजीवस्यजरामरणंतथापि

परमात्म॰ शुद्धनिश्चयेनदेहस्यनत्वजीवस्येतिमत्वाभयंकोमोर्षीः तर्हिकिंकुरुजोअजरामरुबंभुपरुसोअप्पाणुमुणेहि। यःकश्चिदजरामरोजरा
३९ मरणारहितब्रह्मशब्दवाच्यः। शुद्धात्माकथंभूतःपरःसर्वोत्कृष्टस्तमित्थंभूतंपरब्रह्मस्वभावमात्मानंजानीहि अत्रपंचेंद्रियविषयप्रभृ
तिसमस्तविकल्पजालंमुक्त्वापरमसमाधौस्थित्वातमेवभावयेतिभावार्थ॥७२॥अथदेहेछिद्यमानेपिभिद्यमानेपिशुद्धात्मानंभाव
येत्यभिप्रायंमनसिधृत्वासूत्रंप्रतिपादयति॥७॥छिज्जनउभिज्जनउजाउखउजोइयएकुसरीरु॥अप्पाभावहिणिम्मलउजिंपावहि
भवतीरु॥७॥छिज्जउभिज्जउजाउखउजोयइएकुसरीरु॥छिद्यतांवाद्विधाभवतुभिद्यतांवाछिद्रीभवतुक्षयंवायातुहेयोगिन्इदंश
रीरंतथापित्वंकिंकुरु।अप्पाभावहिणिंमलउ।आत्मानंवीतरागचिदानंदैकस्वभावंभावयकिंविशिष्टंनिर्म्मलंभावकर्म्मद्रव्यकर्म्म
नोकर्म्मरहितंयेनकिंभवति।जिंपावहिभवतीरु।येनपरमात्मध्यानेनप्राप्नोसित्वंलभसेत्वंहेजीवकिंभवतीरंसंसारसागरावसा ३९
नमितिअत्रयोसौदेहस्यछेदनादिव्यापारेपिरागद्वेषादिक्षोभमकुर्वन्सन्शुद्धात्मानंभावयतीतिसेपादनाद्वामोक्षंसंगच्छ

तीभावार्थः॥७३॥अथकर्म्मकृतभावानचेतनंद्रव्यंचनिश्चयनयेनजीवाद्भिन्नंजानीहीतिकथयति॥७॥कम्महंकेराभावडाअणुअचे
यणुदव्वु॥जीवसहावहंभिणुजियणियमिंबुज्झहिसव्वु॥७॥कम्महंकेराभावडाअणुअचेयणुदव्वु।कर्म्मसंबंधिनोरागादिभावा
नन्यंवाचेतनंदेहादिद्रव्यंएतत्पूर्वोक्तं॥अप्पसहावहंभिणुजिय।विशुद्धज्ञानदर्शनस्वरूपादात्मस्वभावान्निश्चयेनभिन्नंपृथ
गभूतंहेजीव।नियमिंबुज्झहिसव्वु।नियमेननिश्चयेनबुध्यस्वजानीहिसर्व्वंसमस्तमिति।अत्रमिथ्यात्वाविरतिप्रमादकषाययो
गनिवृत्तिपरिणामकालेशुद्धात्मोपादेयइतितात्पर्यार्थः॥७४॥अथज्ञानमयपरमात्मनःसकाशादन्यत्परद्रव्यंमुक्त्वाशुद्धात्मानं
भावयेतिनिरूपयति॥७॥अप्पामिल्हिविणाणमउअणुपरायउभाउ॥सोछंडेविणुजीवतुहुंभावहिअप्पसहाउ॥७॥अप्पा
मिल्हिविणाणमउअणुपरायउभाउ।आत्मानंमुक्त्वात्यक्त्वाकिंविशिष्टंज्ञानमयंकेवलज्ञानांतर्भूतानंतगुणराशिनिश्चयात्।अन्यो
भिन्नोभ्यंतरेमिथ्यात्वरागादिबहिर्विषयेदेहादिपरभाव।सोछंडेविणुजीवतुहुंभावहिअप्पसहाउ।तंपूर्वोक्तंशुद्धात्मनोविलक्षं

परमात्मः णंपरभावंछंडुयित्वात्यक्त्वाहेजीवत्वंभावयकंस्वशुद्धात्मस्वभावंकिंविशिष्टंकेवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपकार्यसमयसारसाध
३७ कमभेदरत्नत्रयात्मककारणसमयसारपरिणतमिति।अत्रतमेवोपादेयंजानीहीत्यभिप्रायः॥७८॥अथनिश्चयेनाष्टकर्म
सर्वदोषरहितंसम्यग्दर्शनज्ञानचारित्रसहितमात्मानंजानीहीतिकथयति॥७९॥अठहंकम्महंबाहिरउसयलहंदोसहंचत्तु दंस
णणाणचरित्तमउअप्पाभाविणिरुत्तु॥७९॥अठहंकम्महंबाहिरउसयलहदोसहंचत्तु।अष्टकर्मभ्योबाह्यंशुद्धनिश्चयेनज्ञाना
वरणाद्यष्टकर्मभ्योभिन्नंमिथ्यात्वरागादिभावकर्मरूपसर्वदोषैस्त्यक्तंपुनश्चकिंविशिष्टं।दंसणणाणचरित्तमउ।दर्शनज्ञानचारित्र
मयंशुद्धोपयोगाविनाभूतैःस्वशुद्धात्मसम्यग्दर्शनज्ञानचारित्रैर्निर्वृत्तंअप्पाभाविणिरुत्तु।तमित्थंभूतमात्मानंभावयदृष्टश्रु
तानुभूतभोगाकांक्षारूपनिदानबंधादिसमस्तविभावपरिणामान्त्यक्त्वाभावयेत्यर्थः।निरुत्तुनिश्चितंअत्रनिर्वाणसुखादुपा ३७
देयभूतादभिन्नःसमस्तभावकर्मद्रव्यकर्मभ्योभिन्नोयोसौशुद्धात्मासएवाभेदरत्नत्रयपरिणतानांभव्यानामुपादेयइतिभावार्थः॥७९॥

एवंत्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्येपृथकपृथक्स्वतंत्रभेदभावनारूपेणनवमस्थलेसूत्रनवकंगतं।तदनंतरंनिश्चय
सम्यग्दृष्टिमुख्यत्वेनस्वतंत्रसूत्रमेकंकथयति॥८०॥अप्पिंअप्पुमुणंतुजिउसमादिठिहवेइ।सम्माइठिउजीवडुलहुकम्मइंमुच्चेइ
॥८०॥अप्पिंअप्पुमुणंतुजिउ।सम्माइठिहवेइ।आत्मनात्मानंजानन्सन्जीवोवीतरागस्वसंवेदनज्ञानपरिणतेनांतरात्मनास्वशु
द्धात्मानंजानन्ननुभवन्सन्जीवःकर्त्तावीतरागसम्यग्दृष्टिर्भवतिनिश्चयसम्यक्त्वभावनायाफलंकथ्यते॥८०॥सम्माइठिउजीवड
उलहुकम्मइमुच्चेइ।सम्यग्दृष्टिर्जीवोलघुशीघ्रंज्ञानावरणादिकर्मणामुच्यतइति।अत्रयेनैवकारणेनवीतरागसम्यग्दृष्टिःकि
लकर्मणाशीघ्रंमुच्यतेतेनैवकारणेनवीतरागचारित्रानुकूलंशुद्धात्मानुभूत्यविनाभूतंवीतरागसम्यक्त्वमेवभावनीयमित्यभि
प्रायः॥तथाचोक्तं॥श्रीकुंदकुंदाचार्यैर्मोक्षप्राभृतेनिश्चयसम्यक्त्वलक्षणं॥सद्दव्वरवोसवणोसम्माइठीहवेइणियमेण।स
मत्तपरिणदोउणखवेइदुट्ठकम्माइ॥८०॥अतऊर्द्ध्वंमिथ्यादृष्टिलक्षणकथनमुख्यत्वेनसूत्राष्टकंकथ्यते॥तद्यथा॥पज्जयर

त्तउज्जीवडउमिछादिठिहवेइ। बंधइंबहुविहकम्मडाजेसंसारुभमेइ॥७७॥पज्जयरत्तउजीवडउमिछादिठिहवेइ। पर्यायेरक्तोजीवो
मिथ्यादृष्टिर्भवतिपरमात्मानुभूतिरुचिप्रतिपक्षभूताभिनिवेशरूपाव्यावहारिकमूढत्रयादिपंचविंशतिविशिष्टःनरनारकादिविभावपर्या
यरतःतस्यमिथ्यापरिणामस्यफलंकथ्यते। बंधइबहुविहकम्मडाजेसंसारुभमेइ। बध्नातिबहुविधकर्माणियेःसंसारंभ्रमतिये
नमिथ्यात्वपरिणामेनशुद्धात्मोपलब्धेःप्रतिपक्षभूतानिबहुविधकर्माणिबध्नातितैश्चकर्मभिर्द्रव्यक्षेत्रकालभवभावरूपंपंच
प्रकारंसंसारंपरिभ्रमतीति॥तथाचोक्तं॥मोक्षप्राभृतेनिश्चयमिथ्यादृष्टिलक्षणं॥जोपुणुपरदव्वरउमिछदिठिहवेइसोसाहू। मि
छत्तपरिणदोउणवज्झदिदुट्ठकम्मेहिं॥पुनश्चोक्तं।तैरेव॥जेपज्जएसुणिरदाजीवापरसमइगत्तिणिद्दिठा॥आदसहावम्मि
ठियातेसगसमयामुणेयव्वा॥अत्रस्वसंवित्तिरूपाद्वीतरागसम्यक्त्वात्प्रतिपक्षभूतंमिथ्यात्वंहेयमितिभावार्थः॥७८॥अथमिथ्या २
त्वोपार्जितकर्मशक्तिंकथयति॥७७॥कम्मइंदिढघणचिक्कणइंगरुवइंवज्जसमाइं॥णाणवियरखणुजीवडउउप्पहिंपाडहिताइं॥७७॥

कम्मइंदिढघणचिक्कणाइंगरुवइंवज्जसमाइं। कर्माणिभवंतिकिंविशिष्टानि। दृढानिबलिष्ठानिघनानिनिबिडानिचिक्कणान्यपनेतुम
शक्यानिविनाशयितुमशक्यानिगुरुकानिमहांतानिवज्रसमान्यभेद्यानिचइत्थंभूतानिकर्माणिकिंकुर्वंति। णाणवियरखणुजीवडउ
उप्पहिपाडइताइं। ज्ञानविचक्षणंजीवमुत्पथेपातयंति। तानिकर्माणियुगपल्लोकालोकप्रकाशककेवलज्ञानाद्यनंतगुणविचक्षणंद
क्षंजीवमभेदरत्नत्रयलक्षणान्निश्चयमोक्षमार्गात्प्रतिपक्षभूतउन्मार्गेपातयंतीतित्रत्रायमेवाभेदरत्नत्रयरूपोनिश्चयमोक्षमार्गो
उपादेयइत्यभिप्रायः॥७९॥अथमिथ्यापरिणत्याजीवोविपरीतंतत्वंजानातीतिनिरूपयति॥७७॥जिउमिछत्तिंपरिणमिउविवरिउत
च्चुमुणेइ। कम्मविणिम्मियभावडातेअप्पाणुभणेइ॥७७॥जिउमिछत्तिंपरिणविउविविरिउतच्चुमुणेइ। जीवोमिथ्यात्वेनपरिणा
तःसन्विपरीतंजीवःपरमात्मादितत्वंचयथावत्वस्तुस्वरूपमपिविपरीतंमिथ्यात्वरागादिपरिणतंजानाति। ततःश्चकिंकरोति
कम्मविणिम्मयभावडातेअप्पाणुभणेइ। कर्मविनिर्मितान्भावान्तानात्मानंभणतिविशिष्टभेदज्ञानाभावाद्गौरस्थूलरूपादि

कर्मजनितदेहधर्मानात्मानं जानातीत्यर्थः। अत्र तेभ्यः कर्मजनितभावेभ्यो भिन्नो रागादिनिवृत्तिकाले स्वशुद्धात्मैवोपादेय इति तात्पर्यार्थः॥ ८०॥ अथानंतरं तानू पूर्वोक्तकर्मजनितभावान् येन मिथ्यात्वपरिणामेन कृत्वा बहिरात्मात्मनि योजयति। तं परिणामं सूत्रपंचकेन विवृणोति। हउं गोरउ हउं सामलउ हउं जि विभिन्नउ वण्णु। हउं तणुअंग थूलु हउं एहउ मूढउ मण्णु॥ ७॥ अहं गौरो गौरवर्णः अहं स्यामः श्यामवर्णः अहमेव भिन्नो नानावर्णः मिश्रवर्णः वर्णाः क वर्णविषये रूपविषये पुनश्च कथंभूतोहं तन्वंगः कृशांगः पुनश्च कथंभूतोहं स्थूलः स्थूलशरीरः इत्थंभूतं मूढात्मानं मन्यस्व एवं पूर्वोक्तमिथ्यापरिणामपरिणतं जीवं मूढात्मानं जानीहीति अयमत्र भावार्थः। निश्चयनयेनात्मनो भिन्नान् कर्मजनितान् गौरस्थूलादिभावान् सर्वथा हेयभूतानपि सर्वप्रकारोपादेयभूते वीतरागनित्यानंदैकस्वभावे शुद्धजीवे योयोजयति स विषयकषायाधीनतया स्वशुद्धात्मानुभूतेश्च्युतः सन् मूढात्मा भवतीति॥ ८१॥ अथ॥ हउं वरु बंभणु वइसु हउं हउं खत्तिउ हउं सेसु। पुरिसु नउंसउ इत्थि हउं मन्नइ मूढु विसेसु॥ ७॥ हउं वरु बंभणु वइसु हउं हउं खत्तिउ हउं सेसु॥ अहं वरो विशिष्टो ब्राह्मणः अहं वैश्यो वणिक् अहं क्षत्रियो

Dr. BHAU DAJI

हं शेषः शूद्रादिः पुनश्च कथंभूतोहं। पुरिसु नउंसउ इत्थि हउं मण्णइ मूढ विसेसु। पुरुषो नपुंसकः स्त्रीलिंगोहं मन्यते मूढो विशेषं ब्राह्मणादिविशेषमिति इदमत्र तात्पर्यं यन्निश्चयनयेन परमात्मनो भिन्नानपि कर्मजनितान् ब्राम्हणादिभेदान् सर्वप्रकारेण हेयभूतानपि निश्चयनयेनोपादेयभूते वीतरागसदानंदैकस्वभावे शुद्धात्मनि योजयति। संबंधान् करोति कोसौ कथंभूतो ज्ञानपरिणतः स्वशुद्धात्मतत्त्वभावनारहितो मूढात्मेति॥ ८२॥ अथ। तरुणउ बूढउ रूवडउ सूरउ पंडिउ दिव्वु। खवणउ वंदउ सेवडउ मूढउ मण्णइ सव्वु॥ तरुणउ बूढउ रूवडउ सूरउ पंडिउ दिव्वु। तरुणो यौवनस्थोहं वृद्धो वृद्धोहं रूपवान् अहं शूरः सुभटोहं पंडितोहं दिव्योविशिष्टोहं पुनश्च किं विशिष्टोहं। खवणउ वंदउ सेवडउ॥ क्षपनको दिगंबरोहं वंदको बौद्धोहं श्वेतपटादिलिंगधारकोहमिति। मूढात्मा सर्वं मन्यत इति अयमत्र तात्पर्यार्थः यद्यपि व्यवहारेणाभिन्नान् तथापि निश्चयेन वीतरागसहजानंदैकस्वभावात्परमात्मनः भिन्नान् कर्मोदयोपन्नान् तरुणवृद्धादिविभावपर्यायान् हेयानपि साक्षादुपादेयभूते स्वशुद्धात्मतत्त्वे योजयति कोसौ ख्यातिपूजालाभादिविभावपरिणामाधीनतया परमात्मभाव

नाच्युतःसन्मूढात्मेति॥८३॥अथ॥जणणीजणणुविकंतघरुपुत्तुविमित्तुविदव्वु।मायाजाल्लुविअप्पणउमूढउमन्नइसव्वु॥७॥जंण
णीजणणुविकंतघरुपुत्तुविमित्तुविदव्वु।जननीमाताजननःपितापिकांताभार्यागृहंपुत्रोपिमित्रमपिद्रव्यंसुवर्णादियत्तत्सर्वं।मायाजा
ल्लुविअप्पणउमूढउमणइसव्वु।मायाजालमप्यसत्यपिकृत्रिममपिआत्मीयंस्वकीयंमन्यतेकोसौमूढोमूढात्माकत्तिसंख्योपेतमपि
सर्वमपीति॥अयमत्रभावार्थः॥जनन्यादिकंपरस्वरूपमपिशुद्धात्मनोभिन्नमपिहेयस्याशेषनारकादिदुषस्यकारणत्वाद्धेयमपिसा
क्षादुपादेयभूतानाकुलत्वलक्षणपारमार्थिकसौख्याद्भिन्नेवीतरागपरमानंदैकस्वभावशुद्धात्मतत्वेयोजयति।सकः।मनोवचनकाय
व्यापारपरिणतःस्वशुद्धात्मद्रव्यभावनाशून्योमूढात्मेति॥८४अथ॥दुक्खहंकारणिजेविसयतेसुहहेउरमेइ।मिच्छाइठिउजीवडोइ
त्थुनकाइकरेइ॥७॥दुक्खहंकारणिजेविसयतेसुहहेउरमेइ।दुःखस्यकारणंयेविषयास्तान्विषयान्सुखहेतून्मत्वारमते।सकः ४०
मिच्छाइठिउजीवडउ॥मिथ्यादृष्टिर्जीवः।इत्थुनकाइकरेइ।अत्रजगतियोसौदुक्खरूपविषयान्निश्चयनयेनसुखरूपान्मन्यतेस

मिथ्यादृष्टिःकिमकृत्तंपापंनकरोतिअपितुसर्वंकरोत्येवेति।अत्रतात्पर्यंमिथ्यादृष्टिर्जीवोवीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमा
नंदसमरसीभावरूपसुखरसापेक्षयानिश्चयेनदुःखरूपानपिविषयान्सुखहेतून्मत्वाअनुभवतीत्यर्थः॥८६॥एवंत्रिविधात्म
प्रतिपादकप्रथममहाधिकारमध्ये।पज्जयरत्तउजीवडउ।इत्यादिसूत्राष्टकेनमिथ्यादृष्टिपरिणतिव्याख्यानस्थलंसमाप्तं॥तदनंत
रंसम्यग्दृष्टिभावनाव्याख्यानमुख्यत्वेनकालुलहेविणुइत्यादिसूत्राष्टकंकथ्यते॥अथ॥कालुलहविणुजोइयाजिमजिममोहुगले
इ।तिमतिमदंसणुलहइजिउणियमिंअप्पुमणेइ॥७॥कालुलहेविणुजोइयाजिमजिममोहगलेइ।कालंलब्धाहेयोगिन्यथायथामोहो
विगलितितिमतिमदंसणुलहइजिउ।तथातथादर्शनंसम्यक्त्वंलभतेजीवः।तदनंतरंकिंकरोतिनियमिंअप्पुमुणेइ।नियमेनात्मानंमनु
तेजानातीत्यर्थः॥तथाहि॥एकेंद्रियविकलेंद्रियपंचेंद्रियसंज्ञिपर्याप्तमनुष्यदेशकुलशुद्धात्मोपदेशादीनामुत्तरोत्तरदुर्लभक्रमेणदुः
प्राप्तायाकाललब्धिः।कथंचित्काकतालीयन्यायेनतांलब्ध्वापरमागमकथितमार्गेणमिथ्यात्वादिभेदभिन्नपरमात्मोपलंभप्रति

 पन्निर्यथामोहोविगलतितथातथाशुद्धात्मैवोपादेयइतिरुचिरूपंसम्यक्त्वंलभतेशुद्धात्मकर्म्मणोर्भेदज्ञानेनशुद्धात्मतत्त्वंमनुतेजानातीति
 ।अत्रयस्यैवोपादेयभूतस्यशुद्धात्मनोरुचिपरिणामेननिश्चयसम्यग्दृष्टिर्जातोजीवः॥सएवोपादेयइतिभावार्थः॥८६॥अतऊर्द्ध्वंपू
र्वोक्तन्यायेनसम्यग्दृष्टिर्भूत्वामिथ्यादृष्टिभावनायाःप्रतिपक्षभूतांयादृशींभेदभावनांकरोतितादृशींक्रमेणसूत्रसप्तकेनविवृणोति
॥८७॥अप्पागोरउकिन्हुणवित्र्प्रप्पारत्तुनहोइ॥अप्पासुहुमुविथूलणविणाणिउंणाणिंजोइ॥८७॥आत्मागौरोनभवतिकृष्णोनभवति
रक्तोनभवतिआत्मासूक्ष्मोपिनभवतिस्थूलोपिनैवतर्हिकिंविशिष्टःज्ञानीज्ञानस्वरूपःज्ञानेनकरणभूतेनपश्यति॥अथवा॥णाणिं
उंजाणइजोइइतिपाठांतरं॥ज्ञानीयेसौयोगीसजानात्यात्मानंअथवाज्ञानीज्ञानस्वरूपेणआत्माकोसौजानातियोगीति॥तथाहि॥कृष्ण
गौरादिकधर्मान्व्यवहारेणजीवसंबंधानपितथापिशुद्धनिश्चयेनशुद्धात्मनोभिन्नान्कर्म्मजनितान्हेयान्वीतरागस्वसंवेदनज्ञानीस्व
शुद्धात्मतत्त्वेतान्नयोजयतिसंबंधान्नकरोतीतिभावार्थः॥८७॥अथ॥अप्पाबंभणुवइस्सुणविणविखत्तिउणविसेसु॥पुरिसुन ४१

उंसउइत्थिणविणाणिउंमुणइअसेसु॥अप्पाबंभणुवइस्सुणविणविखत्तिउणविसेसु॥पुरिसुनउंसउइत्थिणवि।आत्माब्राह्मणो
नभवतिवैश्योपिनैवनापिक्षत्रियोनापिविशेषःशूद्रादिः।पुरुषनपुंसकस्त्रीलिंगरूपोपिनैवतर्हिकिंविशिष्टः॥णाणिउंमुणइअसेसु
ज्ञानीज्ञानस्वरूपआत्माज्ञानीसन्किंकरोतिमनुतेजानातिकंअशेषंवस्तुजातंवस्तुसमूहमिति॥तद्यथा॥यानेवब्राह्मणादिवर्णभेदा
न्पुल्लिंगादिलिंगभेदान्व्यवहारेणपरमात्मपदार्थादभिन्नान्शुद्धनिश्चयेनभिन्नान्साक्षाद्धेयभूतान्वीतरागनिर्विकल्पसमाधि
च्युतोबहिरात्मास्वात्मनियोजयति॥तानेवतद्विपरीतभावनारतोंतरात्मास्वशुद्धात्मस्वरूपेनयोजयतीतिभावार्थः॥८८॥तद्यथा
॥अप्पावंदउखवणुनवित्र्प्रप्पागुरउनहोइ॥अप्पालिंगिउएक्कुनविणाणिउंजाणइजोइ॥आत्मावंदकोबौद्धोनभवति।अस्माक्ष
पनकोदिगंबरोनभवति।आत्मागुरवशब्दवाच्यःश्वेतंबरोनभवति॥आत्मेकदंडित्रिदंडिहंसपरमहंससंज्ञाःसन्यासीशिषीमुं
डीयोगदंडाक्षमालातिलककुलघोषप्रभृतिवेषधारीनैकोपिकश्चिदपिलिंगीनभवति॥तर्हिकथंभूतोभवतिज्ञानीतमात्मानं

कोसौजानातियोगीध्यानीति ॥ तथाहि ॥ यद्यप्यात्माव्यवहारेणबंदकादिलिंगीभण्यतेतथापिशुद्धनिश्चयेनंनयेनैकोपिलिंगीनभ
वति ॥ अयमत्रभावार्थः ॥ देहाश्रितंद्रव्यलिंगंअनुपचरितासद्भूतव्यवहारेणजीवस्वरूपंभण्यतेवीतरागनिर्विकल्पसमाधि
रूपंलिंगंतुयद्यपिशुद्धात्मस्वरूपसाधकत्वादुपचारेणशुद्धजीवस्वरूपंभण्यतेतथापिसूक्ष्मशुद्धनिश्चयेननभण्यतइति ॥
८९ ॥ अथ ॥ अप्पागुरुणविसिस्सुणविणविसामिउंनविभिच्चु । सूरउकायरुहोइनविनविउत्तमुनविणिच्चु ॥ ९० ॥ आत्मागुरुर्नै
वभवतिशिष्योपिनभवति नैवस्वामीनैवभृत्यः शूरोनभवतिकातरोहीनसत्वोनैवभवतिनैवोत्तमोउत्तमकुलप्रसूतःनैवनीचो
नीचौनीचकुलप्रसूतइति ॥ तथा ॥ गुरुशिष्यादिसंबंधान्यद्यपिव्यवहारेणजीवस्वरूपंस्तथापिशुद्धनिश्चयेनपरमात्मद्र
व्यान्भिन्नान्हेयभूतान्वीतरागपरमानंदैकस्वशुद्धात्मोपलब्धैःच्युतोबहिरात्मास्वात्मसंबंधान्करोति।नानेववीतरागनि ४२
र्विकल्पसमाधिस्थोन्तरात्मापरस्वरूपान्जानातीतिभावार्थः ॥ ९० ॥ अथ ॥ अप्पामाणुसुदेउणविअप्पातिरिउनहोइ ॥

अप्पानारउकहिविनविणाणिउंजाणइंजाइ ॥ ९१ ॥ अप्पामाणुसुदेउनविअप्पातिरिउनहोइ । अप्पानारउकहिविनवि । आत्मा
मनुष्योनभवतिदेवोनैवभवतिआत्मातिर्यग्योनिर्नभवतिआत्मानारकःक्वापिकालेनभवतितर्हिकिंविशिष्टोभवति । णाणिउं
जाणइंजोइ ॥ ज्ञानीज्ञानरूपोभवतितमात्मानंकोसौजानातियोगीयोगीकोर्थःत्रिगुप्तिनिर्विकल्पसमाधिस्थइति ॥ तथाहि
॥ विशुद्धज्ञानदर्शनस्वभावपरमात्मतत्वभावनाप्रतिपक्षभूतैः। रागद्वेषादिविभावपरिणामजालैर्यान्युपार्जितानिकर्माण्यित
दुदयजनितान्मनुष्यादिविभावपर्यायान्भेदाभेदरत्नत्रयभावनाच्युतोबहिरात्मास्वात्मतत्वेयोजयति । तद्विपरीतोंतरात्म
शान्दृचान्योज्ञानीपृथक्जानातीत्यभिप्रायः ॥ ९१ अथ ॥ अप्पापंडिउमुरुकुणविणविईसरुणविणीसु । तरुणउबूढउबा
लुणविअण्णुविकम्मविसेसु ॥ ९२ ॥ अप्पापंडिउमुरुकुणविणविईसरुणविणीसु । तरुणउबूढउबालुणवि । आत्मापंडितोनभ
वतिमूर्खोनैवनैवेश्वरःसमर्थोनैवनिःस्वोदरिद्रःतरुणोवृद्धोबालोपिनैवपंडितादिस्वरूपंयद्यात्मस्वभावोनभवतितर्हिकिं

भवति। अणुविकम्मविसेसु। अन्यएवकर्म्मजनितोयंविभावपर्यायविशेषइति॥ तद्यथा॥ पंडितादिसंबंधान्यद्यपिव्यवहार
नयेनजीवस्वभावात्तथापिशुद्धनिश्चयेनशुद्धात्मद्रव्याभिन्नान्सर्वप्रकारेणहेयभूतान्वीतरागस्वसंवेदनज्ञानभावनारहि
तोपिवहिरात्मास्वस्मिन्नियोजयति। तानेवपंडितादिविभावपर्यायंस्तद्विपरीतोयोसौचांतरात्मापरस्मिन्कर्म्मणिनियोज
यतीतितात्पर्यार्थः॥ ९२ अथ॥ पुणुविपाउविकालुणहुधम्माधम्मविकाउ एकुविअप्पाहोइणविमिल्लिविचेयणभाउ॥ ६८॥ पु
णुविपाउविकालुणहुधम्माधम्मुविकाउ। पुण्यमपिपापमपिकालेंनभः आकाशंधर्म्माधर्म्ममपिकायः शरीरंएक्कुविअप्पाहो
इणविमिल्लिविचेयणभाउ। इदंपूर्वोक्तमेकमप्यानभवति किंकृत्वामुक्त्वाकिंचेतनभावमिति॥ तथाहि॥ व्यवहारनयेनात्म
नःसकाशादभिन्नं। शुद्धनिश्चयेनभिन्नान्हेयभूतान्पुण्यपापादिधर्म्मान्मिथ्यात्वरागादिपरिणतोवहिरात्मास्वात्मन्नियो ४३
जयतितानेवपुण्यपापादिसमस्तसंकल्पविकल्पपरिहारभावनारूपेस्वशुद्धात्मद्रव्येसम्यक्श्रद्धानज्ञानानुचरणरूपाभे
दरत्नत्रयात्मकेपरमसमाधौस्थितोंतरात्माशुद्धात्मनःसकाशात्पृथक्जानातीतितात्पर्यार्थः॥ ९३॥ एवंत्रिविधात्मप्रतिपादकप्र
थममहाधिकारमध्येमिथ्यादृष्टिभावनाविपरीतेनसम्यग्दृष्टिभावनास्थितेन॥ सूत्राष्टकंसमाप्तं॥ अथानंतरंसामान्यभेदभावनामुख्य
त्वेनअप्पासंजमुइत्यादिप्रक्षेपकान्विहायैकत्रिंशत्सूत्रपर्यंतमुपसंहाररूपाचूलिकाकथ्यते॥ तद्यथा॥ यदिपुण्यपापादिरूपःप
रमात्मानभवतितर्हिकीदृशोभवतीतिप्रश्नेप्रत्युत्तरमाह। अप्पासंजमुसीलुतउअप्पादंसणणाणु। अप्पासासयमुक्खपउजाणं
तउअप्पाणु॥ ६७॥ अप्पासंजमुसीलुतउअप्पादंसणणाणु। अप्पासासयसोक्खपउ। आत्मासंजमोभवतिसीलंभवति। तपश्चर
णंभवति। आत्मादर्शनंभवतिज्ञानंभवति। शाश्वतमोक्षपदंचभवति। अथवापाठांतरं। सासयमुक्खपहु। शाश्वतमोक्षस्यपंथामा
र्गः॥ अथवासासयसुक्खपउशाश्वतसौख्यस्यपदंस्वरूपंचभवति॥ किंकुर्वन्सन्जाणंतउअप्पाणु॥ जानन्ननुभवन्सन्कंआत्मन
नमिति॥ तद्यथा॥ बहिरंगेंद्रियसंजमप्राणसंयमबलेनसाध्यसाधकभावेननिश्चयेनस्वशुद्धात्मनिसंयमनात्स्थितिकरणात्संज

संजमोभवतिबहिरंगसहकारिकारणभूतेनकामक्रोधादिवर्ज्जनलक्षणेनव्रतपरिरक्षणशीलेननिश्चयेनाभ्यंतरेस्वशुद्धात्मद्रव्यानि
र्मलानुभवनेनशीलंभवति। बहिरंगेनसहकारिकारणभूतेनानशनादिद्वादशविधतपश्चरणेननिश्चयनयेनाभ्यंतरेसमस्तपरद्र
व्येछानिरोधेनपरमात्मस्वभावेप्रतपनाद्विजयनात्तपश्चरणंभवति। स्वशुद्धात्मैवोपादेयइतिरुचिकरणान्निश्चयसम्यक्तंभवतिवीत
रागस्वसंवेदनज्ञानानुभवनान्निश्चयज्ञानंभवति। मिथ्यात्वरागादिसमस्तविकल्पजालत्यागेनपरमात्मतत्वेपरमसमरसीभावपरिण
मनाच्चमोक्षमार्गोभवतीति। अत्रबहिरंगद्रव्येंद्रियसंयमादिप्रतिपालनादभ्यंतरेस्वशुद्धात्मानुभूतिरूपभावसंयमादिपरिणमनादुपा
देयस्वरवसाधकत्वादात्मैवोपादेयइतितात्पर्यार्थः॥१४॥अथस्वशुद्धात्मसंवित्तिविहायनिश्चयनयेनान्यद्दर्शनज्ञानचरित्रंनास्तीत्य
भिप्रायंमनसिसंप्रधार्यसूत्रंकथयति॥अणुजिदंसणुअथिणविअणुविअथिणणाणु॥अणुजिचरणुणअथिजियमिद्दिविअप्पाजा ८४
णु॥७॥अणुजिदंसनअथिणविअणुविअथिणणाणु। अणुजिचरणुणअथिजिय।अन्यदेवदर्शनंनास्तिअन्यदेवज्ञानंनास्ति॥

अन्यदेवचरणंनास्तिहेदेवकिंकृत्वामिद्दिविअप्पाजाणुमुत्कात्यक्त्वाकंआत्मानंजानीहीति॥तथाहि॥यद्यपिषट्द्रव्यपंचास्तिकायसप्तत
त्वनवपदार्थाः। साध्यसाधकभावेननिश्चयसम्यक्त्वहेतुत्वाद्व्यवहारेणसम्यक्त्वंभवति। तथापिनिश्चयेनवीतरागपरमानंदैकस्वभा
वशुद्धात्मोपादेयइतिरुचिरूपपरिणामपरिणतशुद्धात्मैवनिश्चयसम्यक्त्वंचभवति। यद्यपिनिश्चयस्वसंवेदनज्ञानसाधकत्वात्
व्यवहारेणशास्त्रज्ञानंभवति। तथापिनिश्चयनयेनवीतरागस्वसंवेदनज्ञानपरिणतशुद्धात्मैवनिश्चयज्ञानंभवति। यद्यपिनिश्चयचा
रित्रसाधकत्वान्मूलोत्तरगुणाव्यवहारेणचारित्रंभवंति॥तथापि॥शुद्धात्मानुभूतिरूपवीतरागचारित्रपरिणतःस्वशुद्धात्मैवनिश्चय
नयेनचारित्रंभवतीति। अत्रोक्तलक्षणाभेदरत्नत्रयपरिणतःपरमात्मैवोपादेयइतिभावार्थः॥१८॥अथनिश्चयेनवीतरागभावपरिणतस्व
शुद्धात्मैवनिश्चयतीर्थःनिश्चयगुरुनिश्चयदेवइतिकथयति॥ अणुजितित्थुमजाहिजियअणुजिगुरुउमसेवि॥अणुजिदेउमचिंतितुहुं
अप्पाविमलुमुएवि॥८॥अणुजितित्थुमजाहिजियअणुजिगुरुउमसेवि।अणुजिदेउमचिंतितुहुं। अन्यदेवतीर्थमागच्छहेजीवअन्यदे

देवगुरुंमासेवस्वत्वंअन्यदेवदेवंमाचिंतयत्वंकिंकृत्वाअप्पाविमलुमुएविमुक्त्वात्यक्त्वाकंआत्मानंकथंभूतंविमलंरागादिरहितमिति॥नहि॥यद्यपिव्यवहारनयेननिर्वाणस्थानंचैत्यचैत्यालयादिकंतीर्थभूतपुरुषगुणस्मरणार्थंतीर्थंभवतितथापिवीतरागनिर्विकल्पसमाधिरूपनिश्छिद्रयात्तेनसंसारसमुद्रतरणसमर्थत्वान्निश्चयनयेनस्वात्मतत्त्वमेवतीर्थंभवति।यदुपदेशात्पारंपर्येणपरमात्मतत्त्वलाभोभवतीति।व्यवहारेणशिक्षादीक्षादायकोद्यपिगुरुर्भवति।तथापिनिश्चयनयेनपंचेंद्रियविषयप्रभृतिविभावपरिणामपरित्यागकालेसंसारविच्छित्तिकारणत्वात्।स्वशुद्धात्मैवगुरुःयद्यपिप्राथमिकापक्षयासविकल्पापेक्षयाचित्तस्थितिकरणार्थंतीर्थंकरपुण्यहेतुभूतसाध्यसाधकभावेनपरंपरयानिर्वाणकारणंचनिजप्रतिमादिकंव्यवहारेणदेवोभण्यतेतथापिनिश्चयनयेनमरमाराध्यत्वाद्विपरीतरागनिर्विकल्पत्रिगुप्तपरमसमाधिकालेस्वशुद्धात्मस्वभावएवदेवइतिदेवंनिश्चयव्यवहाराभ्यांसाध्यसाधकभावेनतीर्थगुरुदेवतास्वरूपंज्ञातव्यंइतिभावार्थः॥९६॥अथनिश्चयेनात्मसंवित्तिरेवदर्शनमितिप्रतिपादयति॥ ● ॥अप्पादंसणुकेवलुविअण्णुसव्वुववहारु DR BHAU DAJI ४९

एक्कुजिजोइयझाइयइजोतइलोयहंसारु॥९७॥अप्पादंसणुकेवलुवि॥आत्मादर्शनंसम्यक्त्वंभवतिकथंभूतोपिकेवलोपि।अणुसव्वुववहारु॥अन्यच्छेषःसर्वोपिव्यवहारःतेनकारणेन।एक्कुजिजोइयझाइयइ।हेयोगिन्नेकएवध्यायतेयःआत्माकथंभूतःजोत्तइलोयहंसारुयःपरमात्मात्रैलोक्यस्यसारभूतंइति॥तद्यथा॥वीतरागचिदानंदैकस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयलक्षणनिर्विकल्पत्रिगुप्तिसमाधिपरिणतोनिश्चयनयेनस्वात्मैवसम्यक्त्वंअन्यःसर्वोपिव्यवहारस्तेनकारणेनसएवध्यातव्यइति।अत्रयथाद्राक्षाकर्पूरश्रीखंडादिबहुद्रव्यैर्निष्पन्नमपिपानकभेदविवक्षयाल्वेकंभण्यतेतथाशुद्धात्मानुभूतिलक्षणैर्निश्चयसम्यग्दर्शनज्ञानचारित्रैर्बहुभिःपरिणतोअनेकोपात्माभेदविवक्षायाएकोपिभण्यतइतिभावार्थः॥तथाचोक्तं॥अभेदरत्नत्रयलक्षणं॥दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यतेबोधःस्थितिरात्मनिचारित्रंकुतःएतेभ्योवत्तिबंधः॥९७॥अथनिर्मलमात्मानंध्यायत्वंयेनध्यातेनांतर्मुहूर्तेनैवमोक्षपदंलभ्यतइतिनिरूपयति॥९८॥अप्पाझाय

परमात्म हिणिम्मलउ। आत्मानंध्यायस्वकथंभूतंनिर्मलंकिंबहुएंग्रन्थेण। किंबहुनाग्रन्थेनशुद्धात्मबहिर्भूतेनरागादिविकल्पजालमालाप्रपंचेन। जोझायंतहंपरम
४६ पउलझइ। यंपरमात्मानंध्यायमानानांपरमपदंलभ्यतेकेनकारणभूतेनएक्कखणेणएकक्षणेनांतर्मुहूर्तेनापीति ॥ तथाहि ॥ समस्तशुभाशु
भसंकल्पविकल्परहितेनस्वशुद्धात्मतत्वध्यानेनांतर्मुहूर्तेनमोक्षोलभ्यतेतेनकारणेननदेवनिरंतरंध्यातव्यमिति ॥ तथाचोक्तं ॥ बृहदाराधना
शास्त्रेषोडशतीर्थंकराणांएकक्षणेतीर्थकरोत्पत्तिवासरेप्रथमेश्रावण्यबोधसिद्धिरंतर्मुहूर्तेननिर्वृत्ता ॥ अत्राहशिष्यः ॥ यद्यंतर्मुहूर्तेपरमात्मध्या
नेनमोक्षोभवति। तर्हिइदानीमस्माकंतत्ध्यानंकुर्वाणानांकिंनभवतिपरिहारमाह। यादृशंतेषांप्रथमसंहननसहितानांशुक्लध्यानंभवति। तादृश
मिदानींनास्तीति ॥ तथाचोक्तं ॥ अत्रेदानींनिषेधंतिशुक्लध्यानंजिनोत्तमाः। धर्मध्यानंपुनःप्राहुःश्रेणिभ्यांप्राग्विवर्त्तिनं ॥ ॥ अत्रयेनकारणेनपरमा
त्मध्यानेनांतर्मुहूर्तेनमोक्षोलभ्यते। तेनकारणेनसंसारस्थितिछेदनार्थमिदानीमपितदेवध्यातव्यमितिभावार्थः ॥ १८ ॥ अथयस्यवीतरागमनसि
शुद्धात्मभावनानास्तितस्यशास्त्रपुराणतपश्चरणनिकिंकुर्वंतीतिकथयति ॥ ७ ॥ अप्पाणियमणिणिम्मलउणियमिंवसइणजास्क। सत्थपुराणइंतव
तवचरणुमुरकुजिकरहिंकितास्क ॥ ७ ॥ अप्पाणियमणिणिम्मलउणियमिंवसइणजास्क ॥ आत्मानिजमनसिनिर्मलोनियमेनवसतितिष्ठतिन ४६
नयस्यसत्थपुराणइंतवचरणुमुरकुजिकरहिकितास्क। शास्त्रपुराणानितपश्चरणंचमोक्षमपिकिंकुर्वंतितस्येति ॥ तद्यथा ॥ वीतरागनिर्विकल्प
समाधिरूपायस्यशुद्धात्मभावनानास्तितस्यशास्त्रपुराणतपश्चरणानिनिरर्थकानिभवंति।

तर्हिकिंसर्वथानिष्फलानितिनैवं। यदिवीतरागसम्यक्स्वरूपस्वशुद्धात्मपादेयभावनासहितानिभवंति। तदामोक्षस्यैवबहिरंगसहकारिकारणा
निभवंति। तदभावेपुण्यबंधकारणानिभवंतिमिथ्यात्वरागादिसहितानिपापबंधकारणानिचविद्यानुवादसंज्ञितदशमपूर्वंश्रुतंपठित्वाभग्नपुरुषादिवदिति
भावार्थः ॥ १९ ॥ अथात्मनिज्ञातेसर्वंज्ञातंभवतीतिदर्शयति ॥ ७ ॥ जोइयअप्पेंजाणिएणजगुजाणियउहवेइ। अप्पहंकेरइभावडइबिंबिउजेणवसे
इ ॥ ७ ॥ जोइयअप्पेंजाणिएण ॥ हेयोगिन्आत्मनाज्ञातेनकिंभवति। जगुजाणियउंहवेइ। जगत्त्रिभुवनंज्ञातंभवतिकस्मात्। अप्पहंकेर
इंभावडइंबिंबिउजेणवसेइ। आत्मानःकेरइसंबंधिनिभावेकेवलज्ञानपर्यायेबिंबितंप्रतिबिंबितंयेनकारणेनवसतितिष्ठतीति ॥ अयमर्थः
॥ वीतरागनिर्विकल्पस्वसंवेदनज्ञानेनपरमात्मनिज्ञातेसतिसमस्तद्वादशांगमागमस्वरूपंज्ञातंभवति। कस्माद्यस्माद्राघवपांडवादयोम
हापुरुषाजिनदीक्षांगृहीत्वाद्वादशांगंपठित्वाद्वादशांगाध्ययनफलभूतेनिश्चयरत्नत्रयात्मकेपरमात्मध्यानेतिष्ठंतितेनकारणेनवीत
रागस्वसंवेदनज्ञानेननिजात्मनिज्ञातेसतिसर्वंज्ञातंभवतीति ॥ अथवा ॥ निर्विकल्पसमाधिसमुत्पन्नपरमानंदसुखरसास्वादेजातेस
ति। पुरुषोजानाति ॥ किंजानाति। वेत्तिमस्वरूपमन्यद्देहरागादिकंपरमितितेनकारणेनात्मनिज्ञातेसर्वंज्ञातंभवति। अथवात्रात्माकर्त्ताश्रुत
ज्ञानरूपेणव्याप्तिज्ञानेनकरणभूतेनसर्वंलोकालोकंजानाति। तेनकारणेनात्मनिज्ञातेसर्वंज्ञानंभवतीति। अथवावीतरागनिर्विकल्पत्रिगुप्ति

समाधिबलेनकेवलज्ञानोत्पत्तिबीजभूतेनकेवलज्ञानेज्ञातेसतिदर्प्पणेबिंबवत्। सर्व्वलोकालोकस्वरूपंविज्ञायतइतिहेतोरात्मनिज्ञातेसर्व्वंज्ञातं
भवतीति। अत्रेदंव्याख्यानचतुष्टयंज्ञात्वाबाह्याभ्यंतरंपरिग्रहत्यागंकृत्वासर्व्वतात्पर्येणनिजशुद्धात्मभावनाकर्तव्येतितात्पर्यं॥ तथाचोक्तं॥ ॥
समयसारे॥ जोपस्सइअप्पाणंअबद्धपुठंअणणमविसेयं। अपदेससुत्तमझंपस्सइजिणसासणंसव्वं॥१००॥ अथैतदेवसमर्थय
ति॥७॥ अप्पसहाविपरिठियहं। आत्मस्वभावेप्रतिष्ठितानांपुरुषाणां। एहउहोइविसेसु। एषप्रत्यक्षीभूतोविशेषोभवतिएषः कः। दीस
इअप्पसहाविलहु। दृश्यतेपरमात्मस्वभावेस्थितानांलघुशीघ्रंअथवापाठांतरं। दीसइअप्पसहाउलहु। दृश्यतेसकः आत्मस्वभावः क
र्मतापन्नोलघुशीघ्रंनकेवलमात्मस्वभावोदृश्यते। लोयालोउअसेस। लोकालोकस्वरूपमप्यशेषंदृश्यतइति अत्र विशेषण पूर्व्वसूत्रोक्त ४७
मेवव्याख्यानचतुष्टयंज्ञातव्यं। यस्मात्तस्यैवदृढमतसंवादरूपत्वादितिभावार्थः॥१०१॥ ॥अतो अमुमेवार्थंदृष्टांतदा
र्ष्टांताभ्यांसमर्थयति॥७॥ अप्पुपयासइअप्पुपरुजिमअंबरिरविराउ॥ जोइयइत्थुम ॥७॥ ॥

त्तिकरिएहउवत्थुसहाउ॥७॥ अप्पुपयासइ। आत्माकर्त्ताप्रकाशयतिकं अप्पुपरु आत्मानंपरंचयथाकः किंप्रा
काशयति। जिमअंबरिरविराउ। यथायेनप्रकारेणअंबरेरविरागः। जोइयइत्थुमत्तिकरिएहउवत्थुसहाउ हेयो
गिन्नत्रभ्रांतिमाकार्षीः एषः वस्तुस्वभावइति। तद्यथा। यथा निर्म्मघाकाशेरविरागोरविप्रकाशः स्वपरं च प्रकाशयति
तथा वीतरागनिर्विकल्पसमाधिरूपेणसमयसारेस्थित्वाप्राक्भेघपटलेविनष्टेसतिपरमात्मालस्वभावस्व
भावीतरागनेदभावनाज्ञानेनस्वपरंचप्रकाशयति। आदर्शवस्थारूपकार्यसमयसाररूपेणपरिणम्यकेवलज्ञा
नेनस्वंपरंचप्रकाशयतीत्येषआत्मवस्तुस्वभावः संदेहो नास्तीति अत्रयोसौकेवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपः
कार्यसमयसारः सएवोपादेयइत्यभिप्रायः॥१०२॥ अथास्मिन्नेवार्थेपुनरपिव्यक्त्यर्थं। दृष्टांतमाह। तारायणुज
लिबिंबियउणिम्मलिदीसइजेम। अप्पइणिम्मलिबिंबियउलोयालोउवितेम॥७॥ तारायणुजलिबिंबियउतारा

परमात्म॰ रागणो जले बिंबितः प्रतिस्फलितः। कथंभूते जले। णिम्मलि दीसइ जेम। निर्मले दृश्यते यथा। दृष्टांतमाह। अप्पइं णिम्म
४८ लि बिंबियउ। लोयालोउ वि तेम। आत्मनि निर्मले मिथ्यात्वरागादिविकल्पजालरहिते बिंबितं प्रतिबिंबितं लोकालोक
मपि तथा दृश्यते इति। अत्र विशेषव्याख्यानं यदेव पूर्वदृष्टांतसूत्रे व्याख्यातमत्रापि तदेव ज्ञातव्यं कस्मात्। अयम
पि तस्य दृष्टांतस्य दृढीकरणार्थमिति सूत्रतात्पर्यार्थः॥१०३॥ अथात्मा परश्च येनात्मना ज्ञातेन ज्ञायते तमात्मानं स्वसं
वेदनज्ञानबलेन जानीहि इति कथयति। छ। अप्पु वि परु वि वियाणियइ जें अप्पें मुणिएण। सो णिय अप्पा जाणि तु
हुं जोइय णाणबलेण॥छ। अप्पु वि परु वि वियाणियइ जें अप्पें मुणिएण। आत्मापि परोऽपि विज्ञायते येन आत्मना वि
ज्ञातेन सो णिय अप्पा जाणि तुहुं। तं निजात्मानं जानीहि त्वं। जोइय णाणबलेण। हे योगिन् केन कृत्वा जानीहि ज्ञा ४८
नबलेनेति। अयमत्रार्थः। वीतरागसदानंदैकस्वभावेन येनात्मना ज्ञानेन स्वात्मानं परोऽपि ज्ञायते तमात्मानं वीतरा

×अले×३·२

गनिर्विकल्पस्वसंवेदनज्ञानभावनासमुत्पन्नपरमानंदसुखरसास्वादेन जानीहि। तन्मयो भूत्वा सम्यगनुभवेति भावार्थः।
१०४। अत कारणात् ज्ञानं पृच्छति। छ। णाणु पयासहि परमु महुं। किं अण्णें बहुएण। जेण णियप्पा जाणियइ। सामिय एक्कखणेण
णाणु पयासहि परमु महु। ज्ञानं प्रकाशय परं मम। किं अण्णें बहुएण। किमन्येन ज्ञानरहितेन बहुना। जेण णियप्पा जाणियइ
। येन ज्ञानेन निजात्मा ज्ञायते सामिय एक्कखणेण। हे स्वामिन्नियतकालेनैकक्षणेनेति। तथाहि। प्रभाकरभट्टः पृच्छति किं
पृच्छति। हे भगवन्। वीतरागस्वसंवेदनज्ञानेन क्षणमात्रेणैव शुद्धबुद्धैकस्वभावो निजात्मा ज्ञायते तदेव ज्ञानं कथय कि
मन्येन रागादिवर्धकेन विकल्पजालेनेति। अत्र येनैव ज्ञानेन मिथ्यात्वरागादिविकल्परहितेन निजशुद्धात्मसंवित्ति
रूपेणांतर्मुहूर्तेनैव परमात्मस्वरूपं ज्ञायते। तदेवोपादेयमिति भावार्थः॥१०५॥ अत ऊर्ध्वं सूत्रचतुष्टयेन ज्ञानस्वरूपं
प्रकाशयति। छ। अप्पा णाणु मुणेहि तुहुं। जो जाणइ अप्पाणु। जीवपएसहि तित्तिडउ। णाणें गयणपवाणु॥छ। अप्पा णाणु

× ज्ञानापेक्षया रूपावलोकनविषये दृष्टिवल्लोकालोकव्यापकं निश्चयेन लोकमात्रासंख्येयप्रदेशमपि व्यवहारेण ×पं०३.५

मुणेहि उक्तं देहप्रभाकरभट्ट आत्मानं ज्ञानं मन्यस्व त्वं यः किं करोति जो जाणइ अप्पा णउ यः कर्ता जानाति। कमात्मानं किं विशिष्टं
जीवपएसहि चित्तउ। जीवप्रदेशैश्चित्रं लोकमात्रप्रदेशं अथवा पाठांतरं। जीवपहिं सहिं देहसमु तस्यार्थो निश्चये
न लोकमात्रप्रदेशोपि व्यवहारेणैव संहारविस्तारधर्मत्वाद्देहमात्रः पुनरपि कथंभूतमात्मानं णाणेंगयणपवाणु। ज्ञानेन
कृत्वा व्यवहारेण गगनमात्रं जानीहि इति। तद्यथा। निश्चयनयेन मतिश्रुतावधिमनःपर्ययकेवलज्ञानपंचकाद्भिन्नं व्य
वहारेण स्वदेहमात्रं तमित्थंभूतमात्मानं आहारभयमैथुनपरिग्रहसंज्ञास्वरूपप्रभृतिसमस्तविकल्पकल्लोलजालं त्य
क्त्वा जानाति यः स पुरुष एव ज्ञानाद्भिन्नत्वाज्ज्ञानं भण्यते इति। अत्रायमेव निश्चयेन पंचज्ञानाद्भिन्नात्मानं जानात्यसौ
ध्यातात्मैवोपादेयं जानीहि इति भावार्थः। तथा चोक्तं। आभिणि सुदोहिमणकेवलं च तं होदि एगमेव पदं। सो एसो प
रमट्ठो जं लहिदुं णिव्वुदिं लहदि। ५०। अथ। अप्पहं जे वि विभिण्णवढ ते जि हवंति ण णाणु। ते तुहुं तिणि वि परिहरिवि णि ४९

यमिं अप्पु वियाणु। ५१। अप्पहं जे वि विभिन्नवढ। आत्मनः सकाशाद्येपि भिन्नाः वढ वत्स ते जि हवंति ण णाणु। तेपि भवंति न ज्ञानं
तेन कारणेन ते तुहुं तिणि वि परिहरिवि तान् कर्मतापन्नान् त्वं हे प्रभाकरभट्ट त्रीण्यपि परिहृत्य मुक्त्वा। किं करु णियमिं अ
प्पु वियाणु निश्चयेनात्मानं विजानीहि इति। तद्यथा। सकलविमलकेवलज्ञानस्वरूपात्परमात्मपदार्थान्निश्चयनयेन भिन्ना
न् त्रीण्यपि धर्मार्थकामान् त्यक्त्वा वीतरागस्वसंवेदनलक्षणे शुद्धात्मानुभूतिज्ञाने स्थित्वात्मानं जानीहि इति भावार्थः। ५१।
अप्पा णाणहं गम्मु पर णाणु वियाणइ जेण। तिणि वि मिल्लिवि जाणि तुहुं अप्पा णाणें तेण। ५२। अप्पा णाणहं गम्मु पर आत्मा
ज्ञानस्य गम्यो विषयः परः केवलो नियमेन कस्मात् णाणु वियाणइ जेण ज्ञानं कर्तृ विजानात्यात्मानं येन कारणेन अतः का
रणात् तिणि वि मिल्लिवि जाणि तुहुं त्रीण्यपि मुक्त्वा जानीहि त्वं हे प्रभाकरभट्ट अप्पा णाणें तेण कं जानीहि आत्मानं केव
लज्ञानेन तेन कारणेनेति। तथाहि। निजशुद्धात्मा ज्ञानस्यैव गम्यः कस्मादिति चेत्। मतिज्ञानादिपंचकविकल्परहितं

यत्परमपदं परमात्मशब्दवाच्यं साक्षान्मोक्षकारणं तद्रूपो योसौ परमात्मा तमात्मानं वीतरागनिर्विकल्पस्वसंवेदनज्ञानगु
णेन विना अनुष्ठानं कुर्वाणोपि बहवोपि न लभंते यतः कारणात्। तथा चोक्तं। समयसारे। णाणगुणेहिं विहीणा एदं तु पदं
बहूवि ण लहंति। तं गिण्ह सुपदमेदं जइ इच्छसि दुक्खपरिमोक्खं॥छ॥ अत्र धर्मार्थकामादिसर्वपरद्रव्यइच्छां योसौ मुंचति स्व
शुद्धात्मसुखामृते तृप्तो भवति। स एव निष्परिग्रहो भण्यते स एवात्मानं जानातीति भावार्थः। उक्तं च। अपरिग्गहो अणिच्छो
भणिदो णाणी य णिच्छदे धम्मं। अपरिग्गहो दु धम्मस्स जाणगो तेण सो होदि॥९८॥ अथ। णाणिय णाणिउ णाणिएण णाणि
उं जाण मुणेहि। ता अण्णाणिं णाणमउँ किं पर बंभु लहेहि॥छ॥ णाणिय हे ज्ञानिन् णाणिउं ज्ञानी निजात्मा णाणिएण ज्ञा
निना निजात्मना कारणभूतेन कथंभूतो निजात्मा णाणमउ ज्ञानी ज्ञानलक्षणः तमित्थंभूतमात्मानं जाण मुणेहि या
वत्कालं न जानासि ता अण्णाणिं णाणमउ तावत्कालमज्ञानेन मिथ्यात्वरागादिविकल्पजालेन ज्ञानमयं किं पर बंभु लहे ६०
हि। किं परं उत्कृष्टं ब्रह्मस्वभावं लभसे किं तु नैवेति। तद्यथा। यावत्कालमात्मा कर्त्ता आत्मानं कर्मतापन्नं आत्मना का
रणभूतेन आत्मने निमित्तं आत्मनः सकाशात् आत्मनि स्थितं समस्तरागादिविकल्पजालं मुक्त्वा न जानाति तावत्कालं
परमब्रह्मशब्दवाच्यं निर्दोषिपरमात्मानं किं लभसे नैवेति भावार्थः॥९९॥ इति सूत्रचतुष्टयेनांतरस्थलेन ज्ञानव्याख्या
नं गतं। अथानंतरं सूत्रचतुष्टयेनांतरस्थले परलोकशब्दवाच्यं परमात्मानं कथयंति। तद्यथा। जोइज्जइ तिं बंभु परु जाणि
ज्जइ तिं सोइ। बंभु मुणेविणु जेण लहु गम्मिज्जइ परलोइ॥छ॥ जोइज्जइ दृश्यते तिं तेन शुद्धेन तेन कारणेन वा कोसौ दृश्य
ते। बंभु परु ब्रह्मशब्दवाच्यः शुद्धात्मा कथंभूतः परः उत्कृष्टः। अथवा। परइति पाठे नियमेन च केवलं दृश्यते जाणिज्ज
इ ज्ञायते। तेन शुद्धरूपेण तेन कारणेन वा सोसौ स एव शुद्धात्मा केन कारणेन बंभु मुणेविणु जेण लहु येन शुद्धरूपेण ये
न कारणेन वा ब्रह्मशब्दवाच्यं निर्दोषिपरमात्मानं मत्वा ज्ञात्वा पश्चात् गम्मिज्जइ परलोइ तेनेव वइर्वीक्के नब्रह्मस्वरूपे

परमात्म: परिज्ञातंतुरूवेणतेनैवकारणेनवागम्यते।कःपरलोकेपरलोकशब्दवाच्योपरमात्मतत्त्वेकिंचयोसौशुद्धनिश्चयनयेनश

५१ क्तिरूपेणकेवलज्ञानदर्शनस्वभावःपरमात्मासर्वेषांस्त्रीमेकेंद्रियादिजीवानांशरीरेतिष्ठन्शुद्धरूपेणतिष्ठतिस

एवपरमब्रह्माविष्णुःसएवपरमशिवइतिव्यक्तिरूपेणपुनर्भगवान्अर्हन्नेवमुक्तिगतसिद्धात्मापरमब्रह्माविष्णुशिवो

वाभण्यतेनचान्यःकोपिपरकल्पितःजगद्व्यापितथैवएकःपरमब्रह्माविष्णुशिवोवास्तीति।अयमत्रार्थः।यत्रासौमुक्ता

त्मालोकाग्रेतिष्ठतिसएवब्रह्मलोकःसएवविष्णुलोकःसएवशिवलोकोनान्यःकोपीतिभावार्थः॥११०॥अथ।मुणिवरविंदहं

हरिहरहंजोमणिणिवसइदेउ।परहंजिपरतरुणाणमउसोवुच्चइपरलोउ॥छ॥मुणिवरविंदहंहरिहरहंमुनिवरवृंदानां

हरिहराणांचजोमणिणिवसइदेउ।जोसोमनसिनिवसतिदेवआराध्यःपुनरपिकिंविशिष्टःपरहंजिपरतरुणाणमउप

रस्मादुत्कृष्टादपि।अथवापरहंजिबहुवचनंतत्रपरेभ्योपिसकाशादतिशयेनपरःपरतरःपुनरपिकथंभूतोज्ञानमयः

डाक्टर भाऊदाजी स्मारक ... Dr. BHAU DAJI MEMORIAL

केवलज्ञानेननिर्वृत्तःसोवुच्चइपरलोउ।सएवंगुणविशिष्टःशुद्धात्मापरलोकइत्युच्यतेइतिपरउक्कृणोवीतरागचिदानंदैकस्वभा

वोआत्मातस्यलोकोवलोकनंनिर्विकल्पसमाधावनुभवनमितिपरलोकशब्दस्यार्थः।अथवालोक्यंतेदृश्यंतेजीवादिपदा

र्थायस्मिन्परमात्मस्वरूपेयस्यकेवलज्ञानेनवासभवतिलोकःपरश्चासौलोकश्चपरलोकःव्यवहारेणपुनःस्वर्गापवर्गलक्ष

णःपरलोकोभण्यते।अत्रयोसौपरलोकशब्दवाच्यःपरमात्मासएवोपादेयइतितात्पर्यार्थः॥१११॥अथसोपरवुच्चइलोउप

रुजस्समइइत्थुवसेइजहिंमइतहिंगइजीवहंणियमिंजेणहवेइ॥छ॥सोपरवुच्चइलोउपरुसपरःनियमेनोच्यते

लोकोजनःकथंभूतोभण्यतेपरःउत्कृष्टःसकःजस्सुमइइत्थुवसेइयस्यभव्यजनस्यमतिर्मनश्चित्तंतत्रनिजपरमात्म

स्वरूपेवसतिविषयकषायविकल्पजालत्यागेनस्वसंवेदनसंवित्तिस्वरूपेणस्थिरीभवतीतियस्यपरमात्मतत्त्वेमतिस्ति

ष्ठतिसकस्मात्परोभवतीतिचेत्।जहिंमइतहिंगइजीवहंणियमिंजेणहवेइ।येनकारणेनयत्रस्वशुद्धात्मस्वरूपे

नियमि

परमात्मः ५२ मतिस्तत्रैवगतिः कस्यैवजीवस्यैव अथवा वृद्धवचनेन मरहे जीवहं जिम जीवत्रामेमव[illegible] निश्चयेन भवतीति। अयमत्र भा
वार्थः। यद्यार्त्तरौद्राधीनतयास्वशुद्धात्मभावनाच्युतो भूत्वा परभावेन परिणमति। तदा दीर्घसंसारी भवति। यदि पुनर्निश्चय
रत्नत्रयात्मके परमात्मतत्त्वे भावनां करोति तर्हि निर्वाणं प्राप्नोतीति ज्ञात्वा सर्वरागादिविकल्पत्यागेन तत्रैव भावना कर्त्त
व्येति।।११२।। अथ। जहिं मइ तहिं गइ जीव तुहुं मरणु वि जेण लहेहि। तिं परबंभु मुएवि मइं मा परदव्वि करेहि। जहिं मइं तहिं ग
ई जीव तुहुं मरणे वि जेण लहेहि। यत्र मतिस्तत्र गतिः हे जीव त्वं मरणेन कृत्वा। येन कारणेन लभसे। तिपरबंभु मुएवि मइं
मा परदव्वि करेहि। तेन कारणेन परमब्रह्मशब्दवाच्यं शुद्धद्रव्यार्थिकनयेन टंकोत्कीर्णज्ञायकैकस्वभावं वीतरागसदानंदैक
सुखामृतरसपरिणतं निजशुद्धात्मतत्त्वं मुक्त्वा मतिं चित्तं मा परद्रव्ये देहसंगादिशुभाकार्षीरिति भावार्थः।।११३।। एवं सूत्र ५२
चतुष्टयेन अंतरस्थले परलोकशब्दसूचितस्य परलोकशब्दवाच्यस्य परमात्मनो व्याख्यानं गतं। तदनंतरं किं तत्परद्रव्यमि

ति प्रश्ने प्रत्युत्तरं ददाति।। जं णियदव्वहं भिण्णु जडु तं परदव्वु वियाणि। पुग्गलु धम्माधम्मु णहु कालु वि पंच मुणेहि।।
जं भिन्नादि। यद्रवं पुनः रूपेण व्याख्यानं क्रियते। यं यत् नियदव्वहं निजद्रव्यात् भिण्णु भिन्नं पृथग्भूतं जडु जडं तं तत्
परदव्वु वियाणि परद्रव्यं जानीहि। तच्च किं पुग्गलु धम्माधम्मु णहु कालु वि पुद्गलधर्माधर्मनभोरूपं कालु वि कालमपि पंच मुणेहि
पंच मं जानीहि इति। अनंतचतुष्टयस्वरूपात् निजद्रव्याद्बाह्यं भावकर्मद्रव्यकर्मनोकर्मरूपं जीवसंबंधं शेषं पुद्गलादि
पंचभेदं यत्सर्वं तद्धेयमिति।।११४।। अथ वीतरागनिर्विकल्पसमाधिरतस्य क्षणेनापि कर्म्मजालं दहतीति ध्यानसामर्थ्यं दर्श
यति। जइ णिमिसद्धु वि कोवि करइ परमप्पइ अणुराउ। अग्गिकणी जिम कट्ठगिरि डहइ असेसु वि पाउ। जइत्यादि। जइ णि
मिसद्धु वि यदि निमिषार्द्धमपि कोवि करइ कोपि कश्चित्करोति किं करोति। परमप्पइ अणुराउ परमात्मन्यनुरागं तदा किं
करोति। अग्गीकणी जिम कट्ठगिरि अग्निकणिका यथा काष्ठगिरिं दहति तथा डहइ असेसु वि पाउ दहत्यशेषमपि पापमिति

परमात्मः
६३ ।तथाहि।ऋद्धिगौरवरसगौरवकवित्ववादित्वगमकत्ववाग्मित्वचतुर्विधशब्दगौरवस्वरूपप्रभृतिसमस्तविकल्पजालत्याग
रूपेणमहावातेनप्रज्वालितनिजशुद्धात्मतत्वध्यानाग्निकणिकास्तोकाप्यनेकेंधनराशिमिवांतर्मुहूर्त्तेनापिचिरसंचि
तकर्मराशिंदहतीति।अत्रैवंविधंशुद्धात्मध्यानसामर्थ्यंज्ञात्वा[illegible]निरंतरंभावनीयमितिभावार्थः॥११५॥अथहेजीवचिं
ताजालंमुक्त्वाशुद्धात्मस्वरूपेनिरंतरंपश्येतिनिरूपयति॥मिल्लिविसयलअवरखडीजियणिचिंतउहोइ।चित्तुणिवेसहि
परमपइदेउणिरंजणुजोइ॥मिल्लिवित्यादि।मिल्लिविमुक्त्वासयलसमस्तंअवरकडीदेहभावायाचिंतांजियहेजीवणिच्चिंति
उहोइ।निश्चिंतोभूत्वाकिंकुरचित्तुणिवेसहिचित्तंणिवेसयधारयकपरमपएनिजपरमात्मपदेपश्चात्किंकरुदेउणिरंजणु
जोइदेवंनिरंजनंपश्येति।तद्यथा।हेजीवदृष्टश्रुतानुभूतभोगाकांक्षास्वरूपापध्यानादिःसमस्तचिंताजालंमुक्त्वानिश्चिंतो ६३
भूत्वाचित्तंपरमात्मस्वरूपेस्थिरंकुरुतदनंतरंभावकर्मद्रव्यकर्मनोकर्माजनरहितंदेवंपरमाराध्यंनिजशुद्धात्मानं।

ध्यायेतितिभावार्थः॥अपध्यानलक्षणंकथ्यते।वधबंधनछेदादिर्द्वेषाद्रागाच्चपरकलत्रादेः।आर्त्तध्यानमपध्यानंशासति
जिनशासनेविशारदाः॥११६॥अथ।शिवशब्दवाच्येनिजशुद्धात्मनिध्यातेयत्सुखंभवतितत्सूत्रत्रयेणप्रतिपादयति।जं
सिवदंसणिपरमसुहुपावहिझाणुकरंतु।तंसुहुभुवणिविअत्थिणविमिल्लिविदेउअणंतु॥जमित्यादिपदखंडनारूपे
णव्याख्यानंक्रियते।यंयत्सिवदंसणिस्वशुद्धात्मदर्शनेपरमसुहुपरमसुखंपावहिप्राप्नोषिहेप्रभाकरभट्टकिंकुर्वन्
सन्।झाणुकरंतु।ध्यानंकुर्वन्सन्तंसुहुतत्पूर्वोक्तसुखंभुवणिविभुवनेपिअत्थिणविअस्तिनैवकिंकृत्वामिल्लि
विमुक्त्वाकंदेउदेवंकथंभूतंअणंतुअनंतशब्दवाच्यपरमात्मपदार्थमिति।तथाहि।शिवशब्देनात्रविशुद्धोज्ञानस्व
भावोनिजशुद्धात्माज्ञातव्यः।तस्यदर्शनमवलोकनमनुभवनंतस्मिन्शिवदर्शनेपरमसुखंनिजसुखात्मभावनोत्प
न्नवीतरागपरमाल्हादरूपंजनितिकिंकुर्वन्सन्वीतरागनिर्विकल्पेकेनगुणसमाधिंकुर्वन्इत्थंभूतंसुखंअनंतशब्द

परमात्म:

५४

वाच्यो यो सौ परमात्मा पदार्थस्तमुक्त्वा त्रिभुवनेपि नास्तीति। अयमत्रार्थः। शिवशब्दवाच्यो यो सौ निजपरमात्मा स एव रागद्वेष
मोहपरिहारेण ध्यातः सन्नाकुलत्वलक्षणं परमसुखं ददाति नान्यः कोपि शिवनामपुरुषः॥११७॥ अथ। जं मुणि लहइ अ
णंतसुहु णिय अप्पा झायंतु। तं सुहु इंदु वि णवि लहइ देविहिं कोडि रमंतु। जमित्यादि। जं यत् मुणि मुनिस्तपोधनः लहइ ल
भते अणंतु सुहु। अनंतसुखं किं कुर्वन् सन् णिय अप्पा झायंतु। निजात्मानं ध्यायन् सन् तं स्फुटं तत्पूर्वोक्तं सुखं इंदु वि णवि ल
हइ इंद्रोपि न लभते किं कुर्वन् सन् देविहिं कोडि रमंतु। देवीनां कोटिं रम्यमाणोपि न लभत इति। अयमत्र तात्पर्यार्थः। बाह्या
भ्यंतरपरिग्रहरहितः स्वशुद्धात्मतत्वभावनोत्पन्नवीतरागपरमानंदसहितो मुनिर्यत्सुखं लभते तन्न देवेंद्रादयोपि न लभं
त इति। तथा चोक्तं। दृश्यमाने जगत्यस्मिन् महता मोहवह्निना। विमुक्तविषयासंगाः सुखायंते तपोधनाः॥११८॥ अप्पा दं
सणि जिणवरहं जं सुहु होइ अणंतु। तं सुहु लहइ विराउ जिउ जाणंतउ सिउ संतु। अप्पा इत्यादि। अप्पादंसणि निजशु १४

× तवप्रस्तावख्यायं जिनवराणं ×उ.१

द्धात्मदर्शने जिणवरहं जं सुहु होइ अणंतु। तं सुहु लहइ विराउ जिउ जाणंतउ। यत्सुखं भवत्यनंतं सुहु तत्पूर्वोक्तं सु
खं लहइ लभते कोसौ विराउ जिउ वीतरागभावनापरिणतो जीवः किं कुर्वन् सन् जाणंतउ। जानन्ननुभवन् सन् किं सि
उ शिवशब्दवाच्यं निजशुद्धात्मस्वभावं कथंभूतं संतु शांतं रागादिविभावरहितमिति। अयमत्र भावार्थः। दीक्षाकालेपि
वशब्दवाच्यस्वशुद्धात्मानुभवने यत्सुखं भवति जिनवराणां वीतरागनिर्विकल्पसमाधिरतो जीवस्तत्सुखं लभत इति॥११९॥
अथ। कामक्रोधादिपरिहारेण शिवशब्दवाच्यः परमात्मा दृश्यत इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति
। जोइय णियमणि णिम्मलए पर दीसइ सिउ संतु। अंबरि णिम्मलि घणरहिए भाणु जि जेम फुरंतु। जोइय इत्यादि
जोइय हे योगिन् णिय मणि निजमनसि कथंभूते णिम्मलए निर्मले परं नियमेन दीसइ दृश्यते। कोसौ कर्मतापन्न
सिउ शिवशब्दवाच्यो निजपरमात्मा कथंभूतः संतु शांतो रागादिरहितः। दृष्टांतमाह। अंबरि आकाशे कथंभूते नि

परमात्म:

६६

मलिए निम्मलिउ नरपि कथं भूते घनरहिए घनरहिते। कइवा। भाणु जिजेम भानुरिव यथा। किं कुर्वन् फुरंतु स्फुरन् प्रकाशमान
इति। अयमत्र तात्पर्यार्थः। यथा घनघटाटोपविघटने सति निर्मलाकाशे दिनकरः प्रकाशते तथा शुद्धात्मानुभूतिप्रतिप
क्षभूतानां कामक्रोधादिविकल्परूपघनानां विनाशे सति निर्मलचित्ताकाशे केवलज्ञानाद्यनंतगुणकरकलितः। निज
शुद्धात्मादित्यः प्रकाशं करोतीति ॥१२०॥ अथ। यथा मलिने दर्पणे रूपं न दृश्यते तथा रागादिमलिनचित्ते शुद्धात्मस्वरूपं न दृ
श्यत इति निरूपयति। राएं रंगिए हियवडए देउ ण दीसइ संतु। दप्पणि मइलइ बिंबु जिम एहउ जाणि णिभंतु। राएं इत्यादि
राएं रंगिए हियवडए रागेन रंजिते हृदये देउ ण दीसइ देवो न दृश्यते किं विशिष्टः संतु शांतो रागादिरहितः। दृष्टांतमाह। द
प्पणि मइलइ दर्पणे मलिने बिंबु जिम बिंबं यथा एहउ एतत्। जाणि हि हे प्रभाकरभट्ट णिभंतु निर्भ्रांतं यथा भवतीति। अय
मत्राभिप्रायः। यथा मेघपटलप्रच्छादितो विद्यमानोपि सहस्रकरो न विद्यते न दृश्यते। तथा केवलज्ञानकिरणैर्लोकालोक ६६

प्रकाशकोपि कामक्रोधादिविकल्पमेघप्रच्छादितः सन् देहमध्ये शक्तिरूपेण विद्यमानोपि निजशुद्धात्मादिनकरो न दृश्यते इति ॥
॥१२१॥ अथानंतरं विषयाशक्तानां परमात्मा न दृश्यते इति दर्शयति। जसु हरिणच्छी हियवडए तसु णवि बंभु वियारि। एकहिं केम
समंति वढ बे खंडा पडियारि। जसु इत्यादि। जसु यस्य पुरुषस्य हरिणच्छी हरिणाक्षी स्त्री हियवडए हृदये वसतीति क्रियाऽ
ध्याहारः तसु तस्यैव नास्ति। कोसौ बंभु ब्रह्मशब्दवाच्यो निजपरमात्मा वियारि एवं विचारय त्वं हे प्रभाकरभट्ट अत्रार्थे दृष्टां
तमाह। एकहिं केम एकस्मिन् कथं समंति। सम्पश्मिमाति। सम्यगवकाशं कथं लभंते। वढ वत्स बे द्वौ खंडा असी कोशाधिकर
णे भूते पडियारि प्रतिकारि कोशशब्दवाच्ये इति। तथाहि। वीतरागनिर्विकल्पपरमसमाधिसंजातानाकुलत्वलक्षणपरमानंद
सुखामृतप्रतिबंधकेनाकुलत्वोत्पादकैः स्त्रीरूपावलोकनचिंतादिसमुत्पन्नहावभावविभ्रमविलासविकल्पजालैर्मूर्छिते
वासिते रंजिते परिणते चित्ते त्वेकस्मिन् प्रतिकारे खड्गद्वयवत् परमब्रह्मशब्दवाच्यनिजशुद्धात्मा कथमवकाशं लभते न

परमात्मः कथमपीति भावार्थः। हावभावविभ्रमविलासलक्षणं कथ्यते। हावो मुखविकारः स्याद्भावश्चित्तोद्भवो उच्यते। विलासो नेत्रजो ज्ञेयो वि
६६ भ्रमो भ्रूयुगान्तयोः ॥१२०॥ अथ रागादिरहिते निजमनसि परमात्मा निवसतीति दर्शयति। ३ ॥ णियमणि णिम्मलि णाणियहं णिव
सइ देउ अणाइ। हंसा सरवरि लीणु जिम महु एहउ पडिहाइ ॥ णियमणि इत्यादि। णियमणि निजमनसि किंविशिष्टे णिम्मलि निर्म
ले रागादिमलरहिते केषां मनसि णाणियहं ज्ञानिनां णिवसइ निवसति कोसौ देउ देवः आराध्यः किंविशिष्टः। अणाइ अनादिः क
इव कुत्र हंसा सरवरि लीणु जिम हंसः सरोवरे लीनो यथा हे प्रभाकरभट्ट महु एहउ पडिहाइ ममैवं प्रतिभातीति। तथाहि। पूर्व
सूत्रकथितेन चिंताकुलत्वोत्पादकेन स्त्रीरूपावलोकनसेवनचिंतादिसमुत्पन्नेन रागादिकल्लोलमालाजालेन रहिते निजशुद्धा
त्मद्रव्यसम्यक्श्रद्धानसहजसमुत्पन्नवीतरागपरमसुखसुधारसस्वरूपेण निर्मलनीरेण पूर्णे वीतरागस्वसंवेदनज्ञानिनां मान
सरोवरे परमात्मा हंसः लीनस्तिष्ठते कथंभूतो निर्मलगुणग्राहकत्वेन हंसः इव हंसः क इव। पक्षी इव कुत्र प्रसिद्धे सरोवरे हंस ६६

इत्येवमभिप्रायो भगवतां श्रीयोगीन्द्रदेवानां ॥१२१॥ उक्तं च। देउ ण देउले णवि सिलए णवि लिप्पइ णवि चित्ति। अखउ णिरंजणु
णाणमउ सिउ संठिउ समचित्ति। देव इत्यादि। देउ देवः परमाराध्यः नो नास्ति कस्मिन् कस्मिन्नास्ति देउले देवालये णवि
सिलए नैव शिलाप्रतिमायां णवि लिप्पइ नैव लेप्यप्रतिमायां णवि चित्ति नैव चित्रप्रतिमायां तर्हि क्व तिष्ठति निश्चयेन अखउ अ
क्षयः णिरंजणु कर्मांजनरहितः पुनरपि किंविशिष्टः णाणमउ ज्ञानमयः केवलज्ञानेन निर्वृत्तः सिउ शिवशब्दवाच्यो नि
जपरमात्मा एवंगुणविशिष्टपरमात्मदेव इति संठिउ संस्थितः समचित्ते समभावे समभावपरिणतमनसीति। तद्यथा। यद्यपि
व्यवहारेण धर्मवर्तनानिमित्तं स्थापनारूपेण पूर्वोक्तगुणलक्षणो देवो देवगृहादौ तिष्ठति। तथापि निश्चयेन शत्रुमित्रसुखदुःख
जीवितमरणादिसमतारूपे वीतरागसहजानंदैकरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयात्मकस
मचित्ते शिवशब्दवाच्यः परमात्मा तिष्ठतीति भावार्थः। तथा चोक्तं। समचित्तपरिणतश्रमणलक्षणं। समसत्तुबंधुवग्गो समसु

परमात्म:
६७

हउंरकोपसंससणिंदसमो। समलोहुकंचणोवियजीवियमरणेसमोसमणो॥१२४॥ इत्येकत्रिंशत्सूत्रैश्चूलिकास्थलंगतं। ।अथस्थ
लसंख्याबाह्यंप्रक्षेपकद्वयंकथ्यते। मणुमिलियउपरमेसरहं परमेसरुविमणस्स। बीहिविसमरसिहूवाहं पुज्जचडावउंकस्स॥
मणुइत्यादि। मणु मनोविकल्परूपंमिलियउमिलितं। तन्मयंजातं कस्यसंबंधित्वेन परमेसरहं परमेश्वरस्यपरमेसरुवि
मणस्स। परमेश्वरोपिमनःसंबंधित्वेनलीनोजातः बीहिविसमरसिहूवाहं एवंद्वयोरपिसमरसीभूतयोः पुज्ज। पूजांचडाव
उंसमारोपयामि कस्यकस्यनिश्चयनयेननकस्यापीति। अयमत्रभावार्थः। यद्यपिव्यवहारनयेनगृहस्थावस्थायांविषय
कषायदुर्ध्यानवंचनार्थंधर्मवर्द्धनार्थंचपूजाभिषेकदानादिव्यवहारोस्ति। तथापिवीतरागनिर्विकल्पसमाधिरतानांतत्कालेब
हिरंगव्यापाराभावात्स्वयमेवनास्तीति॥१२५॥ जेणणिरंजणिमणुधरिउविसयकसायहिंजंतु। मोक्खहंकारणुएत्तडउअण्ण
णतंतुणमंतु। जेणइत्यादि। जेणयेनपुरुषेणकर्तृभूतेनणिरंजणेकर्ममलांजनरहितेपरमात्मनिमणुमनःधरिउ। धृतंकिंकु।

र्वन्सन्विसयकसायहिंजंतु विसयकषायेषुगच्छन्सन्विसयकसायहिं। तृतीयांतंपदंसप्तम्यंतं। तत्कथंजातमितिचेत्। प
रिहारमाह। प्राकृतेक्वचित्कारकव्यभिचारोभवति लिंगव्यभिचारश्च इदंसर्वत्रज्ञातव्यं मोक्खहंकारणु मोक्षस्यकारणं। एत्तड
उ। एतावदेवविषयकषायरतचित्तस्यव्यावर्त्तनेनस्वात्मनिस्थापनंअण्णणतंतुणमंतु अन्यत्किमपिनमोक्षकारणं। अन्यंकिंतंतुतं
त्रंशास्त्रंमोषधंवामंतुमंत्राक्षरंचेति। तथाहि। शुद्धात्मतत्वभावनाप्रतिकूलेषुविषयकषायेषुगच्छन्सन्मनोवीतराग
निर्विकल्पस्वसंवेदनज्ञानबलेनव्यावर्त्यनिजशुद्धात्मद्रव्येस्थापयति यःसएवमोक्षंलभते नतेनान्योमंत्रतंत्रादिवलिष्ठोपी
तिभावार्थः॥१२६॥ एवंपरमात्मप्रकाशवृत्तौप्रक्षेपकत्रयंविहायअधिकविंशतिसूत्रशतदोहकसूत्रैस्त्रिविधात्मप्रतिपाद
कनामाप्रथममहाधिकारःसमाप्तः॥१॥ ।अतऊर्द्ध्वंस्थलसंख्याबहिर्भूतान्प्रक्षेपकान्विहायचतुर्द्दशाधिकशतद्वयप्र
मितैर्दोहकसूत्रैर्मोक्षमोक्षफलमोक्षमार्गप्रतिपादनमुख्यत्वेनद्वितीयमहाधिकारःप्रारभ्यते। तत्रादौसूत्रदशकपर्यंतं

डाक्टर भाऊ दाजी मेमोरियल
Dr. BHAU DAJI MEMORIAL

मोक्षसुखं तया व्याख्यानं करोति। तद्यथा। सिरिगुरु अक्खहि मुक्खु महु मुक्खहं कारणु तत्तु। मोक्खहं केरउ अण्णु फलु जिं जाणउं
उ परमत्थु॥ सिरिगुरु इत्यादि। सिरिगुरु हे श्रीगुरो योगींद्रदेव अक्खहि कथय मोक्खु मोक्षं मोक्खहं कारणु मोक्षस्य कारणं। क
थंभूतं तत्तु तथ्यं मोक्खहं केरउ मोक्षस्य संबंधि। अण्णु अन्यत् किं फलु फलं एतत्त्रयेण ज्ञातेन किं भवति। जे जाणउं येन त्रयस्य व्या
ख्यानेन जानाम्यहं कर्त्ता किं परमत्थु परमार्थमिति। तद्यथा। प्रभाकरभट्टः श्रीयोगींद्रदेवान् विज्ञापयति मोक्खं मोक्षफलं मोक्षकार
णमिति। त्रयं पृष्टवानिति भावार्थः॥१२७॥ अथ। तदेव त्रयं क्रमेण भगवान् कथयति॥ जोइय मुक्खु वि मोक्खफलु पुच्छिउ मोक्ख
हं हेउ। सो जिणभासिउ णिसुणि तुहुं जेण वियाणहि भेउ। जोइय इत्यादि। जोइय हे योगिन् मुक्खु वि मोक्षोपि मुक्खफलु मोक्ष
फलं पुच्छिउ पृष्टं त्वया कर्तृभूतेन पुनरपि किं पृष्टं मोक्खहं हेउ मोक्षस्य हेतुः कारणं तत्त्रयं जिणभासिउ जिनभाषितं णिसु ५८
णि निश्चयेन स्फुटं समाकर्णय येन त्रयेण जेण ज्ञातेन वियाणहि भेउ। विजानासि भेदं त्रयाणां संबंधनमिति। अयमत्र तात्प

र्यार्थः। श्रीयोगींद्रदेवाः कथयंति हे प्रभाकरभट्ट शुद्धात्मोपलंभलक्षणं मोक्षं केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपं मोक्ष
फलं भेदाभेदरत्नत्रयात्मकं मोक्षमार्गं च क्रमेण प्रतिपादयाम्यहं त्वं शृणु इति॥१२८॥ अथ। धर्मार्थकाममोक्षाणां मध्ये सुखकारण
त्वान्मोक्ष एवोत्तम इति अभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति॥ धम्महं अत्थहं कामहं वि एयहं सयलहं मोक्खु
। उत्तमु पभणहिं णाणि जिय अण्णें जेण ण सोक्खु। धम्महं इत्यादि। धम्महं धर्मस्य धर्माद्वा अत्थहं अर्थस्य अर्थाद्वा। कामहं
वि कामस्यापि कामाद्वा एयहं सयलहं एतेषां सकलानां संबंधित्वेन एतेभ्यो वा सकाशात्। मोक्खु मोक्षं उत्तमु पभणहिं
उत्तमं विशिष्टं प्रभणंति कथयंति णाणि ज्ञानिनः। जिय हे जीव कस्मादुत्तमं प्रभणंति मोक्षं अण्णें अन्येन धर्मार्थकामा
दिना जेण येन कारणेन ण सोक्खु नास्ति परमसुखं इति। तद्यथा। धर्मशब्देनात्र पुण्यं कथ्यते। अर्थशब्देन तु पुण्यफलभूतार्थो
राज्यादिविभूतिविशेषः कामशब्देन तु तस्यैव राज्यस्य मुख्यफलभूतः स्त्रीवस्त्रगंधमाल्यादिसंभोगः। एतेभ्यः त्रिभ्यः सका

परात्मनः शान्मोक्षमुत्तमं कथयंति के ते वीतरागनिर्विकल्पस्वसंवेदनज्ञानिनः कस्मात् । आकुलत्वोत्पादकेन वीतरागपरमानंदैकसुखामृ

६९ रमा तरसास्वादविपरीतेन धर्मार्थकामादिना मोक्षादन्येन येन कारणेन सुखं नास्तीति भावार्थः ॥१२९॥ अथ धर्मार्थकामेभ्यो यद्युत्त

मो न भवति मोक्षः तर्हि तत्त्रयं मुक्त्वा परलोकशब्दवाच्यं मोक्षं किमिति जिना गच्छंतीति प्रकटयंति ॥ जइ जिय उत्तमु होइ

नवि उत्तमो न भवति नैव केभ्यः एयहं सयलहं एतेभ्यः पूर्वोक्तेभ्यो धर्मादिभ्यः कतिसंख्योपेतेभ्यः सकलेभ्यः सोइ स एव पूर्वोक्त

मोक्षः तो ततः कारणात् किं किमर्थं तिण्णिवि त्रीण्यपि परिहरिवि परिहृत्य त्यक्त्वा जिण जिनाः कर्तारः वच्चहिं व्रजंति गच्छंति का

स्मात् गच्छंति परलोइ परलोकशब्दवाच्ये परमात्मध्याने न तु कायमोक्षे चेति । तथाहि । परलोकलोकशब्दस्य व्युत्पत्त्यर्थः

। कथ्यते पर उत्कृष्टो मिथ्यात्वरागादिरहितः । केवलज्ञानाद्यनंतगुणसहितः परमात्मा परशब्देनोच्यते तस्यैवं गुणवि

शिष्टस्य परमात्मनो लोको लोकनमवलोकनं वीतरागपरमानंदसमरसीभावानुभवनं लोक इति । परलोकशब्दस्य ६९

×सोऽत्तमेव मोक्षमिति । अयमत्र भावार्थः ॥ येन कारणेन सुखकारणत्वादितो बंधनबद्धाः पशवोपि मोक्षमिच्छंति ×वो.ऊं.८

र्थः ॥ अथवा द्वितीयलक्षणः परमात्मा परशब्देनोच्यते निश्चयेन परमशिवशब्दवाच्यो मुक्तात्मा शिव इत्युच्यते । तस्य लो

कः शिवलोक इति । अथवा । परमशब्दवाच्यो मुक्तात्मा परमब्रह्म इति तस्य लोको ब्रह्मलोक इति । अथवा परमविष्णुशब्द

वाच्यो मुक्तात्मा विष्णुरिति । तस्य लोको विष्णुलोक इति । परलोकशब्देन मोक्षो भण्यते परश्चासौ लोकश्च परलोक इति । परलो

कशब्दस्य व्युत्पत्त्यर्थो ज्ञातव्यः ॥ न चान्यः कोपि परकल्पितः शिवलोकादिरस्तीति । अत्र स एव परलोकशब्दवाच्यः परमात्मो

पादेय इति तात्पर्यार्थः ॥१३०॥ अथ तमेव मोक्षं सुखदायकं दृष्टांतद्वारेण दृढयति ॥ उत्तमु सुरकु नदेइ जइ । उत्तमु सुरकु नदे

ई । तो किं इच्छहि बंधणहिं बद्धा पसुय वि सोइ ॥ उत्तमु इत्यादि । उत्तमु उत्तमं सुखु सुखं ण देइ न ददाति । यदि चेत् । उत्तमु सु

रकु नदेइ उत्तमो मोक्षो न भवति । तो तस्मात् कारणात् किं किमर्थं इच्छहिं इच्छंति बंधणहिं बंधनैः बद्धा निबद्धाः किंनिबद्धाः पसुय

पशवोपि किं मिच्छंति तेन कारणेन केवलज्ञानाद्यनंतगुणाविनाभूतस्योपादेयरूपस्यानंतसुखस्य कारणत्वादितिश्र

निनो विशेषेण मोक्षमिछंति।।२१।। अथ। यदि तस्य मोक्षस्याधिकगुणगणो न भवति तर्हि त्रिलोको निजमस्तकस्योपरि तं कि-
मर्थं धरतीति निरूपयति।। छ।। अह जइ जगहं वि जिअ अहियय रु गुणगणु तासु ण होइ। तो तइलोउ वि किं धरइ णियसिरउ-
प्परि सोइ।। छ।। अह इत्यादि। अह पुनः जइ यदि चेत् जगहं वि जगतोपि सकाशात् अहियय रु अतिशयेनाधिको अ-
धिकतरः कोसौ गुणगणु गुणगणः तासु तस्य मोक्षस्य ण होइ न भवति। तो ततः कारणात् तइलोउ वि त्रिलोकोपि कर्त्ता
किं धरइ किमर्थं धरति कस्मिन् णियसिरउप्परि निजशिरसि उपरि किं धरति सो इत्थमेव मोक्षमिति। तद्यथा। यदि तस्य मो-
क्षस्य शुद्धेः सम्यक्त्वादिगुणगणो न भवति तर्हि त्रिलोकस्य निजमस्तकस्योपरि तत् किं धरतीति अत्रानेन गुणगणस्थाप-
नेन किं फलं भवति। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराभिधानानां नवानां गुणानां अभावं मोक्षं मन्यंते ये त- ६०
द्वैशेषिकास्ते निषिद्धाः ये च प्रदीपनिर्वाणवज्जीवाभावं मोक्षं मन्यंते सौगतास्ते च निरस्ताः। यथोक्तं। संक्षेपं सुभावस्याव-

त्सुखज्ञानरहितो मोक्षस्तदपि निरस्तं। लोकाग्रे तिष्ठतीति वचनेन तु मंडलिसंज्ञानैयायिकमतं तत्र यत्रैव मुक्तस्तत्रैव तिष्ठ-
तीति वदंति तेपि निरस्ताः इति ज्ञेनमतिपुनरिंद्रियजनितज्ञानसुखस्याभावेन न चातींद्रियज्ञानसुखस्येति कर्मजनितेंद्रि-
यादिदशप्राणसहितस्याशुद्धजीवस्याभावेन न पुनः शुद्धजीवस्येति भावार्थः।।२२।। अथोत्तमं सुखं न ददाति यदि मो-
क्षस्तर्हि सिद्धाः कथं निरंतरं सेवंतीति कथयति।। छ।। उत्तमसुक्खु न देइ जइ उत्तममोक्खु न होइ। तो किं सय-
लुवि कालु जिय सिद्ध वि सेवहिं सोइ। उत्तम इत्यादि। उत्तम सुक्खु उत्तमं सुखं न देइ न ददाति जइ जदि चेत्। उत्तमु उत्त-
मो सुखमोक्खः न होइ न भवति। तो ततः कारणात् किं किमर्थं सयलु वि कालु सकलमपि कालं जिय हे जीव सिद्ध वि सिद्धा
अपि सेवहिं सेवयंति सो इत्थमेव मोक्षमिति तथाहि। यदि अतींद्रियपरमाह्लादरूपमविनश्वरं सुखं न ददाति मोक्षस्तर्हि
कथमुत्तमो भवति। उत्तमत्वाभावे च केवलज्ञानादिगुणसहिताः सिद्धा भगवंतः किमर्थं निरंतरं सेवंति चेत् तस्माद्देवज्ञाय-
ते तत्सुखमुत्तमं ददातीति। उक्तं च सिद्धसुखं आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं वृद्धिह्रासव्यपेतं विषय

परमात्म:

६३

विरहितं निःप्रतिद्वंद्वभावं अनन्यद्रव्यानपेक्षं निरुपममितं शाश्वतं सर्वकालं उत्कृष्टानंतसारं परमसुखमतस्तस्य सिद्ध
स्य जातं ॥छ॥ अयमेव निरंतरमभिलषणीयमिति भावार्थः ॥१२३॥ अथ ॥ सर्वेषां परमपुरुषाणां मोक्ष एव ध्येय इति प्र
तिपादयति ॥ हरिहरबंभ वि जिणवर वि मुणिवरविंद वि भव्व । परमणिरंजणि मणु धरिवि मुक्खु जि झायहिं सव्व ॥ हरिहर
इत्यादि ॥ हरिहरबंभु वि हरिहरब्रह्माणोपि जिणवर वि जिनवरा अपि मुणिवरविंद वि मुनिवरवृंदान्यपि भव्व भव्याः अ
पि एते सर्वे किं कुर्वंति । परमणिरंजणि परमनिरंजनाभिधाने निजपरमात्मस्वरूपे मणु मनः धरिवि विषयकषा
येभ्यो व्याघुट्य स्थित्वा पश्चात् मुक्खु जि मोक्षमेव झायहिं ध्यायंति । सव्व सर्वेपीति । तद्यथा । हरिहरादयः सर्वेपि
प्रसिद्धपुरुषाः ख्यातिपूजालाभादिसमस्तविकल्पजालेन शून्ये शुद्धबुद्धैकस्वभावनिजात्मद्रव्यसम्यक्श्रद्धानज्ञाना
नुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसमुत्पन्नवीतरागसहजानंदैकसुखरसानुभावेन इर्लकेन ६३
ज्ञावत् । भरतावस्थे निरंजनशब्दाभिधेयपरमात्मध्याने स्थित्वा मोक्षमेव ध्यायंतीति । अयमत्र भावार्थः । यद्यपि व

द्वारेण सविकल्पावस्थायां वीतरागसर्वज्ञस्वरूपं तत्प्रतिबिंबानि तन्मंत्राक्षराणि तदाराधकपुरुषाश्च ध्येया भवंति
॥ तथापि ॥ वीतरागनिर्विकल्पत्रिगुप्तिगुप्तपरमसमाधिकाले निजशुद्धात्मैव ध्येय इति ॥१२४॥ अथ भुवनत्रयेपि मोक्षं
मुक्त्वा अन्यत्परमसुखकारणं नास्तीति निश्चिनोति ॥ ॥ तिहुयणि जीवहं अत्थि णवि सोक्खहं कारणु कोइ ॥ मुक्खु मु
एविणु एक्कु पर तेण वि चिंतहि सोइ ॥ तिहुयणि इत्यादि ॥ तिहुयणि त्रिभुवने जीवहं जीवानां अत्थि णवि अस्ति नैव किं
नास्ति सोक्खहं कारणु सुखस्य कारणं कोइ किमपि वस्तु किं कृत्वा मुक्खु मुएविणु इक्कु मोक्षं मुक्त्वैकं परं नियमेन ते
ण वि तेनैव कारणेन चिंतहि चिंतय सोइ तमेव मोक्षमिति ॥ तथाहि ॥ त्रिभुवनेपि मोक्षं मुक्त्वा निरंतरातिशयसु
खकारणमन्यत्पंचेंद्रियविषयानुभवरूपं किमपि नास्ति तेन कारणेन हे प्रभाकरभट्ट वीतरागनिर्विकल्पपरम
सामायिके स्थित्वा निजशुद्धात्मस्वभावं ध्यायस्वेति ॥ अत्राह प्रभाकरभट्टः ॥ हे भगवन् त्वं हि मोक्षसुखं निरंतरं व

र्शनि भवद्भिः स्तत्कथं न ज्ञायते जनैः भगवानाह हे प्रभाकरभट्ट कोपि पुरुषो निर्व्याकुलचित्तः प्रस्तावे पंचेंद्रियभोगसे-
वारहितस्तिष्ठति स केनापि देवदत्तेन पृष्टः सुखेन स्थितो भवान् तेनोक्तं सुखमस्तीति तत्सुखमात्मोत्थं कस्मादिति चेत्
तत्काले स्त्रीसेवादिस्पर्शविषयो नास्ति रमणीयगीतवाद्यादिशब्दविषयो नास्ति। तस्मात् ज्ञायते तत्सुखमात्मो-
त्थमिति॥ किंच॥ एकदेशविषयव्यापाररहितानां तद् एकदेशेनात्मोत्थसुखमुपलभ्यते वीतरागनिर्विकल्पस्वसंवेदन-
प्रत्यक्षागमं सिद्धात्मनां च सुखं पुनरनुमानगम्यं॥ तथा हि॥ मुक्तात्मानं शरीरेंद्रियविषयव्यापाराभावेपि स्वात्मोत्थवी-
तरागपरमानंदैकसुखोपलब्धिरिति॥ अत्रेत्थंभूतं सुखमेवोपादेयं इति भावार्थः॥ तथागमे [illegible]॥ मात्मोत्थमतींद्रिय-
सुखं॥ छ॥ अयसयमादसमुत्थं विषयातीदं अणोवममणंतं अव्वुच्छिण्णं च सुहं सुद्धुवओगप्पसिद्धाणं॥ [illegible]॥ अथय-
स्मिन्मोक्षे पूर्वोक्तमतींद्रियसुखमस्ति तस्य मोक्षस्य स्वरूपं कथयति॥ छ॥ जीवहं सो पर मुक्खु मुणि जो परमप्पय-

लाहु॥ कम्मकलंकविमुक्काहं णाणिय बोल्लहिं साहु॥ ८॥ जीवहं इत्यादि जीवहं जीवानां सो तं पर नियमेन मोक्खु मोक्षं मुणि
मन्यस्व जानीहि हे प्रभाकरभट्ट तं कं जो परमप्पयलाहु यः परमात्मलाभः इत्थंभूतो मोक्षो येषां भवति कम्मकलंकविमुक्का-
हं ज्ञानावरणादि अष्टविधकर्मकलंकविमुक्तानां इत्थंभूतं मोक्षं के ब्रुवंति णाणिय बोल्लहिं वीतरागस्वसंवेदनज्ञानिनो
ब्रुवंति ते के साहु रत्नत्रयाविष्ठानेन मोक्षसाधकाः साधव इति॥ तथा हि॥ केवलज्ञानाद्यनंतगुणव्यक्तिरूपस्य कार्यसमय-
सारभूतस्य हि परमात्मलाभो मोक्षो भवतीति स च केषां पुत्रकलत्रममत्वस्वरूपप्रभृतिसमस्तविकल्परहितध्यानेन भाव-
कर्म्मद्रव्यकर्म्मकलंकरहितानां भव्यानां भवतीति ज्ञानिनः कथयंति अत्रायमेव मोक्षः पूर्वोक्तस्यानंतसुखस्योपादेयभूत-
स्य कारणत्वादुपादेय॥ इति भावार्थः॥ [illegible]॥ एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये सूत्र-
दशकेन मोक्षस्वरूपनिरूपणस्थलं समाप्तं॥ ८॥ अथ तस्यैव मोक्षस्यानंतचतुष्टयस्वरूपं फलं दर्शयति॥ दंसणु णाण-

परमात्म॰ उ अणंतु सुक्खु समउ जि ण देइ जासु। सो परमात्मउ मोक्ख फलु बिज्जउ अत्थि ण तासु ॥ दंसणु इत्यादि ॥ दंसणु केवलदर्शनं णा

६२ णु केवलज्ञानं अणंतसुक्खु अनंतसुखं एतदुपलक्षणम् अनंतवीर्यादि अनंतगुणाः समउ न तु देइ एतद्गुणकदंबकमेक

समयमपि यावन्न तु ददाति न ददाति जासु यस्य मोक्षपर्यायस्य भेदेन तदाधारजीवस्य वा सो पर तदेव केवलज्ञानादि

स्वरूपं उ मोक्ख फलु अन्यत् मोक्षं भवति विज्जउ अत्थि ण तासु तस्यानंतज्ञानादिमोक्षफलस्यान्यद् द्वितीयमधिकं किमपि ना

स्तीति ॥ अयमत्र भावार्थः ॥ अनंतज्ञानादिमोक्षफलं ज्ञात्वा समस्तरागादित्यागेन तदर्थमेव निरंतरं शुद्धात्मभावना कर्त

व्येति एवं द्वितीयमहाधिकारे मोक्षफलकथनरूपेण सूत्रत्रयमेकं गतं ॥ ४ ॥ अथानंतरमेकोनविंशतिसूत्रपर्यंतं

निश्चयव्यवहारमोक्षमार्गव्याख्यानमुख्यत्वेन कथ्यते ॥ तद्यथा ॥ जीवहं मोक्खहं हेउ वरु दंसणु णाणु चरित्तु ॥ ते पुणु तिण्णि वि अप्पु ६३

मुणि णिच्छइं एहउ वुत्तु ॥ ५ ॥ जीवहं इत्यादि जीवहं जीवानां अथवा एकवचनपक्षे जीवहो जीवस्य मोक्खहं हेउ मोक्षस्य हे

तुः कारणं व्यवहारनयेन भवतीति क्रियाध्याहारः कथंभूतं वरु वरमुत्कृष्टं किं तत् दंसणु णाणु चरित्तु सम्यग्दर्शनज्ञानचा

रित्रत्रयं ते पुणु ता नि पुनः तिण्णि वि त्रीण्यपि सम्यग्दर्शनज्ञानचारित्राणि अप्पु आत्मानम् अभेदनयेन मुणि मन्यस्व जानी

हि त्वं हे प्रभाकरभट्ट णिच्छइं निश्चयनयेन एहउ वुत्तु एवमुक्तं भणितं तिष्ठतीति ॥ इदमत्र तात्पर्यं ॥ भेदरत्नत्रयात्म

को व्यवहारमोक्षमार्गः साधको भवति अभेदरत्नत्रयात्मकः पुनर्निश्चयमोक्षमार्गः साध्यो भवत्येवं निश्चयव्यवहारमोक्षमा

र्गयोः साध्यसाधकभावो ज्ञातव्यः ॥ सुवर्णसुवर्णपाषाणवदिति ॥ तथाचोक्तं ॥ सम्मद्दंसणणाणं चरणं मोक्खस्स कारणं

जाणे ववहारा णिच्छयदो तत्तियमइओ णिओ अप्पा ॥ १३ ॥ अथ निश्चयरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भ

वतीति प्रतिपादयति ॥ ६ ॥ पिच्छइ जाणइ अणुचरइ अप्पिं अप्पउ जो जि ॥ दंसणु णाणु चरित्तु जिउ मोक्खहं कारणु

सो जि ॥ पिच्छइ इत्यादि ॥ पिच्छइ पश्यति जाणइ जानाति अणुचरइ अनुचरति केन कृत्वा अप्पिं आत्मना करणभूतेन कं

कर्म्मतापन्नं अप्पउ निजात्मानं जोजिय एवकर्त्ता दंसणु णाणु चरित्तु दर्शनज्ञानचारित्रत्रयं भवतीति क्रियाध्याहारः को
सौ भवति जीउ जीवः य एव भेदनयेन सम्यग्दर्शनज्ञानचारित्रत्रयं भवति मोक्खहं कारण मोक्षकारणं एक एव सो
जिस एव निश्चयरत्नत्रयपरिणतो जीव इति॥ तथाहि॥ यः कर्त्ता निजात्मानं मोक्षस्य कारणभूतेनात्मना कृत्वा पश्यति नि
र्विकल्परूपेणावलोकयति॥ अथवा॥ तत्त्वार्थश्रद्धानापेक्षया चलमलिनावगाढपरिहारेण शुद्धात्मैवोपादेय इति
रुचिरूपेण निश्चिनोति न केवलं निश्चिनोति वीतरागस्वसंवेदनलक्षणभेदज्ञानेन जानाति परिच्छिनत्ति न केवलं परि
च्छिनत्ति अनुचरति रागादिसमस्तविकल्पत्यागेन तत्रैव निजस्वरूपे स्थिरी भवतीति स निश्चयरत्नत्रयपरिणतः
शुद्ध एव निश्चयमोक्षमार्गो भवतीति॥ अत्राह प्रभाकरभट्टः तत्त्वार्थश्रद्धानरुचिरूपं सम्यग्दर्शनं मोक्षमार्गो भवति य ६५
दि भवति चेत्तर्हि नास्ति दोषः पश्यति निर्विकल्परूपेणावलोकयतीत्येवं यदुक्तं तत्सत्तावलोकदर्शनं कथं मोक्षमार्गो

जे पस्सेहि पवित्तु॥ जं इत्यादि॥ जं यत्सुद्धउ बुद्धइ वृतिको सो कत्तवि ववहारेण उ भवहारनय मेकिं बूर्ले दंसणु णाणु चरित्तु॥ सम्यग्दर्शनज्ञानचारित्रत्रयं तं श्रो
कं भेदरत्नत्रयस्वरूपं परियाणहि॥ परि संमंताज्जानीहि जी वतुऊ ४ षो ७
भवति यदि भवति चेत्तर्हि तत्सत्तावलोकदर्शनमभव्यानामपि विद्यते तेषामपि मोक्षो भवतु॥ स चागमविरोधः॥ इति प
रिहारमाह॥ तेषां निर्विकल्पसत्तावलोकदर्शनं बहिर्विषये विद्यते तेषामपि मोक्षो भवतु न चाभ्यंतरशुद्धात्मतत्त्वविषये
कस्मादिति चेत् तेषामभव्यानां मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयाभावात् शुद्धात्मैवोपादेय इति रुचिरूपं सम्य
ग्दर्शनमेव नास्ति चारित्रमोहोदयात् पुनर्वीतरागचारित्ररूपं निर्विकल्पशुद्धात्मसत्तावलोकनमपि न संभवतीति॥ भा
वार्थः॥ निश्चयेनाभेदरत्नत्रयपरिणतो निजशुद्धात्मैव मोक्षमार्गो भवतीत्यस्मिन्नर्थे संवादगाथामाह॥ छ॥ रयणत्तयं
ण वट्टइ॥ अप्पाणं मुइत्तु अन्नदवियम्हि तम्हा तत्तियमइउ होदि हु मुक्खस्स कारणं आदा॥ १४॥ अथ भेदरत्नत्रया
त्मकं व्यवहारमोक्षमार्गं दर्शयति॥ जं बुज्झइ ववहारेण उ दंसणु णाणु चरित्तु तं परियाणहि जीव तुहुं जें जीव त्वं क
र्त्ता जियेन भेदरत्नत्रयपरिज्ञानेन परु होहि परत्र क्लेशेन भवसि त्वं पुनरपि किं विसिष्टस्त्वं पवित्तु पवित्रः सर्वजनस्य स्म

परमात्मः ६९ इति ॥ तद्यथा ॥ हेजीव सम्यग्दर्शनज्ञानचारित्ररूपनिश्चयरत्नत्रयलक्षणनिश्चयमोक्षमार्गसाधकं व्यवहारमोक्षमार्गं जानी
हि त्वं येन ज्ञातेन कर्मभूतो न विभ्यसि परंपरया पवित्रो परमात्मा न विभ्यसीति ॥ व्यवहारनिश्चयमोक्षमार्गस्वरूपं कथ्यते
॥ तद्यथा ॥ वीतरागसर्वज्ञप्रणीतषट्द्रव्यादिसम्यक्श्रद्धानज्ञानव्रताद्यनुष्ठानरूपो व्यवहारमोक्षमार्गः साध्यो निश्चयनिजशुद्धा
त्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपो निश्चयमोक्षमार्गः निर्विकल्पः तत्काले सविकल्पमोक्षमार्गो नास्ति कथं साधको भवतीति
॥ अत्र परिहारमाह ॥ भूतनैगमनयेन परंपरया भवतीति ॥ अथवा ॥ सविकल्पनिर्विकल्पभेदेन निश्चयमोक्षमार्गो द्विधा
तत्रानंतज्ञानादिरूपोऽहमित्यादि सविकल्परूपः साधको भवति निर्विकल्पसमाधिरूपो साध्यो भवतीति भावार्थः ॥ सविक
ल्पनिर्विकल्पनिश्चयमोक्षमार्गविषये संवादगाथामाह ॥ जं पुण सगयं तच्चं सवियप्पं होइ तह य अवियप्पं । सविय ६९
प्पं सासवयं कप्पं ॥ इत्यादि ॥ एवं पूर्वोक्त एकोनविंशतिसूत्रप्रमितस्थलमध्ये निश्चयव्यवहारमोक्षमार्गप्रतिपादनरूपेण सू

त्रत्रयं गतं ॥ इदानीं चतुर्दशसूत्रपर्यंतं व्यवहारमोक्षमार्गप्रथमावयवभूतव्यवहारसम्यक्त्वमुख्यत्वेन प्रतिपादयति ॥ त
द्यथा ॥ दव्वइं जाणइ जहठियइं तह जगि मण्णइ जो जि । अप्पहं केरउ भावडउ अविचलु दंसणु सो जि ॥ दव्वइं इत्यादि ॥
दव्वइं जाणइ द्रव्याणि जानाति कथंभूतानि जहठियइं यथास्थितानि वीतरागस्वसंवेदनलक्षणस्य निश्चयस
म्यग्ज्ञानस्य परंपरया कारणभूतेन परमागमज्ञानेन परिच्छिनत्ति न केवलं परिच्छिनत्ति तह तथैव जगि इह जगति
मण्णइ मन्यते निजात्मद्रव्यमेवोपादेयमिति रुचिरूपं यन्निश्चयसम्यक्त्वं तस्य परंपरया कारणभूतेन सम्यग्दर्शनं ॥ मू
ढत्रयं मदाश्चाष्टौ तथानायतनानि षट् । अष्टौ शंकादयश्चेति दृग्दोषाः पंचविंशतिरिति श्लोककथितपंचविंशतिसम्य
क्त्वमलत्यागेन श्रद्धातीति ॥ एवं द्रव्याणि जानाति श्रद्धाति कोसौ अप्पहं केरउ भावडउ आत्मनः केरउ संबंधि भावः परिणा
मः किंविशिष्टो भावः अविचलु अविचलोऽपि चलमलिनावगाढदोषरहितः दंसणु दर्शनं सम्यक्त्वं भवतीति कथं सो जि

परमात्म० एवंहवे किल जीव भावय इति ॥ अयमत्र भावार्थः ॥ इदमेव सम्यक्त्वं चिंतामणिरिदमेव कल्पवृक्ष इदमेव कामधेनुरिति मत्वा भो
६६ गाकांक्षास्वरूपादिसमस्तविकल्पजालं वर्जनीयमिति ॥ तथा चोक्तं ॥ हस्ते चिंतामणिर्यस्य गृहे यस्य कल्पद्रुमः कामधेनुर्ध
नं यस्य तस्य का प्रार्थना परः ॥ १४३ ॥ अथ यैः षड्द्रव्यैः सम्यक्त्वविषयभूतैस्त्रिभुवनं भृतं तिष्ठति तानीदृग्जानीहि इत्यभि
प्रायं मनसि संप्रधार्य सूत्रमिदं कथयति ॥ छ ॥ दव्वइं जाणहि ताइं छह तिहुयणु भरियउ जेहिं यैः कर्तृभूतैः
पुनरपि किंविशिष्टैः आइविणासविवज्जियहिं द्रव्यार्थिकनयेनादिविनाशविवर्जितैः पुनरपि कथंभूतैः णाणिहिं प
भणियएहिं ज्ञानिभिः प्रभणितैः कथितैश्चेति ॥ अयमत्राभिप्रायः एतैः षड्भिर्द्रव्यैर्निष्पन्नोऽयं लोको न चान्यः कोऽपि लो-
कस्य कर्ता हर्ता रक्षको वास्तीति किंच यद्यपि षट्द्रव्याणि व्यवहारसम्यक्त्वविषयभूतानि भवंति तथापि शुद्धनि ६६

×आइविणासविवज्जियहिं णाणिहिं पभणियएहिं ॥ दव्वइं इत्यादि ॥ दव्वइं द्रव्याणि जाणहिं जानीहि त्वं हे प्रभाकरभट्ट ताइं तानि परमागमप्रसिद्धानि कति संख्यो-
पेतानि छह षट् जेहिं यैः द्रव्यैः किं कृतं तिहुयणु भरियउ त्रिभुवनं भृतं जेहिं ×पं०उं०४

श्चयेन शुद्धात्मानुभूतिरूपस्य वीतरागसम्यक्त्वस्य नित्यानंदैकस्वभावो निजशुद्धात्मैव विषयो भवतीति ॥ १४४ ॥ अथ तेषामेव ष
ड्द्रव्याणां संज्ञां कथयति ॥ चेतनाचेतनविभागं च ॥ जीउ सचेयणु दव्वु मुणि पंच अचेयण अन्न । पुग्गलु धम्माहम्मु नहु
कालिं सहिया भिन्न ॥ जीउ इत्यादि ॥ जीउ सचेयणु दव्वु चिदानंदैकस्वभावो जीवश्चेतनद्रव्यं भवति मुणि मन्यस्व जानीहि
त्वं पंच अचेयण पंचाचेतनानि ॥ अण्ण जीवादन्यानि तानि कानि पुग्गलु धम्माहम्मु णहु पुद्गलधर्माधर्मनभांसि कथंभू-
तानि तानि कालिं सहिया कालद्रव्येण सहितानि पुनरपि कथंभूतानि भिन्न स्वकीयस्वकीयलक्षणेन परस्परं भिन्ना
नीति ॥ तथा हि ॥ द्विधा सम्यक्त्वं सरागवीतरागभेदेन सरागसम्यक्त्वलक्षणं कथ्यते । प्रशमसंवेगानुकंपास्तिक्याभिव्यक्ति
लक्षणं सरागसम्यक्त्वं भण्यते तदेव व्यवहारसम्यक्त्वमिति तस्य विषयभूतानि षट्द्रव्याणीति वीतरागसम्यक्त्वं निजशु
द्धात्मानुभूतिलक्षणं वीतरागचारित्राविनाभूतं तदेव निश्चयसम्यक्त्वमिति ॥ अत्राह प्रभाकरभट्टः । निजशुद्धात्मैवो

×भवतीति बहुधा व्याख्यातं पूर्वं भवद्भिः इदानीं पुनः वीतरागचारित्राविनाभूतं निश्चयसम्यक्त्व ×पं० ३१

परमात्म॰ ६७ पादेय इति रुचिरूपं निश्चयसम्यक्त्वं व्याख्यातमिति पूर्वापरविरोधः कस्मादिति चेत् निजशुद्धात्मैवोपादेय इति रुचिरूपं नि
श्चयसम्यक्त्वं गृहस्थावस्थायां तीर्थंकरपरमदेवभरतसगररामपांडवादीनां विद्यते न च तेषां वीतरागचारित्रमस्तीति प
रस्परविरोधः अस्ति चेत्तर्हि तेषामसंयमत्वं कथमिति पूर्वपक्षः। अत्र परिहारमाह। तेषां शुद्धात्मोपादेयभावनारूपं निश्च
यसम्यक्त्वं विद्यते परं किंतु चारित्रमोहोदयेन स्थिरता नास्ति व्रतप्रतिज्ञाभंगो भवतीति तेन कारणेनासंयता वा भण्यं
ते शुद्धात्मभावनायुताः संतः भरतादयो निर्दोषिपरमात्मनामर्हत्सिद्धानां गुणस्तववस्तुस्तवरूपस्तवनादिकं कुर्वंति तच्च
रित्रपुराणादिकं च समाकर्णयंति तदाराधकपुरुषाणामाचार्योपाध्यायसाधूनां विषयकषायदुर्ध्याननिवंचनार्थं संसारस्थि
तिछेदनार्थं च दानपूजादिकं कुर्वंति तेन कारणेन शुभरागयोगात् सरागसम्यग्दृष्टयो भवंति या पुनस्तेषां सम्यक्त्वस्य ६७
निश्चयसम्यक्त्वस्य परंपरया साधकत्वादिति वस्तुवृत्त्या तत्सम्यक्त्वं सरागसम्यक्त्वाख्यं व्यवहारसम्यक्त्वमेवेति भावार्थः।

×सम्यक्त्वसंज्ञा सा हि वीतरागचारित्राविनाभूतस्य निश्चय ×पं० ८ नी १

।छ।। अथ। पुग्गलु छव्विहु मुत्तु वढ इयर अमुत्तवियाणि धम्माहम्मु वि गइठियहँ कारणु पभणहि णाणि।। पुग्गल इत्यादि।
पुग्गलु पुद्गलद्रव्यं छव्विहु षड्विधं। तथा चोक्तं। पुढवी जलं च छाया चउरिंदियविसयकम्मपाउग्गा। कम्मातीदा एवं छब्भेया पु
ग्गला होंति।। एवं तत्कथं भवति। मुत्तु स्पर्शरसगंधवर्णवती मूर्तिरिति वचनान्मूर्त्तं वढ वत्स पुत्र इयर इतराणि पुद्गलात्शेष
द्रव्याणि अमुत्तु स्पर्शाद्यभावादमूर्त्तानि वियाणि विजानीहि त्वं धम्माहम्मु वि धर्माधर्मद्वयमपि गइठियहँ गतिस्थित्योः का
रणु कारणं निमित्तं निमित्तं पभणहिं भणंति कथयंति के कथयंति णाणि वीतरागस्वसंवेदनज्ञानिन इति अत्र इष्टव्यं यद्य
पि वज्रवृषभनाराचसंहननरूपेण पुद्गलद्रव्यं मुक्तिगमनकाले सहकारिकारणं भवति तथापि धर्मद्रव्यं च गतिसहकारि
कारणं भवति अधर्मद्रव्यं च लोकाग्रे स्थितस्य स्थितिसहकारिकारणं भवति यद्यपि मुक्तात्मप्रदेशा मध्ये परस्परैकक्षेत्रा
वगाहेन तिष्ठंति तथापि निश्चयेन विशुद्धज्ञानदर्शनस्वभावपरमात्मनः सकाशाद्भिन्नस्वरूपेण मुक्तौ तिष्ठंति तथात्र संसारे

चेतनाकारणं निर्द्देश्या निवृत्तिभावार्थः ॥२४॥ अथ ॥ दव्वइं सयलइं वरिठियइं णियमिं जासु वसंति तंणह दव्वु विया
णि तुहुं जिणवरु एउ भणंति ॥ द्रव्याणि द्रव्याणि कतिसंख्योपेतानि सयलइं समस्तानि उवरिठियइं उदरे स्थितानि नियमे
निश्चयेन जासु यस्य वसंति तिष्ठंति आधाराधेयभावेन तिष्ठंति तं तत् णहदव्वु नभआकाशद्रव्यं वियाणि विजानीहि तुहुं त्वं हे प्रभा
करभट्ट जिणवर जीनवर वीतरागसर्वज्ञाः एवं भणंति एतद्भणंति कथयंतीति ॥ अयमत्र भावार्थः ॥ यद्यपि परस्परैकक्षे
त्रावगाहेन तिष्ठत्याकाशं तथापि साक्षादुपादेयभूतानंतसुखस्वरूपात्परमात्मनः सकाशाद्द्रव्यं तत् भिन्नत्वाद्धेयमिति ॥२५॥
॥ कालु मुणिज्जहि दव्वु तुहुं वट्टणलक्खणु एउ रयणहं रासि विभिण्णु जिम तसु अणुयहं तह भेउ ॥ कालु कालं मुणिज्जहि
मन्यस्व जानीहि किं जानीहि दव्वु कालसंज्ञं द्रव्यं कथंभूतं वट्टणलक्खणु वर्त्तनालक्षणं स्वयमेव परिणममानानां द्र ६८
व्याणां बहिरंगसहकारिकारणं किंवदिति चेत् कुंभकारचक्रस्याधस्तनशिलावदिति एउ एतत् प्रत्यक्षीभूतं तस्य का
लद्रव्यस्यासंख्येयप्रमितस्य परस्परभेदविषये दृष्टांतमाह रयणहं रासि रत्नानां राशिः कथंभूतः विभिन्नु विशेषेण स्वरू
पव्यवधानेन भिन्नः जिम यथा तसु तस्य कालद्रव्यस्य अणुयहं अणूनां कालाणूनां तह तथा भेउ भेद इति अत्राह शिष्यः
समय एव निश्चयकालः तस्मादन्यो निश्चयकालसंज्ञं कालद्रव्यं नास्ति ॥ अत्र परिहारमाह ॥ समयस्तावत्पर्यायः कस्माद्विनश्व
रत्वात् ॥ तथा चोक्तं ॥ समयस्य विनश्वरत्वं समउप्पन्नपधंसी इति स च पर्यायो द्रव्यं विना न भवतीति कस्य द्रव्यस्य भवतीति
विचार्यते यदि पुद्गलद्रव्यस्य पर्यायो भवति तर्हि पुद्गलपरमाणुपिंडनिष्पन्नघटादयो यथा मूर्त्ता भवंति तथा अणोरणंतरव्य
तिक्रमणकृतः समयस्वरूपः संपुटविघटनकृतो निमिष जलभाजनहस्तादिव्यापारकृता घटिका आदित्यबिंबदर्शना
त् जातो दिवस इत्यादिकालपर्याया मूर्त्ता दृष्टिविषयाः प्राप्नुवंति कस्मात् पुद्गलद्रव्योपादानकारणैर्जनितघटादिवदेव
न च तथा समयनिमिषघटिकादिवसादिकालपर्याया मूर्त्ता दृश्यंते ये पुनः पुद्गलपरमाणुमंदगतिगमननयनपुटविघ
×जातत्वात् घटादिवदिति ॥ तथा चोक्तं ॥ उपादानकारणसदृशं कार्यं भवति मृत्पिंड उपादानकारण ×पं०ऊँ०नी०२

टनजलभाजनहस्तादिव्यापारदिनकरबिंबगमनादिभिः पुद्गलपर्यायभूतैः क्रियाविशेषैः समयादिकालपर्यायाः परिच्छिद्यंते
नेचाणुव्यतिक्रमणादयस्तेषामेवसमयादिकालपर्यायाणांव्यक्तिनिमित्तत्वेनबहिरंगसहकारिकारणभूताएवज्ञातव्याः न
चोपादानकारणभूताएवज्ञातव्याः नचोपादानकारणभूताघटोत्पत्तौकुंभकारचक्रचीवरादिवत् तस्मात्ज्ञायते तत्कालद्रव्य
ममूर्त्तमविनश्वरमस्तीति तस्यतत्पर्यायाः समयनिमिषादयइति अत्रेदंतुकालद्रव्यंसर्वप्रकारेणोपादेयभूतात्शुद्धबुद्धैक
स्वभावात् जीवद्रव्याद्भिन्नत्वाद्धेयमितितात्पर्यार्थः ॥६७॥ अथजीवपुद्गलकालद्रव्याणिमुक्त्वाशेषधर्माधर्माकाशान्येकद्रव्याणि
तिनिरूपयति ॥ जीउविपुग्गलुकालुजिय एमिल्लेविणुदव्वइयरअखंडवियाणितुहुं अप्पपएसहिंसव्व ॥जीउइत्यादि॥ जीउ
विजीवोपि पुग्गलु पुद्गलः कालु कालः जियहे जीव एमिल्लेविणु एतानिमुक्त्वा दव्वइं द्रव्याणि इयर इतराणि धर्माधर्माकाशानि अ
खंड अखंडद्रव्याणि वियाणि विजानीहि तुहुं त्वं हे प्रभाकरभट्ट केकृत्वाखंडानि विजानीहि अप्पपएसहिं आत्मप्रदेशैः कतिसं
ख्योपेतानि सव्व सर्वाणीति ॥तथाहि॥ जीवद्रव्याणिपृथक्पृथक्जीवद्रव्यगणनेनानंतसंख्यानि पुद्गलद्रव्याणितेभ्योप्यनंतगुणानि
भवंति धर्माधर्माकाशानिपुनरेकद्रव्याण्येवेति अत्रजीवद्रव्यमेवोपादेयंतत्रापि यद्यपिशुद्धनिश्चयेनशक्त्यपेक्षयासर्वेजीवाउपा
देयास्तथापिव्यक्त्यपेक्षयापंचपरमेष्ठिन एवतेष्वपिमध्येविशेषेणार्हत्सिद्धा एवतयोरपिमध्येसिद्धाएवपरमार्थेनतुमिथ्यात्वरागा
दिविभावपरिणामनिवृत्तिकालेस्वशुद्धात्मैवोपादेयइत्युपादेयपरंपराज्ञातव्येतिभावार्थः ॥६८॥ अथजीवपुद्गलौसक्रियौधर्मा
धर्माकाशकालद्रव्याणिनिःक्रियाणीतिप्रतिपादयति ॥ दव्वचयारिविइयरजियगमणागमणविहीण जीउविपु
ग्गलुपरिहरिविपभणहिंणाणिपवीण ॥दव्वइत्यादि॥ दव्वइं द्रव्याणि कतिसंख्योपेतानि चयारि चत्वारिविइयर अपि इतराणि जीवपुद्गला
भ्यामितराणि जियहे जीव कथंभूतानि तानि गमणागमणविहीण गमनागमनविहीनानि निःक्रियाणि चलनक्रियाविहीनानि
किंकृत्वा जीउविपुग्गलुपरिहरिवि जीवपुद्गलौपरिहृत्य पभणहिं एवं प्रभणंति कथयंति के ते णाणिपवीण भेदाभेदरत्नत्रया

DR BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी
६९

परमात्म: ७०

राधका विवेकिन इत्यर्थः ॥ तथाहि ॥ जीवानां संसारावस्थायां गतेः सहकारिकारणभूताः कर्मनोकर्मपुद्गलाः कर्मनोकर्माभा
वात्सिद्धानां निःक्रियत्वं भवति पुद्गलस्कंधानां तु कालाणुरूपं कालद्रव्यं गतेर्बहिरंगनिमित्तं भवति अनेन विमुक्तं भवति अविभा
गि व्यवहारकालसमयमुत्पत्तौ मंदगतिपरिणत पुद्गलपरिमाणुः घटोत्पत्तौ कुंभकारवद्बहिरंगनिमित्तेन व्यंजको व्यक्तिकार
को भवति कालद्रव्यं तु मृत्पिंडवदुपादानकारणं भवति तस्य तु पुद्गलपरमाणोर्धर्मद्रव्यं गतिगमनकाले यद्यपि धर्मद्रव्यं सहका
रिकारणमस्ति तथापि कालाणुरूपं निश्चयकालद्रव्यं च सहकारिकारणं भवति सहकारिकारणानि बहून्यपि भवंति मत्स्यानां
धर्मद्रव्ये विद्यमानेपि कर्मनोकर्मपुद्गलागतेः सहकारिकारणं पुद्गलानां तु कालद्रव्यं गतेः सहकारिकारणं कुत्र भणि
तमास्ति इति चेत् पंचास्तिकायप्राभृते श्रीकुंदकुंदाचार्यदेवैः सक्रियनिःक्रियव्याख्यानकाले भणितमस्ति ॥ जीवा पुग्गल ७०
काया सहस्सकिरिया हवंति णय सेसा पुग्गलकरणा जीवा खंधा खलु कालकरणेहिं ॥ पुद्गलस्कंधानां धर्मद्रव्ये विद्यमाने

पि द्रव्यकालो गतेः सहकारिकारणं भवतीत्यर्थः ॥ अत्र निश्चयनयेन निःक्रियसिद्धस्वरूपसमानं निजशुद्धात्मद्रव्यमुपादेयमिति
तात्पर्यं ॥ तथा चोक्तं ॥ निश्चयनयेन निःक्रियजीवलक्षणं यावत्क्रियां प्रवर्त्तते तावद्द्वैतस्य गोचरः ॥ अद्वये निष्कले प्राप्ते निःक्रियस्य
कुतः क्रियाः ॥ २२ ॥ अथ ॥ पंचास्तिकायस्सूचनार्थं कालद्रव्यमप्रदेशं विहाय कस्य द्रव्यस्य कियंतः प्रदेशा भवंतीति कथयति
॥ धम्माधम्मु वि एक्कु जिउ ए जि असंखपदेस गयणु अणंतपएसमुणि बहुविह पुग्गलदेस ॥ धम्माधम्मु इत्यादि ॥ धर्माधर्मौ विधर्माधि
र्म द्वितयमेव एक्कु जिउ एकोपि विवक्षितो जीवः ए जि एतान्येव त्रीणि द्रव्याणि ॥ असंखपएस ॥ असंख्येयप्रदेशानि भवंति गय
णु गगनं अणंतपएसि अनंतप्रदेशं मुणि मन्यस्व जानीहि बहुविह बहुविधा भवंति के ते पुग्गलदेस पुद्गलप्रदेशाः अत्र पुद्गल
द्रव्यप्रदेशविवक्षया प्रदेशशब्देन परमाणवो ग्राह्या न च क्षेत्रप्रदेशा इति कर्मानुपुद्गलस्यानंतक्षेत्रप्रदेशाभावादिति ॥ अथवा पाठांत
रं ॥ पुग्गलु तिविहु पएसु पुद्गलद्रव्ये संख्यातासंख्यातानंतरूपेण त्रिविधाः प्रदेशाः परमाणवो भवंतीति अत्र निश्चयेन द्रव्यकर्माभावा

परमात्म: दृष्टत्वात्मिथ्यात्वरागादिरूपभावकर्मसंकल्पविकल्पाभावात्शुद्धोलोकाकाशप्रमाणेनासंख्येयाःप्रदेशाः यस्यशुद्धात्मनः सशुद्धात्मावी
७१ तरागनिर्विकल्पसमाधिपरिणतिकालेसाक्षादुपादेयइतिभावार्थः ॥२४॥ अथलोकेयद्यपिव्यवहारेणैकक्षेत्रावगाहेनतिष्ठंतिद्रव्या
णितथापिनिश्चयेनसंकरव्यतिकरपरिहारेणस्वकीयस्वकीयस्वरूपंनत्यजंतीतिदर्शयति ॥ लोयागासुधरेविजियकहि
यइंदव्वइंजाइं एक्कहिंमिलियइंएत्थुजगिसगुणहिंणिवसहिंणिवसहिंताइं ॥लोयागास इत्यादि॥ लोयागासु लोकाकाशंकर्मतापन्नं
न्नंधरेविधृत्वामर्यादीकृत्वाजियहेजीव अथवालोकाकाशमाधारीकृत्वाठियाइंआधेयरूपेणस्थितानिकानिस्थितानिकहि
यइंदव्वइंजाइंकथितानिजीवादिद्रव्याणियानिपुनःकथंभूतानिएक्कहिंमिलियइंएकत्वेमिलितानिएत्थुजगिअत्रजगतिस
गुणहिंनिवसहिंनिश्चयनयेनस्वकीयगुणेषुनिवसंति सगुणेहिं तृतीयांतकरणपदंस्वगुणेष्वधिकरणंजातमिति ननुकथितं ७१
पूर्वंप्राकृतेकारकव्यभिचारोलिंगव्यभिचारश्चक्वचिद्भवतीति कानिनिवसंतिताइंतानिपूर्वोक्तानिजीवादिषट्द्रव्याणीति तथा॥

यद्यप्युपचरितासद्भूतव्यवहारेणाधाराधेयभावेनैकक्षेत्रावगाहेनतिष्ठंति तथापिशुद्धपारिणामिकपरमभावग्राहकेनशुद्धद्र
व्यार्थिकनयेनसंकरव्यतिकरपरिहारेणस्वकीयस्वकीयसामान्यविशेषगुणान्नत्यजंतीति अत्राहप्रभाकरभट्टः हेभगवन्लोक
स्तावदसंख्यातप्रदेशःपरमागमेभणितंतिष्ठति तत्रासंख्यातप्रदेशेलोकेप्रत्येकंमसंख्येयप्रदेशाअनंतजीवद्रव्याणितत्रचैकैके
जीवद्रव्येकर्मनोकर्मरूपेणानंतानिपुद्गलपरमाणुद्रव्याणिचतिष्ठंति तेभ्योप्यनंतगुणानिशेषपुद्गलद्रव्याणितिष्ठंति तानिस
र्वाण्यसंख्येयप्रदेशेलोकेकथमवकाशंलभंतेइतिपूर्वपक्षः भगवान्परिहारमाह अवगाहनशक्तियोगादिति ॥तद्यथा॥ य
थैकस्मिन्गूढनागरसगद्याणकेसतसहस्रलक्षसुवर्णसंख्याप्रमितान्यवकाशंलभंते अथवायथैकस्मिन्प्रदीपप्रकाशेबहवो
पिप्रदीपप्रकाशाअवकाशंलभंते अथवायथैकस्मिन्भस्मघटेजलघटःसम्यगवकाशंलभंति अथवायथैकस्मिन्उष्ट्रीक्षीरघ
टेमधुघटःसम्यगवकाशंलभंते अथवायथैकस्मिन्भूमिगृहेबहवोपिपटहजयघंटादिशब्दाःसम्यगवकाशंलभंते तथै
कस्मिन्लोकेविशिष्टावगाहनशक्तियोगात्पूर्वोक्तानंतसंख्याजीवपुद्गलाअवकाशंलभंतेनास्तिविरोधइति ॥तथाचोक्तं॥

परमात्म: ७२

जीवानामवगाहनशक्तिस्वरूपं परमागमे ॥ एगणिगोदसरीरे जीवा दव्वप्पमाणदो दिट्ठा सिद्धेहिं अणंतगुणा सव्वेण वितीदकालेण
पुनस्तथा चोक्तं पुद्गलानामवगाहनशक्तिस्वरूपं ओगाढगाढणिचिदो पुग्गलकाएहिं सव्वदो लोगो सुहमेहिं बादरेहिं य अणंताणंते
हिं विविहेहिं ॥ अयमत्र भावार्थः यद्यप्येकावगाहेन तिष्ठंति तथापि शुद्धनिश्चयेन जीवाः केवलज्ञानाद्यनंतगुणस्वरूपं न त्यजंति
पुद्गलाश्च वर्णादिस्वरूपं न त्यजंति शेषद्रव्याणि च स्वकीयस्वकीयस्वरूपं न त्यजंति ॥१५०॥ अथ जीवस्य व्यवहारेण शेषपंचद्रव्य
कृतमुपकारं कथयति तस्यैव जीवस्य निश्चयेन तान्यपि दुःखकारणानि च कथयति एयइं दव्वइं देहियहं णिय णिय कज्जु जणंति
चउगइदुक्खसहंत जिय तें संसारु भमंति ॥ एयइं इत्यादि ॥ एयइं एतानि दव्वइं जीवादन्यद्रव्याणि देहियहं देहिनां संसारिजी
वानां किं कुर्वंति णिय णिय कज्जु जणंति निजनिजकार्यं जनयंति येन कारणेन निजनिजनिजकार्यं जनयंति चउगइदुक्खस
हंत जिय चतुर्गतिदुःखं सहमानाः संतो जीवास्तें संसारु भमंति तेन कारणेन संसारं भ्रमंतीति ॥ तथाच ॥ पुद्गलस्तावज्जीव ७२
स्य स्वसंवित्तिविलक्षणविभावपरिणमरतस्य व्यवहारेण शरीरवाङ्मनःप्राणापाननिष्पत्तिं करोति धर्मद्रव्यं चानुपचरितास

द्भूतव्यवहारेण गतिसहकारित्वं करोति तथैवाधर्मद्रव्यं स्थितिसहकारित्वं करोति एवं पंचद्रव्याणामुपकारं लब्ध्वा जीवो निश्च
यव्यवहाररत्नत्रयभावनाच्युतः सन् चतुर्गतिदुःखं सहत इति भावार्थः ॥१५१॥ अथैवं पंचद्रव्याणां स्वरूपं निश्चयेन दुःखकारणं
ज्ञात्वा हे जीव निजस्वभावोपलंभलक्षणे मोक्षमार्गे स्थीयते इति निरूपयति ॥ दुक्खहं कारण दुःखस्य कारणं मुणिवि जिय दव्वहं
एहु सहाउ होइ विमुक्खहं मग्गि लहु गम्मिज्जइ परलोउ ॥ दुक्खहं कारण दुःखस्य कारणं मुणिवि मत्वा ज्ञात्वा जिय हे जीव किं दुःख
स्य कारणं ज्ञात्वा दव्वहं एहु सहाउ द्रव्याणामिमं शरीरं वाङ्मनःप्राणापाननिष्पत्त्यादिलक्षणं पूर्वोक्तस्वभावं एवं पुद्गलादिपंचद्रव्य
स्वभावं दुःखस्य कारणं ज्ञात्वा किं क्रियते होइवि भूत्वा क्व मोक्खहं मग्गि मोक्षस्य मार्गे लहु शीघ्रं पश्चात् गम्मिज्जइ गम्यते कर्मतापन्नः प
रलोउ परलोको मोक्ष इति ॥ तथाहि ॥ वीतरागसदानंदैकस्वाभाविकसुखविपरीतस्याकुलत्वोत्पादकस्य दुःखस्य कारणानि पु
द्गलादिपंचद्रव्याणि ज्ञात्वा हे जीव भेदाभेदरत्नत्रयलक्षणे मोक्षस्य मार्गे स्थित्वा परः परमात्मा तस्यावलोकनमनुभ
वनं परमसमरसीभावेन परिणमनं परलोको मोक्षः स च गम्यत इति भावार्थः ॥१५२॥ अथेदं व्यवहारेण भव्यानलि

तेषां जीवद्रव्यादिश्रद्धानरूपं सम्यग्दर्शनमिदानीं सम्यग्ज्ञानसम्यक्चारित्रद्वयं चाकर्णयेत्यभिप्रायं मनसि

७३ धृत्वा सूत्रमिदं प्रतिपादयति ॥ णियमिं कहियउ एहु मइं ववहारेण वि दिट्ठि । एवहिं णाणु चरित्तु सुणि जें पावहि परमेट्ठि

॥ णियमिं इत्यादि ॥ णियमें नियमेन निश्चयेन कहियउ कथिता एहु एषा मइं मया कर्तृभूतेन मया केन ववहारेण वि व्यवहार

नयेनैव एषा का कथिता दिट्ठि दृष्टिः दृष्टिः कोर्थः सम्यक्त्वं एवहिं इदानीं णाणु चरित्तु सुणि हे प्रभाकरभट्ट क्रमेण ज्ञानचारि

त्रद्वयं शृणु येन श्रुतेन किं भवति जें पावहि येन सम्यग्ज्ञानचारित्रद्वयेन प्राप्नोषि किं प्राप्नोषि परमेट्ठि परमेष्ठिपदं मुक्तिप

दमिति ॥ अतो व्यवहारसम्यक्त्वविषयभूतानां द्रव्याणां चूलिकारूपेण व्याख्यानं क्रियते ॥ तद्यथा ॥ परिणाम जीव मुत्तं सपदेस

एय खित्त किरिया य णिच्चं कारण कत्ता सव्वगदं इदरं हि य पवेसो ॥ परिणाम इत्यादि ॥ परिणाम परिणामिनौ जीवपुद्गलौ स्व

भावविभावपरिणामाभ्यां शेषचत्वारि द्रव्याणि जीवपुद्गलवद्विभावव्यंजनपर्यायाभावात् मुख्यवृत्त्या पुनरपरिणामीति । ७३

जीवः शुद्धनिश्चयनयेन विशुद्धज्ञानदर्शनस्वभावं शुद्धचैतन्यं प्राणशब्देनोच्यते तेन जीवतीति जीवः व्यवहारनयेन पुनः

कर्मेंद्रियजनितद्रव्यभावरूपैश्चतुर्भिः प्राणैर्जीवति जीविष्यति जीवितपूर्वो वा जीवः पुद्गलादिपंचद्रव्याणि पुनरजीवरूपाणि मु

त्तं अमूर्तं शुद्धात्मनो विलक्षणा स्पर्शरसगंधवर्णवती मूर्तिरुच्यते तत्सद्भावान्मूर्तः पुद्गलः जीवद्रव्यं पुनरनुपचरितासद्भूतव्यव

हारेण मूर्तमपि शुद्धनिश्चयनयेनामूर्तं धर्माधर्माकाशकालद्रव्याणि चामूर्तानि सपदेसं लोकमात्रप्रमितासंख्येयप्रदेशल

क्षणं जीवद्रव्यमादिं कृत्वा पंचद्रव्याणि पंचास्तिकायसंज्ञानि सप्रदेशानि कालद्रव्यं पुनर्बहुप्रदेशत्वलक्षणकायत्वाभावादप्र

देशं एय द्रव्यार्थिकनयेन धर्माधर्माकाशद्रव्याण्येकानि भवंति जीवपुद्गलद्रव्याणि पुनरनेकानि भवंति खित्त सर्वद्रव्याणामव

काशदानसामर्थ्यात् क्षेत्रमाकाशमेकं शेषपंचद्रव्याण्यक्षेत्राणि किरियाय क्षेत्रात् क्षेत्रांतरगमनरूपा परिस्पंदवती चल

नवती क्रिया सा विद्यते ययोस्तौ क्रियावंतौ जीवपुद्गलौ धर्माधर्माकाशकालद्रव्याणि पुनर्निष्क्रियाणि णिच्चं धर्माधर्माकाश

कालद्रव्याणि यद्यप्यर्थपर्यायत्वेनानित्यानि तथापि मुख्यवृत्त्या विभावव्यंजनपर्यायाभावात् नित्यानि द्रव्यार्थिकनयेन

जीवपुद्गलौ पुनः यद्यपि द्रव्यार्थिकनयापेक्षया नित्यौ तथाप्यगुरुलघुपरिणतिरूपस्वस्वभावपर्यायापेक्षया विभावव्यं

परमात्मः
७४

ञ्जनपर्यायापेक्षया चानित्या अकारणं पुद्गलधर्माधर्माकाशकालद्रव्याणि व्यवहारनयेन जीवस्य शरीरवाङ्मनःप्राणापानादिगति
स्थित्यवगाहवर्तनकार्याणि कुर्वंतीति कारणानि भवंति जीवद्रव्यं पुनर्यद्यपि गुरुशिष्यादिरूपेण परस्परोपग्रहं करोति ॥ तथापि
पुद्गलादिपंचद्रव्याणां किमपि न करोतीत्यकारणं कर्ता शुद्धपारिणामिकपरमभावग्राहकेन शुद्धद्रव्यार्थिकनयेन यद्य
पि बंधमोक्षद्रव्यभावरूपपुण्यपापघटपटादीनां अकर्ता जीवस्तथापि अशुद्धनिश्चयेन शुभाशुभोपयोगाभ्यां परिणतः स
न् पुण्यपापबंधयोः कर्ता तत्फलभोक्ता च भवति ॥ विशुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठान
रूपेण शुद्धोपयोगेन तु परिणतः सन् मोक्षस्यापि कर्ता तत्फलभोक्ता च शुभाशुभशुद्धपरिणामानां परिणमनमेव कर्तृत्वं स
र्वत्र ज्ञातव्यमिति पुद्गलादिपंचद्रव्याणां च स्वकीयस्वकीयपरिणामेन परिणमनमेव कर्तृत्वं वस्तुवृत्त्या पुनः पुण्यपापादि
रूपेणाकर्तृत्वमेव सर्वगतं लोकालोकव्याप्त्यपेक्षया सर्वगतमाकाशं भण्यते धर्माधर्मौ च लोकव्याप्त्यपेक्षया सर्वगतौ जी
वद्रव्यं पुनरेकजीवापेक्षया लोकपूरणावस्थां विहाय असर्वगतं नानाजीवापेक्षया सर्वगतमेव भवतीति ॥ पुद्गलद्र ७४

शेषपुद्गलापेक्षयासर्वगतत्वं न भवतीति कालद्रव्यं पुनरेककालाणुद्रव्यापेक्षया सर्वगतं स्वो॰पं॰२
व्यं पुनर्लोकरूपमहास्कंधापेक्षया सर्वगतं न भवति लोकप्रदेशप्रमाणनानाकालाणुविवक्षया लोके सर्वगतमेव भवती
इदरं हियपवेसो यद्यपि सर्वद्रव्याणि व्यवहारेण एकक्षेत्रावगाहेनान्योन्यानुप्रवेशेन तिष्ठंति तथापि निश्चयनयेन चेतना
दिस्वकीयस्वकीयस्वरूपं न त्यजंति ॥ तथा चोक्तं ॥ अण्णोण्णं पविसंता दिंता ओगासमण्णमण्णस्स मेलंता वि य णिच्चं सगसब्भावं ण वि
जहंति ॥ इदमत्र तात्पर्यं ॥ व्यवहारसम्यक्त्वविषयभूतेषु षट्द्रव्येषु मध्ये वीतरागचिदानंदैकादिगुणस्वभावं शुभाशु
भमनोवचनकायव्यापाररहितं निजशुद्धात्मद्रव्यमेवोपादेयं ॥ १५४ ॥ एवमेकोनविंशतिसूत्रप्रमितस्थले निश्चयव्यवहा
रमोक्षमार्गप्रतिपादकत्वेन सर्वसूत्रचतुष्टयं गतं ॥ इदं पुनरंतरस्थलं चतुर्दशसूत्रप्रमितं षट्द्रव्यमध्ये यद्भूतव्यवहारसम्य
क्त्वव्याख्यानमुख्यत्वेन समाप्तमिति ॥ अथ संशयविपर्ययानध्यवसायरहितं सम्यग्ज्ञानं प्रकटयति ॥ जं जहथ
क्कउ दव्वु जिय तं तह जाणइ जो जि ॥ अप्पहं केरउ भावडउ णाणु मुणिज्जहि सो जि ॥ जं मित्यादि ॥ जं यत् जह यथा थक्क
उ स्थितं दव्वु द्रव्यं जिय हे जीव तं तत् तह तथा जाणइ जानाति जो जि य एव य एवकः अप्पहं केरउ भावडउ आत्मसंबं

धिभावःपरिणामनाणुमुणिज्जहि ज्ञानंमन्यस्वजानीहि सोजिसएवसर्वोक्तआत्मपरिणामइति ॥तथाच॥ यत्तद्द्रव्यंयथास्थितंसत्ता
लक्षणंउत्पादव्ययध्रौव्यलक्षणंवागुणपर्यायलक्षणंवासप्तभंग्यात्मकंवातत्तथाजानाति ॥ यआत्मसंबंधिस्वपरपरिच्छेदकोभा
वःपरिणामस्तत्सम्यग्ज्ञानंभवति ॥अथमत्रभावार्थः॥ व्यवहारेणसविकल्पावस्थायांतत्त्वविचारकालेस्वपरपरिच्छेदकंज्ञानं
भण्यतेनिश्चयनयेनपुनर्वीतरागनिर्विकल्पसमाधिकालेबहिरुपयोगोयद्यप्यनीहितवृत्त्यानिरस्तस्तथापीहापूर्वकविक
ल्पाभावाद्गौणत्वमितिकृत्वास्वसंवेदनज्ञानमेवज्ञानमुच्यते ॥२५॥ अथस्वपरद्रव्यंज्ञात्वारागादिरूपपरद्रव्यविषयसंक
ल्पविकल्पत्यागेनस्वस्वरूपेअवस्थानंज्ञानिनांचारित्रमितिप्रतिपादयति ॥३०॥ जाणविमण्णविअप्पुपरुजोपरभाउचए
इ सोणिउसुद्धउभावडउणाणिहिंचरणुहवेइ ॥जाणविइत्यादि॥ जाणविसम्यक्ज्ञानेनज्ञात्वा नकेवलंज्ञात्वामण्णवि तत्त्वा
र्थश्रद्धानलक्षणपरिणामेनमत्वाश्रद्धायकं अप्पुपरु आत्मानंपरंच जोयः कर्त्तापरभाउपरभावंचएइ ॥त्यजति॥ सोसश्वो
रूःणिउनिजःसुद्धउभावडउ शुद्धभावःणाणिहिंचरणुहवेइ ज्ञानिनांपुरुषाणांचरणंभवतीति ॥तथाहि॥ वीतरागसह

जानैकस्वभावंस्वद्रव्यंतद्विपरीतंपरद्रव्यंचसंशयविपर्ययानध्यवसायरहितेनज्ञानेनपूर्वंज्ञात्वाशंकादिदोषरहिते
नसम्यक्त्वपरिणामेनश्रद्धायच यःकर्त्तामायामिथ्यानिदानशल्यप्रभृतिसमस्तचिंताजालत्यागेननिजशुद्धात्मस्वरूपेपर
मानंदसुखरसास्वादतृप्तोभूत्वातिष्ठति सपुरुषएवाभेदेननिश्चयचारित्रंभवतीति ॥इतिभावार्थः॥ एवंमोक्षमोक्षफलमो
क्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्येनिश्चयव्यवहारमोक्षमार्गमुख्यत्वेनसूत्रत्रयंषट्द्रव्यश्रद्धानलक्षणव्य
वहारसम्यक्त्वव्याख्यानमुख्यत्वेनसूत्राणिचतुर्दशसम्यग्ज्ञानचारित्रमुख्यत्वेनसूत्रद्वयमिति ॥समुदायेनैकोनविंशति
सूत्रस्थलंसमाप्तं ॥ अथानंतरमभेदरत्नत्रयव्याख्यानमुख्यत्वेनसूत्राष्टकंकथ्यते तत्रादौतावत्रत्नत्रयभावनानुकूलभ
व्यजीवस्यलक्षणंप्रतिपादयति ॥३१॥ जोभत्तउरयणत्तयहंतसुमुणिलक्खणुएउ अप्पामिल्लिविगुणणिलउतासुविअ
ण्णुणजेउ ॥जोइत्यादि॥ जोयःभत्तउ भक्तः कस्यरयणत्तयहं रत्नत्रयस्यतसुतस्यजीवस्यमुणिमन्यस्वजानीहि
हेप्रभाकरभट्टकिंजानीहिलक्खणुलक्षणंएउइदमेवप्रमाणंइदं किंअप्पामिल्लिवि आत्मानंमुक्त्वा किंविशिष्टंगुण

MEMORIAL BHAU DAJI

निजकं गुणरहं ॥ तासु वि ॥ तस्यैव जीवस्य लक्षणं जेउ निश्चयेनान्यद्रव्यं ध्येयं न भवतीति ॥ तथाहि ॥ व्यवहारेण वीत
रागसर्वज्ञप्रणीतशुद्धात्मतत्त्वप्रभृतिषड्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थविषये सम्यक्श्रद्धानज्ञानाहिंसादिव्रतशी
लपरिपालनरूपस्य भेदरत्नत्रयस्य निश्चयेन वीतरागसदानंदैकरूपसुखरसास्वादपरिणतनिजशुद्धात्मतत्त्व
सम्यक्श्रद्धानज्ञानानुचरणरूपस्याभेदरत्नत्रयस्य च योसौ भक्तस्तस्येदं लक्षणं जानीहि ॥ इदं किं ॥ यद्यपि व्यवहारेण
सविकल्पावस्थायां चित्तस्थितिकारणार्थं देवेंद्रचक्रवर्त्यादिविभूतिविशेषकारणं परंपरया शुद्धात्मप्राप्तिहेतुभूतं पंचप
रमेष्ठिरूपं स्तववस्तुस्तवगुणस्तवादिकं वचनेन स्तुत्यं भवति मनसा च तदक्षररूपादिकं प्राथमिकानां ध्येयं भवति तथा
पि पूर्वोक्तनिश्चयरत्नत्रयपरिणतिकाले केवलज्ञानाद्यनंतगुणपरिणतः स्वशुद्धात्मैव ध्येय इति अत्रेदं तात्पर्यं योसौ अनं
तज्ञानादिगुणः शुद्धात्मा ध्येयो भणितः स एव निश्चयेनोपादेय इति ॥ १५ ॥ अथ ये ज्ञानिनो निर्मलरत्नत्रयमेवात्मानं म ७६
न्यंते शिवशब्दवाच्यं तमोक्षपदाराधकाः संतो निजात्मानं ध्यायंतीति निरूपयति ॥ ज ॥ जे रयणत्तउ णिम्मलउ णाणिय अप्प

भणंति ते आराहय सिवपयहं णिय अप्पा झायंति ॥ जे इत्यादि ॥ जे ये केचन रयणत्तउ रत्नत्रयं कथंभूतं णिम्मल
उ निर्मलं रागादिदोषरहितं कथंभूता ये णाणिय ज्ञानिनः ॥ किं कुर्वंति ॥ अप्पु भणंति पूर्वोक्तरत्नत्रयस्वरूपमेवा
त्मानं आत्मस्वरूपं कर्मतापन्नं भणंति मन्यंते ते आराहय इयं ते पूर्वोक्ता आराधका भवंति कस्य सिवपयहं शिवशब्दवा
च्यमोक्षपदस्य मोक्षपदाराधकाः संतः किं कुर्वंति णिय अप्पा झायंति निजात्मानं कर्मतापन्नं ध्यायंतीति ॥ तथाहि ॥ ये के
चन वीतरागस्वसंवेदनज्ञानिनः परमात्मानं सम्यक्श्रद्धानज्ञानानुष्ठानलक्षणं निश्चयरत्नत्रयमेवाभेदनयेन निजशुद्धात्मा
त्मानं मन्यंते ते शिवशब्दवाच्यमोक्षपदाराधका भवंति आराधकाः संतः किं ध्यायंति विशुद्धज्ञानदर्शनस्वभावस्वरूपं निश्चय
नयेन ध्यायंति भावयंतीत्यभिप्रायः ॥ १६ ॥ अथात्मानं गुणस्वरूपं रागादिदोषरहितं ये ध्यायंति ते नियमेन शीघ्रं मोक्षं
लभंते इति प्रकटयति ॥ अ ॥ अप्पा गुणमउ णिम्मलउ अणुदिणु जे झायंति ते पर णियमें परममुणि [illegible] णिव्वाणु ल
हंति ॥ अप्पा इत्यादि ॥ अप्पा आत्मानं कर्मतापन्नं कथंभूतं गुणमउ गुणमयं केवलज्ञानाद्यनंतगुणनिर्वृत्तं पुनरपि कथं

=लउणिम

भूतं निजात्मानं निर्मलं भावकर्मद्रव्यकर्मनोकर्ममलरहितं । अणुदिणु दिनं दिनं प्रति अनुदिनमनवरतमित्यर्थः । इ
त्थंभूतमात्मानं जे झायंति ये केचन ध्यायंति ते पर त एव नान्ये नियमेन निश्चयेन । किंविशिष्टास्ते परममुणि परममुन
यः लहु लघु शीघ्रं लहंति लभंते । किं लभंते निव्वाणु निर्वाणमिति । अत्राह प्रभाकरभट्टः । अत्रोक्तं भवद्भिर्यएव शु
द्धात्मध्यानं करोति कुर्वंति त एव मोक्षं लभंते न चान्ये चारित्रसारादौ पुनर्भणितं द्रव्यपरमाणु भावपरमाणु वा ध्यात्वा
केवलज्ञानमुत्पादयंतीत्यत्र विषये अस्माकं संदेहोस्ति । अत्र श्रीयोगींद्रदेवाः परिहारमाहुः । तत्र द्रव्यपरमाणुशब्देन
द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वं व्याख्येयं न च पुद्गलद्रव्यपरमाणु । तथा चोक्तं । सर्वार्थसिद्धिटिप्पणके द्र
व्यपरमाणुशब्देन द्रव्यसूक्ष्मत्वं भावपरमाणुशब्देन भावसूक्ष्मत्वमिति । तद्यथा । द्रव्यं आत्मद्रव्यं तस्य परमाणुशब्दे
न सूक्ष्मावस्था व्याख्या सा च रागादिविकल्पोपाधिरहिता तस्य सूक्ष्मत्वं कथमिति चेत् निर्विकल्पसमाधिविषयत्वेनेंद्रिय ७७
मनोविकल्पातीतत्वात् । भावशब्देन स्वसंवेदनपरिणामः तस्य भावस्य परमाणुशब्देन सूक्ष्मावस्था व्याख्या सूक्ष्मा

कथमिति चेत् वीतरागनिर्विकल्पपरमसमरसीभावविषयत्वेन पंचेंद्रियमनोविकल्पविषयातीतत्वादिति । पुनरप्याह इदं
परद्रव्यालंबनध्यानं निषिद्धं किल भवद्भिः निजशुद्धात्मध्याने नैव मोक्षः कुत्र भणितमास्ते परिहारमाह अप्पा झायहि णिम्म
लउ इत्यत्रैव ग्रंथे निरंतरं भणितमास्ति ग्रंथांतरे च समाधिशतकादौ । पुनश्चोक्तं । तैरेव श्रीपूज्यपादस्वामिभिः आत्मानमात्मा
आत्मन्येवात्मनासौ क्षणमुपजनयन् सन् स्वयंभूः प्रवृत्तः । अस्यार्थः । आत्मानं कर्मतापन्नं आत्मा कर्ता आत्मन्येवाधिक
रणभूते असौ पूर्वोक्त आत्मा आत्मना करणभूतेन क्षणमंतर्मुहूर्तमात्रं उपजनयन् । निर्विकल्पसमाधिनाराधयन् स
स्वयंभूः प्रवृत्तः सर्वज्ञो जातः इत्यर्थः । ये च तत्र द्रव्यभावपरमाणुध्येयलक्षणे शुक्लध्याने ह्यधिकं चत्वारिंशद्विकल्पा भणिता
तिष्ठंति ते पुनरनीहितवृत्त्या व्याख्याः केन दृष्टांतेनेति चेत् यथा प्रथमोपशमिकसम्यक्त्वग्रहणकाले परमागमप्रसिद्धान
था प्रवृत्तिकरणादिविकल्पान् जीवः करोति न चात्रेहादिपूर्वकत्वेन स्मरणमस्ति तथात्र शुक्लध्याने चेति । इदमत्र
तात्पर्यं । प्राथमिकानां चित्तस्थितिकरणार्थं विषयकषायदुर्ध्यानवंचनार्थं च परंपरया मुक्तिकारणमर्हदादिपरद्र

ध्येयं पश्चाचित्ते स्थिरीभूते साक्षान्मुक्तिकारणं स्वशुद्धात्मतत्त्वमेव ध्येयं नास्त्येकांतः एवं साध्यसाधकभावं ज्ञात्वा ध्येयविष
ये विवादो न कर्त्तव्य इति ॥३३॥ अथ सामान्यग्राहकं निर्विकल्पं सत्तावलोकदर्शनं कथयति ॥ सयलपयत्थहं जं गहणु
जीवहं अग्गिमु होइ वत्थुविसेसविवज्जियउ तं णियदंसणु जोइ ॥ सयल इत्यादि ॥ सयलपयत्थहं सकलपदार्थानां जं
गहणु यद्ग्रहणमवलोकनं कस्य जीवहं जीवस्य अथवा बहुवचनपक्षे जीवहं जीवानां कथंभूतमवलोकनं अग्गिमु अग्रिमं स
विकल्पज्ञानात्पूर्वं होइ भवति पुनरपि कथंभूतं वत्थुविसेसविवज्जियउ वस्तुविशेषविवर्जितं शुक्लमिदमित्यादिविकल्प
रहितं तं तत् ह्येवरूपिणं णियदंसणु निजात्मा तस्य दर्शनमवलोकनं जोइ यद्रूपं जानीहीति ॥ अत्राह प्रभाकरभट्टः ॥ निजात्मात
स्य दर्शनमवलोकनं दर्शनमिति व्याख्यातं भवद्भिरिदं तु सत्तावलोकदर्शनं मिथ्यादृष्टीनामप्यस्ति तेषामपि मोक्षो भवतु ७८
परिहारमाह ॥ चक्षुरचक्षुरवधिकेवलभेदेन चतुर्धा दर्शनं अत्र चतुष्टयमध्ये मानससमचक्षुर्दर्शनमात्मग्राहकं भवति
तच्च मिथ्यात्वादिसप्तप्रकृत्युपशमक्षयोपशमक्षयजनिततत्त्वार्थश्रद्धानलक्षणसम्यक्त्वाभावात् शुद्धात्मतत्त्वमेवोपा

देयमिति श्रद्धानाभावे सति तेषां मिथ्यादृष्टीनां न भवत्येवेति भावार्थः ॥३४॥ अथ छद्मस्थानां सत्तावलोकदर्शनपूर्वकं
ज्ञानं भवतीति प्रतिपादयति ॥ दंसणपुव्वु हवेइ फुडु जं जीवहं विण्णाणु वत्थुविसेसु मुणंतु जिय तं मुणि अविचलणाणु ॥३५॥
दंसणपुव्वु इत्यादि दंसणपुव्वु सामान्यग्राहकं निर्विकल्पसत्तावलोकदर्शनपूर्वकं हवेइ भवति फुडु स्फुटं जं यत् जीवहं जीवा
नां किं भवतीति विण्णाणु विज्ञानं किं कुर्वत्सत् वत्थुविसेसु मुणंतु वस्तुविशेषं वर्णसंस्थानादिविकल्पपूर्वकं जानत् जिय हे
जीव तं तत् मुणि मन्यस्व जानीहि किं जानीहि अविचलणाणु अविचलं संशयविपर्ययानध्यवसायरहितं ज्ञानमिति तथेदं
दर्शनपूर्वकं ज्ञानं व्याख्यातं यद्यपि शुद्धात्मभावनाव्याख्यानकाले प्रस्तुतं न भवति तथापि जिज्ञासितं भगवता कस्मादिति चेत्
ऋषिदिन ५ चक्षुरचक्षुरवधिकेवलदर्शनोपयोगश्चतुर्विधो भवति तत्र चतुष्टयमध्ये द्वितीयं यदचक्षुर्दर्शनं मानसरूपं निर्विक
ल्पं यथा भव्यजीवस्य दर्शनमोहचारित्रमोहोपशमक्षयोपशमक्षयलाभे सति शुद्धात्मानुभूतिरुचिरूपं वीतरागसम्यक्त्वं
भवति तथैव च शुद्धात्मानुभूतिस्थिरतालक्षणं वीतरागचारित्रं भवति तदा काले तत्पूर्वकं सत्तावलोकलक्षणं मानसं निर्विकल्प

परमात्म॰ दर्शनं कर्तृ इत्युक्ते निश्चयसम्यक्चारित्रबलेन निर्विकल्पनिजशुद्धात्मानुभूतिध्यानेन सहकारिकारणं भवति॥ इत्युक्ते न व्यव
७९ वस्यन चाभव्यस्य कस्मान्निश्चयसम्यक्चारित्राभावदिति भावार्थः॥ ७६॥ अथ परमध्यानारूढो ज्ञानी समभावेन दुःखं सुखं सहमा
नः स एवाभेदेन निर्जराहेतुर्भवतीति दर्शयति॥ दुक्खवि सुक्खु सहंतु जिय णाणिउ झाणणिलीणु कम्महं णिज्जरहेउ तवु
बुच्चइ संगविहीणु॥ ७७॥ दुक्खवि इत्यादि दुक्खु वि सुक्खु सहंतु दुःखमपि सुखमपि समभावेन सहमानः सन् जियहे जीव को सौ क
र्त्ता णाणिउ वीतरागस्वसंवेदनज्ञानी किं विशिष्टः झाणणिलीणु वीतरागचिदानंदैकाग्र्यध्याननिलीनो रतः स एवाभेदेन कम्महं
णिज्जरहेउ शुभाशुभकर्म्मणो निर्जराहेतुरुच्यते न केवलं ध्यानपरिणतपुरुषो निर्जराहेतुरुच्यते तेउ परइच्छानिरोध
रूपं बाह्याभ्यंतरलक्षणं द्वादशविधं तपश्च किं विशिष्टः सत्तपोधनस्तत्तपश्च संगविहीणु संगविहीनो बाह्याभ्यंतरपरिग्र
हरहित इति अत्राह प्रभाकरभट्टः ध्याने न निर्जरा भणिता भवद्भिः उत्तमसंहननस्यैकाग्र्यचिंतानिरोधो ध्यानमिति ध्यानलक्षणं ७९
उत्तमसंहननाभावे कथं ध्यानमिति भगवानाह उत्तमसंहननेन यत् ध्यानलक्षणं भणितं तदपूर्वगुणस्थानादिषूपशमक

क्षपकश्रेण्योर्यत् शुक्लध्यानं तदपेक्षया भणितम् अपूर्वगुणस्थानादधस्तनगुणस्थानेषु धर्म्मध्यानस्य निषेधकं न भवति॥ तथा
चोक्तं॥ तत्त्वानुशासने ध्यानग्रंथे यत्पुनर्वज्रकायस्य ध्यानमित्यागमे वचः श्रेण्योर्ध्यानं प्रतीत्योक्तं तन्नाधस्तान्निषेधकं॥ किंच
रागद्वेषाभावलक्षणं परमं यथाख्यातरूपं स्वरूपे चरणं निश्चयचारित्रं भण्यते इदानीं तदभावेप्यत्र चारित्रमाचरंतु तपो
धनाः॥ तथा चोक्तं॥ तत्रेदं॥ चरितारो न संत्यद्य यथाख्यातस्य संप्रति तत्किमन्ये यथाशक्तिमाचरंतु तपस्विनः॥ तथा चोक्तं
श्रीकुंदकुंदाचार्यदेवैः मोक्षप्राभृते॥ अज्जवि तिरयणसुद्धा अप्पा झाऊण लहहिं इंदत्तं लोयंतियदेवत्तं तत्थ चुआ णिव्वु
दिं जंति॥ अयमत्र भावार्थः॥ यथा पूर्वं त्रिकसंहननलक्षणवीतरागयथाख्यातचारित्राभावेपि इदानीं सेवासंहननेनापि
शेषचारित्रमाचरंति तपस्विनः तथा पूर्वं त्रिकसंहननलक्षणशुक्लध्यानाभावेपि विशेषसंहननेनापि संसारस्थितिछेद
कारणं परंपरया मुक्तिकारणं च धर्म्मध्यानमाचरंतीति॥ ७७॥ अथ यः सुखदुःखं सहमानः सन् येन कारणेन समभावं क

शेतिमुनिस्तेन कारणेन पुण्यपापद्वयसंवरहेतुर्भवतीति दर्शयति ॥ विणिण वि जेण सहंतु मुणि मणि सम भाउ करेइ पुण्णहं पा
वहं तेण जिय संवर हेउ हवेइ ॥ विणिण वि इत्यादि ॥ विणिण वि द्वे अपि सुखदुःखे जेण येन कारणेन सहंतु सहमानः सन् कोसौ
कर्त्ता मुणि मुनिः स्वसंवेदनप्रत्यक्षज्ञानी मणि अविक्षिप्तमनसि सम भाउ समभावं सहजशुद्धज्ञानानंदैकरूपरागद्वेषमोह
रहितं परिणामं कर्मतापन्नं करेइ करोति परिणमति पुण्णहं पावहं पुण्यस्य पापस्य द्वयोर्बंधयोः तेण तेन कारणेन जिय हे जीव संवरहे
उ संवरहेतुः कारणं हवेइ भवतीति ॥ अत्र यमेवात्पर्यार्थः ॥ कर्मोदयवशात् सुखदुःखे जातेपि योसौ रागादिरहितमनसि वि
शुद्धज्ञानदर्शनस्वभावनिजशुद्धात्मसंवित्तिं न त्यजति स पुरुष एवाभेदनयेन द्रव्यभावरूपपुण्यपापसंवरस्य हेतुः कार
णं भवतीति ॥ अथ यावंतं कालं रागादिरहितपरिणामेन स्वशुद्धात्मस्वरूपे तन्मयीभूत्वा तिष्ठति तावंतं कालं संवरनिर्जरे ८१
करोतीति प्रतिपादयति ॥ अच्छइ जित्तिउ कालु मुणि अप्पसरूवि णिलीणु संवरणिज्जर जाणि तुहुं सयलवियप्पविहीणु

॥ अच्छइ इत्यादि ॥ अच्छइ तिष्ठति ॥ किं कृत्वा तिष्ठति जित्तिउ कालु यावंतं कालं अप्प कर्ता तिष्ठति अप्पसरूवि निजशुद्धात्म
स्वरूपे कथंभूतः सन् णिलीणु निश्चयेन लीनोऽद्रवीभूतो वीतरागनित्यानंदैकपरमसमरसीभावेन परिणतः हे प्रभाकरभ
ट्ट तं तत्परिणामपरिणतं तपोधनमभेदेन संवरणिज्जर जाणि तुहुं संवरनिर्जरास्वरूपं जानीहि त्वं पुनरपि कथंभू
तं सयलवियप्पविहीणु सकलविकल्परहितं ख्यातिपूजालाभप्रभृतिविकल्पजालावलीरहितमिति अत्र विशेषव्याख्यानं
यदेव शर्वसूत्रद्वयेन भणितं तदेव ज्ञातव्यं कस्मात् तस्यैव निर्जरासंवरव्याख्यानस्योपसंहाररूपत्वादिति भावार्थः ॥ इत्थमेवं मो
क्षमोक्षमार्गमोक्षफलादिप्रतिपादकद्वितीयमहाधिकारमध्ये सूत्रत्रयेण भेदरत्नत्रयव्याख्यानमुख्यत्वेन स्थलं स
माप्तं ॥ अत ऊर्ध्वं चतुर्दशसूत्रपर्यंतं परमोपशमभावमुख्यत्वेन व्याख्यानं करोति ॥ तथाहि ॥ कम्मु पुरक्किउ सो खवइ अहिणव पे
सु ण देइ संगु मुएविणु जो सयलु उवसमभाउ करेइ ॥ कम्मु इत्यादि ॥ किम्मु पुरक्किउ कर्म पुराकृतं सो खवइ स एव वीतरा

गस्वसंवेदनतत्त्वज्ञानी ध्यायति पुनरपि किं करोति अहिणवपिसुणदेइ अभिनवकर्मप्रवेशं न ददाति स कः संयुसुणवि
पुज्जो सयलु संगं बाह्याभ्यंतरपरिग्रहं मुक्त्वा यः कर्त्ता समस्तं पश्चात्किं करोति उवसमभाउ करेइ जीवितमरणलाभालाभसुख
दुःखादिसमताभावलक्षणं समभावं करोति तद्यथा स एव पुराकृतकर्म क्षपयति नवतरं संहणेति य एव बाह्याभ्यंतरपरिग्रहं
मुक्त्वा सर्वशास्त्रं पठित्वा च शास्त्रफलभूतं वीतरागपरमानंदैकसुखरसास्वादरूपं समभावं करोतीति॥ भावार्थः॥ तथा चोक्तं॥
साम्यमेवादराद्भाव्यं किमन्यैर्ग्रंथविस्तरैः प्रक्रियामात्रमेवेदं वाङ्मयं विश्वमस्य हि॥ ८५॥ अथ यः समभावं करोति तस्यैव निश्चयेन
सम्यग्दर्शनज्ञानचारित्राणि न चान्यस्येति दर्शयति॥ दंसणु णाणु चरित्तु तसु जो समभाउ करेइ इयरहं एक्कु वि अत्थि णवि जिण
वरु एउ भणेइ॥ दंसणइत्यादि॥ दंसणणाणचरित्तु सम्यग्दर्शनज्ञानचारित्रत्रयं तस्य निश्चयनयेन तस्यैव भवति कस्य जो सम
भाउ करेइ यः कर्त्ता समभावं करोति इयरहं इतरस्य समभावरहितस्य एक्कु वि अत्थि णवि रत्नत्रयमध्ये नास्त्येकमपि जिणवरु एव भ

डाक्टर भाऊ दाजी ... DR. BHAU DAJI MEMORIAL

णेइ जिनवरो वीतरागः सर्वज्ञ एवं भणतीति॥ तथाहि॥ निश्चयनयेन निजशुद्धात्मैवोपादेय इति रुचिरूपं सम्यग्दर्शनं तस्यै
व निजशुद्धात्मसंवित्तिसमुत्पन्नवीतरागपरमानंदमकरंदरसास्वादोयमात्मा निरंतराकुलत्वोत्पादकत्वात् कटुकरसात्मकः
कामक्रोधादय इति भेदज्ञानं तस्यैव भवति स्वरूपे चरणं चारित्रमिति वीतरागचारित्रं तस्यैव भवति तस्य कस्य वीतरागनिर्विक
ल्पपरमसामायिकभावनानुकूलं निर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपं यः समभावं करोतीति भावार्थः॥ ८६॥
अथ यदा ज्ञानी जीव उपशाम्यति तदा संयतो भवति कामक्रोधादिकषायवशंगतः पुनरसंयतो भवतीति निश्चिनोति॥
॥ जाम हु णाणिउ उवसमइ ताम हु संजदु होइ होइ कसायहं वसिगयउ जीउ असंजदु सोइ॥ जाम इत्यादि॥ जाम इ यदा का
ले णाणिउं ज्ञानी जीवः उवसमइ उपशाम्यति ताम इं तदा काले संजदु होइ संयतो भवति होइ भवति कसायहं वसिगयउ कषा
यवशगतः जीउ जीवः कथंभूतो भवति असंजदु असंयतः को सो सोइ स एव पूर्वोक्तजीव इति अयमत्र भावार्थः अनाकुलत्वल

परमात्मः
८२

रूणत्स्वशुद्धात्मभावनोत्थपरमार्थिकसुखस्यानुकूलपरमोपशमो यदा ज्ञानी तिष्ठति तदा संयतो भवति तद्विपरीतं परमात्मा
नुकूलत्वोत्पादककामक्रोधादौ परिणतः पुनरसंयतो भवति ॥तथा चोक्तं॥ अकसायं तु चरित्तं कसायवसगदो असंजदो होदि।
उवसमइ जम्हि कालेतक्काले संजदो होदि ॥२६७॥ अथ केन कषाया भवंति मनसि तं मोहं त्यजेति प्रतिपादयति ॥ ॥ जेण क
साय हवंति मणि सो जिय मिल्लहि मोहु मोहकसायविवज्जियउ पर पावहि समबोहु ॥ ॥ जेण इत्यादि जेण येन वस्तुना व
स्तुनिमित्तेन मोहेन वा किं भविष्यति कसाय हवंति क्रोधादिकषाया भवंति क्व भवंति मणि मनसि सो तं जिय हे जीव मिल्लहि
मुंच कं तं वस्तुनिमित्तं मोहु मोहं मोहनिमित्तपदार्थं चेति पश्चात्किं लभसे त्वं मोहकसायविवज्जियउ मोहकषायविवर्जितः स
न् परं नियमेन पावहि प्राप्नोषि किं कर्मतापन्नं समबोहु समबोधं रागद्वेषरहितं ज्ञानमिति ॥तथाहि॥ निर्मोहनिजशुद्धात्मध्या
नेन निर्मोहस्वशुद्धात्मतत्त्वविनाशकाः क्रोधादिकषाया भवंति पश्चान्मोहकषायाभावे सति रागादिरहितं विशुद्धज्ञानं लभसे ८२
× विपरीतं हे जीव मोहं मुंच येन मोहेन मोहनिमित्तवस्तुना वा निःकषायपरमात्मतत्त्व × वो. ऊ. नी. १

त्वमित्यभिप्रायः ॥तथा चोक्तं॥ तं वंभुं सुत्तहं जं पढियइं तेऊ एकसायग्गी तंद्धुं सुत्तइ क्रोडत्तु उवसमो कसायाणं ॥२६८॥ अथ ये
पादेयतत्त्वं ज्ञात्वा परमोपशमे स्थित्वा ये ज्ञानिनः स्वशुद्धात्मनि रतिस्त एव सुखिन इति कथयंति ॥ ॥ तत्ता तत्तु मुणेवि मणि
जे थक्का सम भावि ते पर सुहिया इत्थु जगि जहं रइ अप्प सहावि ॥ ॥ तत्ता तत्तु इत्यादि तत्ता तत्तु मुणेवि तत्त्वातत्त्वं हिसत्वं
मत्वा क्व मणि मनसि जे ये केचन वीतरागस्वसंवेदनप्रत्यक्षज्ञानिनः थक्का स्थिताः क्व सम भावि परमोपशमपरिणामे ते पर त एव
सुहिया सुखिनः ॥ एवं जगु ॥ अत्र जगति के ते जहं रइ येषां रतिः क्व अप्प सहावि स्वकीयशुद्धात्मस्वभावे इति ॥तथाहि॥ यद्य
पि व्यवहारेणानादिबंधनबद्धं तिष्ठति तथापि शुद्धनिश्चयेन प्रकृतिस्थित्यनुभागप्रदेशबंधरहितं यद्यप्यशुद्धनिश्चयेन स्व
कृतशुभाशुभकर्मफलभोक्ता तथापि शुद्धद्रव्यार्थिकनयेन निजशुद्धात्मतत्त्वभावनोत्थवीतरागपरमानंदैकसुखामृतभो
क्ता यद्यपि व्यवहारेण कर्मक्षयानंतरमोक्षभाजनं भवति तथापि शुद्धपारिणामिकपरमभावग्राहकेन शुद्धद्रव्यार्थिकनयेन

सएवमुक्तमेव यद्यपि व्यवहारेण स्वोपात्तदेहमात्रं तथापि निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशं यद्यपि व्यवहारेणोपसं-
हारविस्तारसहितं तथापि मुक्तावस्थायामुपसंहारविस्तारहितं चरमशरीरप्रमाणप्रदेशं यद्यपि पर्यायार्थिकनयेनोत्पा
दव्ययध्रौव्ययुक्तं ॥तथापि॥ द्रव्यार्थिकनयेन नित्यं टंकोत्कीर्णज्ञायकैकस्वभावं निजशुद्धात्मद्रव्यं स्वसंवेदनज्ञानबलेन दृष्ट्वा
रागद्वेषं च निश्चित्य पश्चात्समस्तमिथ्यात्वरागादिविकल्पत्यागेन वीतरागचिदात्मैकस्वशुद्धात्मतत्त्वे स्थिरतां स एव ध्याइति
भावार्थः ॥तथा चोक्तं॥ परमात्मतत्त्वलक्षणे श्रीपूज्यपादस्वामिभिः भावार्थसिद्धिरिष्टानां निजगुणहृतिस्तत्तपोभिर्नियुक्ते अ
स्त्यात्मानादिबद्धः स्वकृतजफलभुक् तत्क्षयान्मोक्षभागी ज्ञाता द्रष्टा स्वदेहप्रमितरूपसमाहारविस्तारधर्मा ध्रौव्योत्पत्ति
व्ययात्मा स्वगुणयुत इतो नान्यथा साध्यसिद्धिः ॥८३॥ अथ योसौ वीतोपसमभावं करोति तस्य निंदाद्वारेण स्तुतिं कथ
यति ॥त्रिकलं॥ बिलि विदोस हवंति तसु जो सम भाउ करेइ बंधु जि णिहणइ अप्पणउं अणु जगु गहिलु करेइ ॥बिणि विदोसा ८३

बे त्तिवि दोसाव पिंडो कोदोस दोषो हवंति भवतः तसु तस्य तपोधनस्य जो सम भाउ करेइ यः समभावं करोति रागद्वेषत्या
गं करोति कौतौ दौ दोषौ बंधु जि णिहणइ बंधुमेव निहंति कथं भूतं बंधु अप्पणउं आत्मीयं अणु पुनः जगु जगत्त्राणियगणं ग
हिगहिलु करेइ गहिलं पिशाचसमानं विकलं करोति ॥अयमत्र भावार्थः॥ समशब्देनात्र निश्चयेन रागादिरहित आत्मा भ
ण्यते तेन कारणेन योसौ समं करोति वीतरागचिदानंदैकस्वभावं निजात्मानं परिणमति तस्य दोषद्वयं भवति कथमि
ति चेत् प्राकृतभाषया बंधुशब्देन ज्ञानावरणादिबंधा भण्यंते गोत्रं च येन कारणेनोपशमस्वभावेन परमात्मस्वरूपेण परि
णतः सन् ज्ञानावरणादिकर्मबंधं निहंति तेन कारणेन स्तवनं भवति अथवा येन कारणेन बंधुशब्देन गोत्रमपि भण्यते ते
न कारणेन बंधुघाती लोकव्यवहारभाषया निंदापि भवतीति ॥तथा चोक्तं॥ लोकव्यवहारे ज्ञानिनां लोकः पिशाचो भवति लो
कस्याज्ञानिजनस्य ज्ञानी पिशाच इति ॥८४॥ तथा॥ अणु जि दोसु हवेइ तसु जो सम भाउ करेइ सत्तु वि मिल्लिवि अप्पणउं परहं

निलीणउ हवेइ ॥ अणुजि इत्यादि अणुजि केवलं स्वर्गे किं अन्योपि दोसु दोषः हवेइ भवति तसु तस्य तपोधनस्य यः किंक
जो सम भाउ करेइ यः कर्त्ता समभावं करोति पुनरपि किं करोति सत्तु वि मित्तु वि सत्रुमपि मुंचति कथं तं त्यक्त्वा अप्पणं आ
त्मीयं पुनश्च किं करोति परहं णिलीणु हवेइ परस्यापि लीनः अधीनो भवति ॥ अयमत्र भावार्थः ॥ यो रागादिरहितस्य
समभावलक्षणस्य निजपरमात्मनो भावनां करोति स पुरुषः शत्रुशब्दवाच्यं ज्ञानावर्णादिकर्मरूपं निश्चयशत्रुं मुं
चति परशब्दवाच्यं परमात्मनमाश्रयति च तेन कारणेन तस्य स्तुतिर्भवति अथवा यथा लोकव्यवहारेण बंधनबद्धं
निजशत्रुं मुक्त्वा कोपि केनापि कारणेन तस्यैव परशब्दवाच्यस्य शत्रोराधीनो भवति तेन कारणेन स निंद्यते तथा
शब्दछलेन तपोधनोपी ति ॥ ८७ ॥ अथ ॥ अणुजि दोसु हवेइ तसु जो समभाउ करेइ भिंदु हवेविणु इक्कलउ उप्परि जिण
हं चडेइ ॥ अणुजि इत्यादि न केवलं स्वर्गे किं नोपि सु दोषः हवेइ भवति तसु तस्य तपस्विनः यः किं करोति जो समभा ८५

उ करेइ यः समभावं करोति पुनरपि किं करोति वियलु हवेविणु विकलः कलरहितः शरीररहितो भूत्वा इक्कलु एकाकी
पश्चात् उप्परि जगहं चडेइ उपरितन भागे जगतो लोकस्यारोहणं करोतीति ॥ अयमत्राभिप्रायः ॥ यस्तु परवीरागादिवि
कल्परहितस्य परमोपशमरूपस्य निजशुद्धात्मनो भावनं करोति सः कलशब्दवाच्यं शरीरं मुक्त्वा लोकस्योपरि तिष्ठति
तेन कारणेन स्तूयते अथवा यथा कोपि लोकमध्ये चित्तविकलो भूतः सन् निंद्यते तथा शब्दछलेन तपोधा
नोपीति ॥ ९२ ॥ अथ स्थलसंख्याबाह्यं प्रक्षेपकं कथयति ॥ जाणिसि सयलहं देहियहं जो गिज्जत्तहिं जग्गेइ जहिं पुणु जग्गइ
सयलु जगु सा णिसि मणिवि सुवेइ ॥ जाणिसि इत्यादि ॥ जाणिसि या वीतराग परमानंदैकसहज शुद्धात्मावस्थां मिथ्यात्व
रागाद्यंधकारावगुंठिता सती रात्रिः प्रतिभाति केषां सयलहं देहियहं सकलानां स्वशुद्धात्मसंवित्तिरहितानां देहिनां जो
गिउ तहिं जग्गेइ परमयोगी वीतरागनिर्विकल्पस्वसंवेदनज्ञानरत्नप्रदीपप्रकाशेन मिथ्यात्वरागादिविकल्पजालांध

परमात्मः

८९

कारमपसार्य सितस्यां तु रात्रौ शुद्धात्मना जागर्त्ति जइ हिं सुप्पइ जग्गइ सयलु जगु यत्र पुनः शुद्धात्मनो मनोवाक्काय परिणाम
व्यापारे परमात्मतत्त्वभावनापराङ्मुखः सन् जगत् जागर्त्ति प्रवर्त्तते स्वशुद्धात्मपरिज्ञानरहितः सकलोऽज्ञानी जनः साणि सिणि
णिविसुवेइ तां रात्रिं मत्वा त्रिगुप्तिगुप्तः सन् वीतरागनिर्विकल्पपरमसमाधियोगनिद्रायां स्वपितीति निद्रां करोतीति अत्र
बहिर्विषये सयनमेवोपसमो भण्यते इति तात्पर्यार्थः ॥१७२॥ अथ ज्ञानी पुरुषः परमवीतरागरूपं समभावं मुक्त्वा बहिर्विष
ये रागं न गच्छतीति दर्शयति ॥ णाणि मुएविणु भाउ समु कित्थु वि जाइ ण राउ जेण लहेसइ णाणमउ तेण जि अप्पसहाउ ॥ णाणि
इत्यादि ॥ णाणि परमात्माराधको भव्यो येन ज्ञानी मुएवि मुक्त्वा कं भाउ भावं कथंभूतो भावः समु समं पंचेंद्रियविषयाभिलाष
रहितं वीतरागपरमाह्लादसहितं कित्थु वि जाइ ण राउ तं स्वेष्टं समभावं मुक्त्वा क्वापि बहिर्विषये रागं न याति न गच्छति कस्मादि
ति चेत् जेण लहेसइ येन कारणेन लभिष्यति भाविकाले प्रासत्ति कं णाणमउ ज्ञानमयं केवलज्ञानमयं केवलज्ञाननिर्वृत्तं के ८९

वलज्ञानान्तर्भूतानन्तगुणं तेण जि तेनैव समभावेन अप्पसहाउ निर्दोषिपरमात्मस्वभावमिति ॥ इदमत्र तात्पर्यं ॥ ज्ञानी पु
रुषः शुद्धात्मानुभूतिलक्षणं समभावं विहाय बहिर्भावे रागं न गच्छति येन कारणेन समभावेन विना शुद्धात्मलाभो न भवतीति
॥१७३॥ अथ ज्ञानी कमप्यन्यं न भणति न प्रेरयति न स्तौति न निंदतीति इति प्रतिपादयति ॥ भणइ भणाउ ण वि थुणइ णिंदइ णा
णि ण कोइ सिद्धिहिं कारणु भाउ समु जाणंतउ पर सोइ ॥ भणइ इत्यादि ॥ भणइ न भणति नैव भणाउ वइ नैवान्यं भणयति न प्रेरयति
न विथुणइ नैव स्तौति णिंदइ णाणि न कोइ निंदति ज्ञानी न कमपि किं कुर्वन् सन् सिद्धिहिं कारणु भाउ समु जाणंतउ पर सोइ जा
नन् कं भावं परिणामं कथंभूतं समु रागद्वेषरहितं पुनरपि कथंभूतं कारणं कस्याः सिद्धेः परं नियमेन सोइ तमेव सिद्धिकारणं
परिणाममिति ॥ इदमत्र तात्पर्यं ॥ परमोपेक्षासंयमभावनारूपं विशुद्धज्ञानदर्शननिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानु
चरणानुभूतिलक्षणं साक्षात्सिद्धिकारणं कारणसमयसारं जानन् त्रिगुप्तावस्थायां अनुभवन् सन् भेदज्ञानी पुरुषः परं आ

परमात्मः णिनं न जाणति न वेरयति न स्तौति न च निंदतीति ॥१५॥ अथ ॥ बाह्याभ्यंतरपरिग्रहेण पंचेंद्रियविषयभोगाकांक्षादिरूपमूर्छा
८६ व्रतादिसंकल्पविकल्परहितेन निजशुद्धात्मध्यानेन योसौ निजशुद्धात्मानं जानाति स परिग्रहविषये रागद्वेषौ न
करोतीति प्रकटयति ॥ चतुष्कलं ॥ गंथहं उप्परि परममुणि देसु वि करइ ण राउ गंथहं जेण वियाणियउ भिण्णउ अप्पसहाउ
॥गंथहं इत्यादि॥ गंथहं उपरि ग्रंथस्य बाह्याभ्यंतरपरिग्रहस्योपरि अथवा ग्रंथस्य रचनारूपशास्त्रस्योपरि परममुणि परमतपस्वी । ॥पर२॥
देसु वि करइ न द्वेषमपि न करोति न राउ रागमपि येन तपोधनेन किं कृतं गंथहं जेण वियाणियउ भिण्णउ अप्पसहाउ ग्रंथात्सका
शात् येन विज्ञातो भिन्न आत्मस्वभाव इति ॥ तद्यथा ॥ मिथ्यात्वं स्त्र्यादिवेदकांक्षारूपवेदत्रयं हास्यरत्यरतिशोकभयजुगु
प्सारूपेनोकषायषट्कं क्रोधमानमायालोभरूपं कषायचतुष्टयं चेति चतुर्दशाभ्यंतरपरिग्रहाः क्षेत्रवास्तुहिरण्यसुवर्ण ८६
धनधान्यदासीदासकुप्यभांडरूपा बाह्यपरिग्रहास्तान् इत्थंभूतान् बाह्याभ्यंतरपरिग्रहान् जगत्त्रये कालत्रयेपि मनोवा

चनकायैः कृतकारितानुमतैश्च स्वशुद्धात्मोपलंभलक्षणे वीतरागनिर्विकल्पसमाधौ स्थित्वा त्यजति यो बाह्याभ्यंतरपरि
ग्रहान् निजमात्मानं जानाति स परिग्रहस्योपरि रागद्वेषौ न करोति अत्रेदं व्याख्यानमेवं गुणविशिष्टनिर्ग्रंथस्यैव शोभते न च
सपरिग्रहस्येति तात्पर्यार्थः ॥८६॥ अथ ॥ विसयहं उपरि परममुणि देसु वि करइ ण राउ विसयहं जेण वियाणियउ भिण्णउ
भिण्णउ अप्पसहाउ ॥विसयहं इत्यादि॥ विसयहं उप्परि विषयाणामुपरि परममुणि परममुनिः देसु वि करइ ण राउ द्वेषं
नापि करोति न च रागमपि येन किं कृतं विसयहं जेण वियाणियउ विषयेभ्यो येन विज्ञातः कोसौ विज्ञातः भिण्णउ अ
प्पसहाउ आत्मनः स्वभावः कथंभूतो भिन्न इति ॥ तद्यथा ॥ द्रव्येंद्रियाणि भावेंद्रियाणि द्रव्येंद्रियभावेंद्रियबाह्यान् विष
यांश्च दृष्टश्रुतानुभूतान् जगत्त्रये कालत्रयेपि मनोवचनकायैः कृतकारितानुमतैश्च स्वस्य निजशुद्धात्म
भावनासमुत्पन्नवीतरागपरमानंदैकरूपसुखामृतरसास्वादेन तृप्तो भूत्वा यो विषयेभ्यो भिन्नं शुद्धात्मानं ।

परमात्म: मतुभवति स मुनिः पंचेंद्रियविषयेषु रागद्वेषौ न करोति अत्र यः पंचेंद्रियविषयसुखान्निवर्त्य स्वशुद्धात्मसुखे तृ-
८७ प्तो भवति तस्यैवेदं व्याख्यानं शोभते न च विषयासक्तस्येति भावार्थः ॥८७॥ अथ देहहं उप्परि परममुणि देसु वि कर-
इ ण राउ देहहं जेण वियाणियउं भिण्णउं अप्पसहाउ ॥ देहहं इत्यादि ॥ देहहं उप्परि देहस्योपरि परममुणि परममु-
निः देसु वि करइ ण राउ द्वेषमपि न करोति न रागमपि येन किं कृतं देहहं जे जेण वियाणियउं देहात्सकाशाद्येन
विज्ञातः कोसौ भिण्णउ अप्पसहाउ आत्मस्वभावः कथंभूतो विज्ञातः तस्माद्देहाद्भिन्न इति तथाहि सपरं बाधासहि-
यं विच्छिन्नं बंधकारणं विसमं जइंदिएहिं लद्धं तं सुक्खं दुक्खमेव तहा ॥ इति गाथाकथितलक्षणं दृष्टश्रुतानु-
भूतं यद्देहजनितसुखं तद्भोगत्रये कालत्रयेपि मनोवचनकायैः कृतकारितानुमतैश्च त्यक्त्वा वीतरागनिर्विक-
ल्पसमाधिबलेन पारमार्थिकानाकुलत्वलक्षणसुखपरिणते निजपरमात्मनि स्थित्वा च य एव देहाद्भि-

न्नं स्वस्वभावं स्वशुद्धात्मानं जानाति स एव देहस्योपरि रागद्वेषौ न करोति अत्र सर्वप्रकारेण देहममत्वं त्यक्त्वा देहसुखं ना-
नुभवति तस्यैवेदं व्याख्यानं शोभते नापरस्येति तात्पर्यार्थः ॥८८॥ अथ वित्तिणि वित्तिहिं परममुणि देसु वि करइ ण रा-
उ बंधहं हेउ वियाणियउं एयहं जेण सहाउ ॥ वित्तिणि वित्तिहिं इत्यादि ॥ वित्तिणि वित्तिहिं प्रवृत्तिनिवृत्तिविषये व्रताव्रतविषये प-
रममुणि परममुनिः देसु वि करइ ण राउ द्वेषमपि न करोति न च रागं येन किं कृतं बंधहं हेउ वियाणियउं बंधस्य हेतु-
र्विज्ञातः कोसौ एयहं जेण सहाउ एतयोर्व्रताव्रतयोः स्वभावो येन विज्ञात इति ॥ अथ वा पाठांतरं ॥ भिण्णउं जेण सहा-
उ भिन्नो येन विज्ञातः कोसौ आत्मस्वभावः काभ्यां एताभ्यां व्रताव्रतविकल्पाभ्यां सकाशादिति तथाहि येन व्रताव्रत-
विकल्पौ पुण्यपापबंधकारणभूतौ विज्ञातौ स शुद्धात्मनि स्थितः सन् विषये रागं न करोति तथाप्यव्रतविषये द्वे-
षं न करोमीति अत्राह प्रभाकरभट्टः हे भगवन् यदि व्रतस्योपरि रागस्तात्पर्यं नास्ति तर्हि व्रतं निषिद्धमिति भग-

×व्रत×

डाक्टर भाऊ दाजी मेमोरियल
DR. BHAU DAJI
MEMORIAL

परमात्म: ८८ वानां व्रतं कोऽर्थः सर्वनिवृत्तिपरिणामः तथा चोक्तं हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतं अथवा रागद्वेषौ प्र
वृत्तिस्तन्निवृत्तिस्तन्निषेधनं तौ च बाह्यार्थसंबंधौ तस्मात्तांश्च परित्यजेत् प्रसिद्धं च नरहिंसादिव्रतं एकदेशेन व्यवहा
रेणेति कथमेकदेशव्रतमिति चेत् तथाहि जीवघाते निवृत्तिर्जीवदयाविषये प्रवृत्ति असत्यवचनविषये निवृत्तिः सत्य
वचनविषये प्रवृत्ति अदत्तादानविषये निवृत्तिः दत्तादानविषये प्रवृत्तिरित्यादिरूपेणैकदेशव्रतं व्रतं रागद्वेषरू
संकल्पविकल्पकल्लोलमालारहिते त्रिगुप्तिगुप्तपरमसमाधौ पुनः शुभाशुभत्यागात्परिपूर्णं व्रतं भवति कश्चिदाह व्र
तेन किं प्रयोजनं आत्मभावनया मोक्षो भविष्यति भरतेश्वरेण किं व्रतं कृतं घटिकाद्वयेन मोक्षं गत इति परिहारमा
ह भरतेश्वरोऽपि पूर्वं जिनदीक्षाप्रस्तावे लोचानंतरं हिंसादिनिवृत्तिरूपं महाव्रतविकल्पं कृत्वांतर्मुहूर्तेन गते सति दृ ८८
ष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादिविकल्परहिते मनोवचनकायनिरोधलक्षणे निजशुद्धात्मध्या

नेस्थित्वा पश्चान्निर्विकल्पो जातः परं किंतु तस्य स्तोककालत्वान्महाव्रतप्रसिद्धिर्नास्ति अथेदं मतं वयमपि तथा कुर्मो
वसानकाले नैवं वक्तव्यं यद्येकस्यांधकस्य कथंचिन्निधानलाभो जातः तर्हि न सर्वेषां भवतीति भावार्थः तथा चोक्तं प
पुव्वमभाविद जोगो मरणे आराहओ हवे जदि वि को वि खवगणिधिदिट्ठं तं तं खु पमाणं ण सव्वच्छ ॥७५॥ एवं मोक्ष मोक्षफल
मोक्षमार्गप्रतिपादकद्वितीयमहाधिकारमध्ये परमोपशमभावव्याख्यानोपलक्षणत्वेन चतुर्दशसूत्रैस्थलं समाप्तं
अथानंतरं निश्चयनयेन पुण्यपापे द्वे समाने इत्यादिरूपलक्षणत्वेन चतुर्दशसूत्रपर्यंतं व्याख्यानं क्रियते तद्यथा योऽसौ
विभावस्वभावपरिणामो निश्चयनयेन बंधमोक्षहेतुभूतो न जानाति स एव पुण्यपापद्वयं करोति न चान्य इति मनसि सं
प्रधार्य सूत्रमिदं प्रतिपादयति बंधहं मोक्खहं हेउ णिउ जो णवि जाणइ कोइ सो पर मोहिं करइ जिय पुण्णु वि पाउ वि दो
इ ॥ बंधहं इत्यादि बंधहं बंधस्य मोक्खहं मोक्षस्य हेउ हेतुकारणं कथंभूतं णिउ निजविभावस्वभावहेतुः स्वरूपं जो णवि

जाणइ कोइ॥ योनेव जानाति कश्चित्सोपरस एव मोहिं मोहेन करइ करोति॥ पुण्णु वि पाउ वि पुण्यमपि पापमपि कति संख्यापे
तेअपि दोहइ अपीति॥ तथाहि॥ निजशुद्धात्मतत्त्वरुचिविपरीतं मिथ्यादर्शनं स्वशुद्धात्मतत्त्वानुभूतिविपरीतं मिथ्याज्ञा
नं निजशुद्धात्मद्रव्यनिश्चयस्थितिविपरीतं मिथ्याचारित्रमित्येतत्त्रयं बंधकारणं तस्मात्त्रयाद्विपरीतं भेदाभेदरत्न
त्रयस्वरूपं मोक्षस्य कारणमिति योसौ न जानाति स एव पुण्यद्वयं निश्चयनयेन हेयमपि मोहवशात्पुण्यमुपादेयं क
रोति पापं हेयं करोति इति भावार्थः॥८०॥ अथ सम्यग्दर्शनज्ञानचारित्रपरिणतमात्मानं यो सौ मुक्तिकारणं न जानाति।
स एव पुण्यपापद्वयं करोतीति दर्शयति॥ दंसणणाणु चरित्तमउ जो णवि अप्पु मुणेइ मोक्खहं कारणु भणिवि जिय
सो परताइं करेइ॥ दंसणु णाणु चरित्तु॥ इत्यादि॥ दंसणणाणचरित्तमउ सम्यग्दर्शनज्ञानचारित्रमयं जो णवि अप्पु मुणेइ यः कर्त्ता नैवात्मानं मनुते जानाति किं कृत्वा न जानाति मोक्खहं कारणु भणिवि मोक्षस्य कारणं भणित्वा मत्वा ८१

जिय हे जीव सो परताइं करेइ स एव पुण्यपापे द्वे करोतीति॥ तथाहि॥ निजशुद्धात्मभावनोत्थवीतरागनित्यानंदैकरू
पसुखरसास्वादरुचिरूपं सम्यग्दर्शनं तत्रैव स्वशुद्धात्मनि वीतरागसहजानंदैकस्वसंवेदनपरिच्छित्तिरूपं सम्यग्ज्ञानं वी
तरागसहजानंदैकपरमसमरसीभावेन तत्रैव निश्चलस्थिरत्वं सम्यक्चारित्रमित्येतैस्त्रिभिः परिणतमात्मानं योसौ
मोक्षकारणं न जानाति स एव पुण्यमुपादेयं करोति पापं हेयं च करोतीति यस्तु पूर्वोक्तरत्नत्रयपरिणतमात्मानमेवा
मोक्षमार्गं जानाति स एव पुण्यमुपादेयं करोति तस्य तु सम्यग्दृष्टेर्यद्यपि संसारस्थितिच्छेदकारणेन सम्यक्त्वादिगुणेन प
रंपरया मुक्तिकारणं तीर्थकरनाम कर्मप्रकृत्यादिकमनीहितवृत्त्या विशिष्टपुण्यमास्रवति तथाप्यसौ तदुपादेयं न क
रोतीति भावार्थः॥८१॥ अथ यो सौ निश्चयेन पुण्यपापद्वयं समानं न मन्यते स मोहेन मोहितः सन् संसारं परिभ्रमतीति कथ
यति॥ जो णवि मण्णइ जीउ समु पुण्णु वि पाउ वि दोइ सो चिरु दुक्खु सहंतु जिय मोहिं हिंडइ लोइ॥ जो इत्यादि॥ जो णवि मण्णइ यः

श्रीं

परमात्मः ९०

कर्त्तानि व मन्यते जीउ जीवः किं न मन्यते समु समानेके पुण्णु वि पाउ वि दोइ पुण्यपापमपि द्वे सो स जीवः ॥ चिरु दुक्खु सहंतु ॥
चिरं बहुतरं कालं दुःखं सहमानः सन् जिय हे जीव मोहिं हिंडइ लोइ मोहेन मोहितः सन् हिंडइ तिभ्रमति कलोके संसारे इति ।
॥ तथा च ॥ यद्यप्यसद्भूतव्यवहारेण द्रव्यपुण्यपापे परस्परभिन्ने भवतस्तथैवाशुद्धनिश्चयेन भावपुण्यपापे भिन्ने भवतस्तथा
पि शुद्धनिश्चयनयेन पुण्यपापरहितशुद्धात्मनः सकाशाद्विलक्षणे सुवर्णलोहनिगलवद्बंधं प्रति समान एव भवतः एवं नय
विभागं न योसौ पुण्यपापसमानं न मन्यते स निर्मोहशुद्धात्मनो विपरीतेन मोहेन मोहितः सन् संसारे परिभ्रमतीति अत्रा
ह प्रभाकरभट्टः यद्येवं तर्हि ये केचन पुण्यपापद्वयं समानं कृत्वा तिष्ठंति तेषां किमिति दूषणं दीयते भवद्भिरिति ॥ भग
वानाह ॥ यदि शुद्धात्मानुभूतिलक्षणं त्रिगुप्तिगुप्तवीतरागनिर्विकल्पपरमसमाधिं लब्ध्वा तिष्ठंति तदा संमतमेव यदि पु ९०
नस्तथाविधामवस्थामलभमाना अपि संतो गृहस्थावस्थायां दानपूजादिकं त्यजंति तपोधनावस्थायां षडावश्यकादिकं

च त्यक्त्वोभयभ्रष्टाः संतः तिष्ठंति तदा दूषणमेवेति तात्पर्यं ॥ ५८ ॥ अथ येन पापफलेन जीवो दुःखं प्राप्य दुःखविनाशार्थं ध
र्माभिमुखो भवति तत्पापमपि समीचीनमपि दर्शयति वर जिय पावइं सुंदरइं णाणिय ताइं भणंति जीवहं दुक्खइं जणिवि लहु
सिवमइ जाइं कुणंति ॥ वर जिय इत्यादि ॥ वर जिय वरं किंतु हे जीव पावइं सुंदरइं पापानि सुंदराणि समीचीनानि भणंति
कथयंति के णाणिय ज्ञानिनस्तत्त्ववेदिनः कानि ताइं तानि पूर्वोक्तानि पापानि कथंभूतानि जीवहं दुक्खइं जणिवि लहु
सिवमइं जाइं कुणंति जीवानां दुःखानि जनित्वा लघु शीघ्रं शिवमतिं मुक्तियोग्यमतिं यानि कुर्वंतीति अयमत्राभिप्रायः य
त्र भेदाभेदरत्नत्रयात्मकं श्रीधर्मं लभंते जीवं तत्पापजनितदुःखमपि श्रेष्ठमिति ॥ कस्मादिति चेत् ॥ आर्त्ता नरा धर्मपरा भव
न्तीति वचनात् ॥ ५९ ॥ अथ निदानबंधोपार्जितानि पुण्यानि जीवस्य राज्यादिविभूतिं दत्वा नरकादिदुःखं जनयंतीति कथ
यति मं पुणु पुण्णइं भल्लाइं णाणिय ताइं भणंति जीवहं रज्जइं देवि लहु दुक्खइं जाइं जणंति ॥ मं पुणु इत्यादि ॥ मं पुणु मा

पुनर्भवकः पुण्णइं भल्लाइं पुण्यानि भद्राणि भवंतीति णाणिय ताइं भणंति ज्ञानिनः पुरुषास्तानि पुण्यानि कर्माणि न भद्राणि
भणंति यानि किं कुर्वंति जीवहं रज्जाइं देवि लहु दुक्खइं जाइं जणंति यानि पुण्यकर्माणि जीवस्य राज्यानि दत्वा लघु शीघ्रं
दुःखानि जनयंति ॥ तद्यथा ॥ निजशुद्धात्मभावनोत्थवीतरागपरमानंदैकरूपसुखानुभवविपरीतेन दृष्टश्रुतानुभू
तभोगाकांक्षारूपनिदानबंधपूर्वकज्ञानतपोदानादिना यान्युपार्जितानि पुण्यकर्माणि तानि हेयानि कस्मादिति चे
त् निदानबंधोपार्जितपुण्येन भवांतरे राज्यादिविभूतौ लब्धायां तु भोगान् त्यक्तुं न शक्नोति तेन पुण्येन नरकादिदुःखं ल
भते रावणादिवत् तेन कारणेन पुण्यानि हेयानीति ये पुनर्निदानरहितपुण्यसहिताः पुरुषास्ते भवांतरे राज्यादिभो
गे लब्धेपि भोगांस्त्यक्त्वा जिनदीक्षां गृहीत्वा चोर्ध्वगतिगामिनो भवंति बलदेवादिवदिति भावार्थः ॥ तथा चोक्तं ॥ ऊर्ध्वगा बल ९१
देवास्सुनिर्निदाना भवांतरे इति वचनात् ॥ ५७ ॥ अथ निर्मलसम्यक्त्वाभिमुखानां मरणमपि भद्रं तेन विना पुण्यमपि सम्मी

चीनं न भवतीति प्रतिपादयति ॥ वरणियदंसणअहिमुहउं मरणु वि जीव लहेसि माणियदंसणविम्मुहउं पुण्णु वि जीव
करेसि ॥ वरइत्यादि ॥ वरं णियदंसणअहिमुहउं वरं किंतु निजदर्शनाभिमुखः सन् मरणु वि जीव लहेसि मरणमपि
हे जीव लभस्व भजस्व माणियदंसणविम्मुहउं मा पुनर्निजदर्शनविमुखः सन् पुण्णु वि जीव करेसि पुण्यमपि हे जीव क
रिष्यसि ॥ तथा च ॥ स्वकीयनिर्दोषिपरमात्मानुभूतिरुचिरूपं त्रिगुप्तिगुप्तलक्षणनिश्चयचारित्राविनाभूतं वीतरागसं
ज्ञं निश्चयसम्यक्त्वं भण्यते तेन हि विमुखः सन् हे जीव मरणमपि लभस्व दोषो नास्ति तेन विना पुण्यं मा कार्षीरिति ॥ अत्र सम्यक्त्व
रहिता जीवाः पुण्यसहिता अपि पापजीवा भण्यंते सम्यक्त्वसहिताः पुनः पूर्वभवांतरोपार्जितपापफलं भुंजाना अपि पुण्य
जीवा भण्यंते येन कारणेन तेन कारणेन सम्यक्त्वसहितानां मरणमपि भद्रं सम्यक्त्वरहितानां च पुण्यमपि भद्रं न भव
ति कस्मात् तेन निदानबंधपुण्येन भवांतरे भोगान् लब्ध्वा पश्चान्नरकादिकं गच्छंतीति भावार्थः ॥ तथा चोक्तं ॥ वरं नरक

सोपि सम्यक्त्वेन हि संयुक्तः न तु सम्यक्त्वहीनस्य निवासो दिवि राजते ॥ अथ तमेवार्थं पुनरपि द्रढयति ॥ जेणिय दं-
सणि अहिमुहा सुक्खु अणंतु लहंति । तिं विणु पुण्णु करंता वि दुक्खु अणंतु सहंति ॥ जेणिय इत्यादि ॥ ये केचिन निजदर्स-
ण अहिमुहा निजदर्शनाभिमुखाः ते पुरुषाः सोक्खु अणंतु लहंति सौख्यमनंतं लभंत इति ॥ तथाहि ॥ निजशुद्धात्मतत्वो-
पलब्धिरुचिरूपनिश्चयसम्यक्त्वाभिमुखा ये ते केचनास्मिन्नेव भवे धर्मपुत्रभीमार्जुनादिवदक्षयसुखं लभंते ये केच-
नः पुनर्नकुलादिवत् स्वर्गसुखं लभंते ये तु सम्यक्त्वरहितास्ते पुण्यं कुर्वाणा अपि दुःखमनंतमनुभवंतीति तात्पर्यं ॥१८८॥
अथ निश्चयेन पुण्यं निराकरोति ॥ पुण्णेण होइ विहवो विहवेण मओ मएण मइमोहो । मइमोहेण य पावं ता पुण्णं अम्ह मा
होउ ॥ पुण्णेण इत्यादि ॥ पुण्णेण होइ विहवो पुण्येन विभवो विभूतिर्भवति विहवेण मओ विभवेन मदो हंकारो गर्वो भवति ॥ ९२
मएण मइमोहो विज्ञानाद्यष्टविधमदेन मतिमोहो मतिभ्रंशो विवेकमूढत्वं भवति मइमोहेण य पावं मतिमूढत्वेन पापं भवति

ता पुण्णं अम्ह मा होउ तस्मादित्थंभूतं पुण्यं अस्माकं मा भूदिति ॥ तथा च ॥ इदं पूर्वोक्तं पुण्यं भेदाभेदरत्नत्रयाराधनारहिते-
न दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधपरिणामसहितेन जीवेन यदुपार्जितं पूर्वभवे तदेव मदमहंकारं जनय-
ति बुद्धिविनाशं च करोति न च पुनः सम्यक्त्वादिगुणसहितं भरतसगररामपांडवादिपुण्यबंधवत् यदि पुनः सर्वे-
षां मदं जनयति तर्हि ते कथं पुण्यभाजनाः संतो मदाहंकारादिविकल्पं त्यक्त्वा मोक्षं गताः इति भावार्थः ॥ तथा चोक्तं चिरं-
तनानां निरहंकारत्वे सत्यं वाचि मतो श्रुतं हृदि दया शौर्यं भुजे विक्रमे लक्ष्मीर्दानमनूनमर्थिनिचये मार्गो गतो निर्वृतेः ।
येषां प्रागजनीह तेपि निरहंकाराः श्रुतेर्गोचराश्चित्रं संप्रति लेशतोपि न गुणास्तेषां तथाप्युद्धताः ॥१८९॥ अथ देवगुरुशा-
स्त्रभक्त्या मुख्यवृत्त्या पुण्यं भवति न च मोक्ष इति प्रतिपादयति ॥ देवहं सत्थहं मुणिवरहं भत्तिए पुण्णु हवेइ । कम्मक्खउ
पुणु होइ णवि अज्जउ संति भणेइ ॥ देवहं इत्यादि ॥ देवहं सत्थहं मुणिवरहं भत्तिए पुण्णु हवेइ देवशास्त्रमुनीनां

परमात्म: भक्त्या पुण्यं भवति कम्मक्खउ पुणु होइ णवि कर्मक्षयः पुनर्मुख्यवृत्त्या नैव भवति एवं कोऽसौ भणति अक्खइ आर्यः किंनामा सं-
९२ तिसंतिनामा जोइ भणति कथयतीति ।तात्पर्यम्। सम्यक्त्वपूर्वकदेवगुरुशास्त्रभक्त्या मुख्यवृत्त्या पुण्यमेव भवति न च मोक्षः
अत्राह प्रभाकरभट्टः यदि पुण्यं मुख्यवृत्त्या मोक्षकारणं न भवति तर्हि उपादेयं च न भवति तर्हि भरतसगररामपांडवादयोऽपि नि-
रंतरं पंचपरमेष्ठिगुणस्मरणदानपूजादिना निर्भरभक्त्या भक्ताः संतः किमर्थं पुण्योपार्जनं कुर्युरिति भगवानाह यथा कोऽपि
रामदेवादिपुरुषविशेषो देशांतरस्थितसीतादिस्त्रीसमीपागतानां पुरुषाणां तदर्थं संभाषणदानसन्मानादिकं करोति
रू९ तथा तेऽपि महापुरुषाः वीतरागपरमानंदैकमोक्षलक्ष्मीसुखसुधारसपिपासिताः संतः संसारस्थितिविच्छेदकारणं वि-
षयकषायोत्पन्नदुर्ध्याननिवाशहेतुभूतं च परमेष्ठिसंबंधिगुणस्मरणदानपूजादिकं कुर्युरिति ।अयमत्र भावा-
र्थः। तेषां पंचपरमेष्ठिभक्त्यादिपरिणतानां कुटुंबिनां पलालवदनीहितं पुण्यमास्रवतीति ।६०। अथ। देवशास्त्रमुनी-

DR. BHAU DAJI MEMORIAL

नां यो सोऽपि निंदां करोति तस्य पापबंधो भवतीति कथयति देवहं सत्थहं मुणिवरहं जो विद्देसु करेइ णियमें पाउ हवेइ त-
सु जिं संसारु भमेइ ।देवहं इत्यादि। देवहं सत्थहं मुणिवरहं जो विद्देसु करेइ देवशास्त्रमुनीनां साक्षात्पुण्यबंधहेतु-
भूतानां परंपरया मुक्तिकारणभूतानां च यो सौ विद्वेषं करोति तस्य किं भवति णियमें पाउ हवेइ इत्थु नियमेन पापं
भवति तस्य येन पापबंधेन किं भवति जिं संसारु भमेइ येन पापेन संसारं भ्रमतीति ।तथ्या। निजपरमात्मपदा-
र्थोपलंभरुचिरूपनिश्चयसम्यक्त्वकारणस्य तत्त्वार्थश्रद्धानरूपव्यवहारसम्यक्त्वस्य विषयभूतानां देवशास्त्रयती-
नां यो सौ निंदां करोति स मिथ्यादृष्टिर्भवति मिथ्यात्वेन पापं बध्नाति पापेन चतुर्गतिसंसारं भ्रमतीति भावार्थः ।६१।
अथ पूर्वसूत्रद्वयोक्तं पुण्यपापफलं दर्शयति पावें णारउ तिरिउ जिउ पुण्णें अमरु वियाणि मिस्सें माणुसगइ लहइ
दोहि वि खइ णिव्वाणु ।६२। पावें इत्यादि पावें पापेन णारउ तिरिउ नारको भवति तिर्यग्भवति कोऽसौ जीउ जीवः पुण्णेन

४७ ९६

परमात्मः ९४ मरुवियाणहपुण्णेनामरो देवो भवतीति जानीहि मिस्सिं माणुसगइ लहइ मिश्रेण पुण्यपापद्वयेन मनुष्यगतिं लभते दोहिंविख
इणिव्वाणु द्वयोरपि क्षये निर्वाणमिति ॥ तथाहि ॥ सहजशुद्धज्ञानानंदैकस्वभावात्परमात्मनः सकाशाद्विपरीतेन छेदनादि
नारकादि तिर्यग्गति दुःखदानसमर्थेन पापकर्मोदयेन नारकतिर्यग्गतिभाजनो भवति जीवः तस्मादेव शुद्धात्मनो विलक्षणे
न पुण्योदयेन देवो भवति तस्मादेव शुद्धात्मनो विपरीतेन पुण्यपापद्वयेन मनुष्यो भवति तस्यैव विशुद्धज्ञानदर्शनस्व
भावस्य निजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन मुक्तो भवतीति तात्पर्यार्थः ॥ तथा चोक्तं ॥ पावेण
णरय तिरियं गम्मइ धम्मेण देवलोयम्मि मिस्सेण माणुसत्तं दोण्हंपि खएण णिव्वाणं ॥ ६० ॥ अथ निश्चयप्रतिक्रमणनिश्चय
प्रत्याख्याननिश्चयालोचनस्वरूपे स्थित्वा व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनं त्यजतीति कथयंति ॥ जिकलं ॥ वंदणु णिंदणु पडि
कमणु पुण्णहं कारणु जेण करइ करावइ अणुमणइ एक्कु वि णाणि ण तेण ॥ वंदणु णिंदणु पडिकमणु वंदननिंदनप्रतिक्र ९५

मणत्रयं किंविशिष्टं पुण्णहं कारण पुण्यस्य कारणं जेण येन कारणेन करइ करावइ अणुमणइ करोति कारयति अनुमो
दयति एक्कु वि एकमपि णाणि ण तेण ज्ञानी पुरुषो न तेन कारणेनेति ॥ तथाहि ॥ निर्विकल्पपरमात्मतत्त्वभावनाबलेन दृष्टश्रुता
नुभूतभोगाकांक्षास्मरणरूपाणां अतीतरागादिदोषाणां निराकरणं निश्चयप्रतिक्रमणं भवति वीतरागचिदानंदैकानुभू
तिभावनाबलेन भाविभोगाकांक्षारूपाणां रागादीनां त्यजनं निश्चयप्रत्याख्यानं भण्यते निजशुद्धात्मोपलंभबलेन वर्त्तमानोद
यागतशुभाशुभनिमित्तानां हर्षविषादादिपरिणामानं निजशुद्धात्मद्रव्यात्पृथक्करणं निश्चयालोचनमिति इत्थंभूतेनि
श्चयप्रतिक्रमणप्रत्याख्यानालोचनत्रये स्थित्वा यो सौ व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्रयं तत्त्रयानुकूलं वंदननिं
दनादिशुभोपयोगं च त्यजति स ज्ञानी भण्यते न चान्य इति भावार्थः ॥ ६१ ॥ अथ ॥ वंदणु णिंदणु पडिकमणु णाणिहि एहु ण
जुत्तु एक्कु जि मिल्लिवि णाणमउ सुद्धउ भाव पवित्तु ॥ वंदणु णिंदणु पडिकमणु वंदननिंदनप्रतिक्रमणत्रयं ण

णिडु एक्कु ण जाणु ज्ञानिनामिदं न युक्तं किं कृत्वा एक्कु जि मेल्लिवि एकमेव मुक्त्वा एकं कं णाणमउ सुद्धउ भाउ पवित्तु ज्ञानम
यं शुद्धभावं पवित्रमिति ॥ तथाहि ॥ पंचेंद्रियभोगाकांक्षाप्रभृतिसमस्तविभावरहितः शून्यः केवलज्ञानाद्यनंतगुणपरमा
त्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिर्विकल्पसमाधिसमुत्पन्नसहजानंदपरमसमरसीभावलक्षणसुखामृ
तरसास्वादेन भरितावस्थो योऽसौ ज्ञानमयो भावः तं भावं मुक्त्वान्यद्व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्र
यं तदनुकूलवंदननिंदनादिशुभोपयोगविकल्पजालं च ज्ञानिनां युक्तं न भवतीति तात्पर्यं ॥ १९२ ॥ अथ ॥ वंद
उ निंदउ पडिकमउ भाउ असुद्धउ जासु पर तसु संजमु अत्थि णवि जं मण सुद्धि ण तासु ॥ वंदउ इत्यादि ॥
वंदउ निंदउ पडिकमउ वंदनं निंदनं प्रतिक्रमणं करोतु भाउ असुद्धउ जासु भावः परिणामः अशुद्धो
जस्य परं नियमेन तसु तस्य पुरुषस्य संजमु अत्थि णवि संयमोऽस्ति नैव कस्मान्नास्ति जं यस्मात्कारणा ९९

त् मण सुद्धि ण तासु मनःशुद्धिर्न तस्येति ॥ तथाहि ॥ नित्यानंदैकरूपशुद्धात्मानुभूतिप्रतिपक्षैर्विषयक
षायाधीनैः ख्यातिपूजालाभादिमनोरथशतसहस्रविकल्पजालमालाप्रपंचोत्पन्नैरपध्यानैर्य
स्य चित्तं रंजितं वासितं तिष्ठति तस्य द्रव्यरूपं वंदननिंदनप्रतिक्रमणादिकं कुर्वाणस्यापि भावसं
यमो नास्तीत्यभिप्रायः ॥ १९३ ॥ एवं मोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये
निश्चयेन पुण्यपापद्वयं समानमित्यादिव्याख्यानमुख्यत्वेन चतुर्दशसूत्रस्थलं समाप्तं ॥ अथानंत
रं शुद्धोपयोगादिप्रतिपादनमुख्यत्वेनैकाधिकचत्वारिंशत्सूत्रपर्यंतं व्याख्यानं करोति तत्रांतरस्थ
लचतुष्टयं भवति ॥ तद्यथा ॥ प्रथमस्थले पंचकेन शुद्धोपयोगव्याख्यानं तदनंतरं पंचदशसूत्रपर्यंतं व्याख्या
नं वीतरागस्वसंवेदनज्ञानमुख्यत्वेन व्याख्यानं तदनंतरं त्रयोदशसूत्रपर्यंतं केवलज्ञानादिगुणस्वरूपे

ण सर्वे जीवाः समा भा इति मुख्यत्वेन व्याख्यानं करोति ॥ यथा ॥ शुभादिविकल्पनिवृत्तिस्वरूपशुद्धोपयोगे संयमादि सर्वे गुण
स्तिष्ठंतीति प्रतिपादयति ॥ सुद्धहं संजमु सीलु तउ सुद्धहं दंसणु णाणु सुद्धहं कम्मक्खउ हवइ सुद्धउ तेण पहाणु ॥ सु
द्धहं इत्यादि ॥ सुद्धहं शुद्धोपयोगिनां संजमु इंद्रियसुखाभिलाषनिवृत्तिबलेन षट्जीवनिकायहिंसानिवृत्तिबलेनात्म
ना आत्मनि संयमनं नियमनं संयमः सर्वविरतिः शुद्धोपयोगिनामेव अथवोपेक्षासंयमापहृतसंयमौ वीतराग
सरागापरनामानौ तावपि तेषामेव संभवतः अथवा सामायिकछेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसंपराय
यथाख्यातभेदेन पंचधा संयमः सोऽपि तेषामेव सीलु स्वात्मनात्मानं स्वात्मनि निर्वृत्तिर्वर्तनमिति निश्चयव्रतं व्रतस्य ९६
रागादिपरिहारेण परिरक्षणं निश्चयशीलं तदपि तेषामेव तउ द्वादशविधतपश्चरणबलेन परद्रव्येच्छानिरोधं
कृत्वा शुद्धात्मनि प्रतपनं विजयनं तप इति तदपि तेषामेव सुद्धहं शुद्धोपयोगिनां दंसणु बह्यस्थावस्थायां स्वशुद्धा

त्मनि रुचिः सम्यग्दर्शनं केवलज्ञानोत्पत्तौ सत्यां तस्यैव फलभूतं अनीहितवृत्ति विपरीताभिनिवेशरहितं परिणामलक्षणं क्षा
यिकसम्यक्त्वं केवलदर्शनं वा तेषामेव णाणु वीतरागस्वसंवेदनज्ञानं तस्यैव फलरूपं केवलज्ञानं वा सुद्धहं शुद्धोपयोगि
नामेव कम्मक्खउ परमात्मस्वरूपोपलब्धिलक्षणो द्रव्यभावकर्मक्षयः हवइ तेषामेव भवति सुद्धउ सुद्धोपयोगपरिणामस्त
दाधारपुरुषो वा तेण पहाणु येन कारणेन पूर्वोक्ताः संयमादयो गुणाः शुद्धोपयोगे लभ्यंते तेन कारणेन स एव प्रधान उपा
देय इति तात्पर्यं ॥ तथा चोक्तं ॥ शुद्धोपयोगफलं ॥ सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं सुद्धस्स य णिव्वाणं सो च्चिय सि
द्धो णमो तस्स ॥ ६४ ॥ अथ निश्चयेन स्वकीयशुद्धभाव एव धर्म इति ॥ कथयति ॥ भाउ विसुद्धउ अप्पणउ धम्मु भणेविणु ले
हु चउगइ दुक्खहं जो धरइ जीउ पडंतउ एहु ॥ भाउ इत्यादि ॥ भाउ भावः परिणामः कथंभूतः विसुद्धउ विशेषेण शुद्धो मि
थ्यात्वरागादिरहितः अप्पणउ आत्मीयः धम्मु भणेवि लेहु धर्मं भणित्वा मत्वा प्रगृहीत यो धर्मः किं करोति चउगइ

परमात्म: एकहं जो धरइ चतुर्गतिदुःखेभ्यः सकाशात् उद्धृत्य कर्ता धरति किं धरति जीउ पडंतउ एक्कु जीवमिमं प्रत्यक्षीभूतं संसा
९७ रे पतंतमिति ॥ तद्यथा ॥ धर्मशब्दस्य व्युत्पत्तिः क्रियते संसारे पतंतं प्राणिनमुद्धृत्य नरेंद्रनागेंद्रदेवेंद्रवंद्ये मोक्षपदे धरती
ति धर्म इति धर्मशब्देनात्र निश्चयेन जीवस्य शुद्धपरिणाम एव ग्राह्यः तस्य तु मध्ये वीतरागसर्वज्ञप्रणीतनयविभागे
न सर्वे धर्मा अंतर्भूता लभ्यंते तथाहि अहिंसालक्षणो धर्मः सोपि जीवशुद्धभावं विना न संभवति सागारानागारलक्षणो धर्मः
सोपि तथैव उत्तमक्षमादिदशविधो धर्मः सोपि जीवशुद्धभावमपेक्षते सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुरित्युक्तं
यद्धर्मलक्षणं तदपि तथैव रागद्वेषमोहरहितः परिणामो धर्मः सोपि जीवशुद्धभाव एव वस्तुस्वभावो धर्मः सोपि तथैव
॥ तथा चोक्तं ॥ धम्मो वत्थुसहावो इत्यादि एवंगुणविशिष्टो धर्मश्चतुर्गतिदुःखेषु पतंतं जीवं धरतीति ॥ अत्राह शिष्यः ॥ शुद्ध ९७
स्त्वेन भणितं शुद्धोपयोगमध्ये संयमादयः सर्वे गुणा लभ्यंते अत्र तु भणितमात्मनः शुद्धपरिणाम एव धर्मस्तत्र सर्वे लभ्यंते

॥ को विशेषः ॥ परिहारमाह ॥ तत्र शुद्धोपयोगसंज्ञा मुख्या अत्र तु धर्मसंज्ञा मुख्येतावद्विशेषः तात्पर्यं तदेव तेन कारणेन सर्वथा
रेण शुद्धपरिणाम एव कर्तव्य इति भावार्थः ॥ ९५ ॥ ॥ अथ विशुद्धभावमोक्षमार्ग इति दर्शयति ॥ सिद्धिहिं केरा पंथडा
भाउ विसुद्धउ एक्कु जो तसु भावहं मुणि चलइ सो किम होइ विमुक्कु ॥ सिद्धिहिं इत्यादि सिद्धिहिं केरा सिद्धेर्मुक्तेः केरा संबं
धी पंथडा पंथा मार्गः कोसौ भाउ भावः परिणामः कथंभूतः विसुद्धउ विशुद्धः एक्कु एक एवाद्वितीयः जो तसु भावहं मुणि चलइ
यस्तस्माद्भावान्मुनिश्चलति सो किं महोइ विमुक्कु स मुनिः कथं मुक्तो भवति न कथमपीति ॥ तद्यथा ॥ योसौ समस्तशुभाशुभसं
कल्पविकल्परहितो जीवस्य शुद्धभावः स एव निश्चयरत्नत्रयात्मको मोक्षमार्गः यस्तस्मात् शुद्धात्मपरिणामान्मुनिश्च्युतो भवति
स कथं मोक्षं लभते किंतु नैव अत्र येन कारणेन निजशुद्धात्मानुभूतिपरिणाम एव मोक्षमार्गस्तेन कारणेन मोक्षार्थिना स
एव निरंतरं कर्तव्य इति तात्पर्यार्थः ॥ ९६ ॥ अथ क्वापि देशांतरे गच्छ किमपि अनुष्ठानं कुरु तथापि चित्तशुद्धिं विना मोक्षो ना

५०
५१

परमात्मः स्तीति प्रकटयति ॥ जहिं भावइ तहिं जाहि जिय जं भावइ करि तं जि । केम इ मोक्खु ण अत्थि पर चित्तहं सुद्धि ण जं जि ॥ जहिं भावइ स्था-
९८ दि ॥ जहिं भावइ तहिं यत्र देशे प्रतिभाति तत्र जाहि गच्छ जिय हे जीव जं भावइ करि तं जि यदनुष्ठानं प्रतिभाति कुरु तदेव
केम इ मोक्खु ण अत्थि कथमपि केनापि प्रकारेण मोक्षो नास्ति पर नियमेन कस्मात् न चित्तहं सुद्धि ण चित्तस्य शुद्धिर्न जं जि या-
स्मादेव कारणादिति ॥ तथाहि ख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपदुर्ध्यानैः शुद्धात्मानुभूतिविपरीतैर्यावत्
कालं हे जीव कापि देशांतरे गच्छ किमप्यनुष्ठानं कुरु तथापि मोक्षो नास्तीति अत्र कामक्रोधाद्यपध्यानेन जीवो भोगानुभवं विना
पि शुद्धात्मभावनाच्युतः सन् भावेन कर्माणि बध्नाति तेन कारणेन निरंतरं चित्तशुद्धिः कर्तव्येति भावार्थः ॥ तथा चोक्तं ॥ कश्चि-
दकलुषिदभूतो कामभोगेहिं मुच्छिदो जीवो ण विभुंजंतो भोगे बंधदि भावेण कम्माणि ॥ ९० ॥ अथ शुभाशुभशुद्धोप- ९८
योगत्रयं कथयति ॥ सुहपरिणामें धम्मु पर असुहें होइ अहम्मु । दोहिं वि एहिं विवज्जियउ सुद्धु ण बंधइ कम्मु ॥ सुहपरिणा-
×चित्तं रंजितं मूर्छितं तन्मयं तिष्ठति तावत्काले ×पं० ५

मे ॥ पदखंडनारूपेण व्याख्यानं क्रियते ॥ सुहपरिणामिं धम्मु पर शुभपरिणामेन धर्मः पुण्यं भवति मुख्यवृत्त्या अ-
सुहें होइ अहम्मु अशुभपरिणामेन भवत्यधर्मः पापं दोहिं वि एहिं विवज्जियउ द्वाभ्यामेताभ्यां शुभाशुभपरिणामाभ्यां
विवर्जितः कोसौ सुद्धु शुद्धो मिथ्यात्वरागादिरहितपरिणामस्तत्परिणतपुरुषो वा किं करोति ण बंधइ न बध्नाति
किं । कम्मु ज्ञानावरणादिकर्मेति ॥ तद्यथा ॥ कृष्णोपाधिपीतोपाधिस्फटिकवदयमात्मा क्रमेण शुभाशुभशुद्धोपयो-
गरूपेण परिणामत्रयं परिणमति तेन तु मिथ्यात्वविषयकषायाद्यवलंबनेन पापं बध्नाति अर्हत्सिद्धाचार्योपाध्या-
यसाधुगुणस्मरणदानपूजादिना संसारस्थितिविच्छेदपूर्वकं तीर्थंकरनामकर्मादिविशिष्टगुणपुण्यमनीहि-
तवृत्त्या बध्नाति शुद्धात्मावलंबनेन शुद्धोपयोगेन तु केवलज्ञानाद्यनंतगुणरूपं मोक्षं च लभते इति अत्रोपयोगत्र-
यमध्ये मुख्यवृत्त्या शुद्धोपयोग एवोपादेय इत्यभिप्रायः एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये सूत्रपंचकेन

परमात्मः ९९

शुद्धोपयोगव्याख्यानमुख्यत्वेन प्रथमांतरस्थलं गतं अत ऊर्ध्वं तस्मिन्नेव महास्थलमध्ये पंचदशसूत्रपर्यंतं वीतरागस्व
संवेदनज्ञानमुख्यत्वेन व्याख्यानं क्रियते दाणें लब्भइ सोउ पर इंदत्तणु वि तवेण जम्मणमरणविवज्जियउ लब्भइ णाणे
ण दाणेन लभ्यते परं भोगपरं दानेन लभ्यते पंचेंद्रिय भोगपरं तियमेन इंदत्तणु वि तवेण इंद्रत्वमपि तपसा
लभ्यते जम्मणमरणविवज्जियउ जन्ममरणविवर्जितं पउ पदं स्थानं लब्भइ लभ्यते प्राप्यते केन णाणें वीतराग
स्वसंवेदनज्ञानेनेति अत्राह नयनेन सम्यक्त्व सहितेन तु यद्यपि परंपरया निर्वाणं लभ्यते त
थापि विविधाभ्युदयरूप पंचेंद्रिय भोग एव सम्यक्त्व सहित तपसा तु यद्यपि निर्वाणं लभ्यते तथापि देवेंद्र चक्रवर्त्या
दि विभूति पूर्वकं एव वीतराग स्वसंवेदन सम्यक्ज्ञानेन सविकल्पेन यद्यपि देवेंद्र चक्रवर्त्यादि विभूति विशेषो भ
वति तथापि निर्विकल्पेन मोक्ष एवेति अत्राह प्रभाकरभट्टः हे भगवन् यदि विज्ञानमात्रेण मोक्षो भवति तर्हि सांख्या

दयोपि वदंति ज्ञानमात्रादेव मोक्षस्तेषां किमिति दूषणं दीयते भवद्भिरिति अत्र वीतरागनिर्विकल्पस्वसंवे
दनसम्यग्ज्ञानमिति भणितं तिष्ठति तेन वीतरागविशेषणेन चारित्रं लभ्यते सम्यक्विशेषणेन सम्यक्त्वमपि लभ्यते
पाषाणकवदेकस्यापि मध्ये त्रयमस्ति तेषां मते तु वीतरागविशेषणं नास्ति सम्यग्विशेषणं च नास्ति ज्ञानमात्रमेव तेन दूषणं
भवतीति भावार्थः देउ णिरंजणु इउं भणइ णाणिं मुक्खु ण भंति
णाणविहीणा जीवडा चिरु संसारु भमंति देवदेवः किं विशिष्टः णिरंजणु निरंजनः अनंतज्ञानादिगुणस
हितो अष्टादश दोषरहितश्च इउं भणइ एवं भणति एवं किं णाणिं मुक्खु वीतराग निर्विकल्प स्वसंवेदनरूपेण सम्यक्ज्ञा
नेन मोक्षो भवति ण भंति न भ्रांति संदेहो नास्ति णाणविहीणा जीवडा पूर्वोक्त स्वसंवेदनज्ञानेन विहीना जीवाः चिरु संसा
रु भमंति चिरं बहुतरं कालं संसारं परिभ्रमंतीति अत्र वीतरागस्वसंवेदनज्ञानमध्ये यद्यपि सम्यक्त्वादित्रयमस्ति

डाक्टर भाऊदाजी स्मृतिसंग्रहालय
DR BHAU DAJI MEMORIAL

परमात्मः थापि सम्यक्ज्ञानस्यैव मुख्यता विवक्षितो मुख्य इति वचनादिति भावार्थः ॥२००॥ अथ पुनरपि तमेवार्थं दृष्टांतदार्ष्टांतिकाभ्यां निश्चि
१०० नोति ॥ णाणविहीणहं मोक्खपउ जीव म कासु वि जोइ । बहुएं सलिलविरोलियइं करु चोप्पडउ ण होइ ॥ णाण इत्यादि ॥ णाण
विहीणहं ख्यातिपूजालाभादिदुष्टभावपरिणतचित्तं मम कोपि न जानातीति मत्वा वीतरागपरमानंदैकसुखरसानुभवरू
पां चित्तशुद्धिमकुर्वाणस्य बहिरंगबगवेषेण लोकरंजनं मायास्थानं तदेव सत्यं तत्प्रभृतिसमस्तविकल्पकल्लोलमाला
त्यागेन निजशुद्धात्मसंवित्तिनिश्चयेन संज्ञानं तेन सम्यक्ज्ञानेन विना मोक्खपउ मोक्षपदं स्वरूपं जीव हे जीव म कासु वि जोइ ॥
मा कस्यापि अवलोकय ॥ दृष्टांतमाह ॥ बहुयइं सलिलविरोलियइं बहुनापि सलिलेन मथितेन करु करो हस्तः चुप्पडउ ण हो
इ चिक्कणः स्निग्धो न भवतीति अत्र यथा बहुतरेपि सलिले मथितेपि हस्तः स्निग्धो न भवतीति तथा वीतरागशुद्धात्मानुभूति १००
लक्षणेन ज्ञानेन विना बहुनापि तपसा मोक्षो न भवतीति तात्पर्यं ॥२०१॥ अथ निश्चयनयेन निजात्मबोधज्ञानबाह्यं ज्ञानं तेन

प्रयोजनं नास्तीत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति ॥ जं णियबोहहं बाहिरउ णाणु वि कज्जु ण तेण । दुक्खहं
कारणु जेण तउ जीवहं होइ खणेण ॥ जं इत्यादि ॥ जं जत् णियबोहहं बाहिरउ ध्यानश्रुतज्ञानतपश्चरणादिकं कृत्वापि दृष्टश्रु
तानुभूतभोगाकांक्षावासितचित्तेन रूपलावण्यसौभाग्यबलदेववासुदेवकामदेवेन्द्रादिपदप्राप्तिरूपभाविभोगकारणक
रणं यन्निदानबंधस्तदेवसत्यं तत्प्रभृतिसमस्तमनोरथविकल्पजालावलीरहितत्वेन विशुद्धज्ञानदर्शनस्वभावो नि
जात्मावबोधो निजबोधस्तस्मान्निजबोधात् बाह्यं यत् णाणु वि कज्जु ण तेण शास्त्रादिजनितं ज्ञानमपि यत्तेन कार्यं नास्ति ॥
कस्मादिति चेत् ॥ दुक्खहं कारणु दुःखस्य कारणं जेण येन कारणेन तउ वीतरागस्वसंवेदनरहितं तपः जीवहं जीवस्य हो
इ भवति खणेण क्षणमात्रेण कालेन इति अत्र यद्यपि शास्त्रजनितं ज्ञानं स्वशुद्धात्मपरिज्ञानरहितं तपश्चरणं च मुख्यवृत्त्या
दुःखकारणं भवति तथापि मुक्तिकारणं न भवतीत्यभिप्रायः ॥२०२॥ अथ येन मिथ्यात्वरागादिवृद्धिर्भवति तदात्मज्ञानं न

भवतीति निरूपयति॥ तं णिय णाणु जि होइ ण वि जेण पवड्ढइ राउ दिणयरकिरणहं पुरउ जिय किं विलसइ तमराउ॥ तं
मित्यादि॥ तं तत् णिय णाणु जि होइ ण वि निजज्ञानमेव न भवति वीतरागनित्यानंदैकस्वभावनिजपरमात्मतत्वपरि
ज्ञानमेव न भवति येन ज्ञानेन किं भवति जेण पवड्ढइ येन प्रवर्द्धते को सौ राउ शुद्धात्मभावनासमुत्पन्नवीतरागपरमा
नंदप्रतिबंधकपंचेंद्रियविषयाभिलाषरागः॥ अत्र दृष्टांतमाह॥ दिणयरकिरणहं पुरउ जिय दिनकरकिरणानां
पुरतो हे जीव किं विलसइ किं विलसति किं शोभते अपि तु नैव को सौ तमराउ तमोरागः तमोव्याप्तिरिति अत्रेदं तात्पर्यं
यस्मिन् शास्त्राभ्यासज्ञाने जाते ऽप्यनाकुलत्वलक्षणपारमार्थिकसुखप्रतिपक्षभूता आकुलत्वोत्पादका रागादयो वृद्धिं
गच्छंति तं निश्चयनयेन ज्ञानं न भवति कस्माद्विशिष्टमोक्षफलाभावादिति॥ १०२॥ अथ ज्ञानिनां निजशुद्धात्मस्वरूपं १०३
विहायनान्यत्किमप्युपादेयमिति दर्शयति॥ अप्पा मिल्लिवि णाणियहं अण्णु ण सुंदरु वत्थु तेण ण विसयहं मणु रमइ

जाणंतहं परमत्थु॥ अप्पा इत्यादि॥ अप्पा मिल्लिवि विशुद्धबुद्धैकस्वभावं परमात्मपदार्थं मुक्त्वा णाणियहं ज्ञानिनां मिथ्या
त्वरागादिपरिहारेण निजशुद्धात्मद्रव्यपरिज्ञानपरिणतानां अण्णु ण सुंदरु वत्थु अन्यन्न सुंदरं समीचीनं वस्तु प्रतिभा
ति येन कारणेन तेण ण विसयहं मणु रमइ तेन कारणेन शुद्धात्मोपलब्धिप्रतिपक्षभूतेषु पंचेंद्रियविषयरूपकामभोगे
षु मनो न रमति किं कुर्वतां जाणंतहं जानतां परमत्थु वीतरागसहजानंदैकपारमार्थिकसुखाविनाभूतं परमात्मानमेवे
ति तात्पर्यं॥ १०३॥ अथ तमेवार्थं दृष्टांतेन समर्थयति॥ अप्पा मिल्लिवि णाणमउ चित्ति ण लग्गइ अण्णु मरगउ जें परि
याणियउं तहु कच्चें कउ गण्णु॥ अप्पा इत्यादि॥ अप्पा मिल्लिवि आत्मानं मुक्त्वा कथंभूतं णाणमउ ज्ञानमयं केवलज्ञाना
न्तर्भूतानंतगुणमयं चित्ति मनसि न लग्गइ न लगति न रोचते न प्रतिभाति किं अण्णु निजपरमात्मस्वरूपादन्यत् अत्रार्थे
दृष्टांतमाह मरगउ जें वियाणियउ मरकतरत्नविशेषो येन परिज्ञातः तत्कृतस्वरत्नपरीक्षापरिज्ञानसहितस्य पुरुषस्य

परमात्म: कर्थं कर्तृगतः कालेन किं गच्छंतं किमपेक्षा तस्येत्यभिप्रायः ॥ ७१ ॥ अथ कर्मफलं भुंजानः सन् यो सौ रागद्वेषं करोति स कर्म ब
१०२ ध्नातीति कथयति ॥ ७२ ॥ भुंजंतु वि णियकम्मफलु मोहइ जो जि करेइ । भाउ असुंदरु सुंदरु वि सो पर कम्मु जणेइ ॥ भुंजंतु
विइत्यादि ॥ भुंजंतु वि भुंजानो पि किं नियकम्मफलु वीतराग परमात्म द्रव्यस्वभावानुभूति विपरीतं निजोपार्जितशु
भाशुभ कर्मफलं मोहइ निर्मोहशुद्धात्म प्रतिकूलमोहोदयेन जो जि करेइ यः एवंभूतः करोति किं भाउ भावं परिणा
मं किं विशिष्टं असुंदरु सुंदरु वि अशुभं शुभं मपि सो पर स एव भावः कम्मु जणेइ शुभाशुभं कर्म जनयति ॥ अथ म
त्र भावार्थः ॥ उदयागते कर्मणि यो सौ स्वस्वभावच्युतः सन् रागद्वेषौ करोति स एव कर्म बध्नाति अथ उदयागते क
र्मणि तु भवे यो सौ रागद्वेषौ न करोति । स कर्म न बध्नातीति कथयति ॥ भुंजंतु वि णियकम्मफलु जो तहिं राउ ण जाइ । १०२
सो णवि बंधइ कम्मु पुणु संचिउ जेण विलाइ ॥ भुंजंतु विइत्यादि ॥ भुंजंतु वि भुंजानो पि किं नियकम्मफलु निजकर्मफलं

निजकर्मफलं निजशुद्धात्मोपलंभाभावेनोपार्जितं पूर्ववत् शुभाशुभं कर्म तस्य फलं सो यो जीवः तहिं तत्र कर्मणि भ
वप्रस्तावे राउ ण जाइ रागं न गच्छति वीतराग चिदानंदैक स्वभाव शुद्धात्मतत्त्व भावनोत्पन्न सुखामृत तृप्तः सन् रागद्वे
षौ न करोति सो स जीवः णवि बंधइ नैव बध्नाति ॥ किं नैव बध्नाति ॥ कम्मु ज्ञानावरणादि कर्म पुणु पुनरपि येन कर्म
बंधाभाव परिणामेन किं भवति संचिउ जेण विलाइ पूर्वसंचितं कर्म येन वीतराग परिणामेन विलयं विनाशं ग
च्छतीति ॥ अत्राह प्रभाकरभट्टः ॥ कर्मोदयफलं भुंजानो पि ज्ञानी कर्मणा न बध्यते इति सांख्यादयो पि वदंति तेषां
किमिति दूषणं दीयते भवद्भिरिति ॥ भगवानाह ॥ ते निजशुद्धात्मानुभूति लक्षणं वीतरागचारित्र निरपेक्षा वदंति
तेन कारणेन तेषां दूषणमिति भावार्थः ॥ ७३ ॥ अथ यावत्कालमणुमात्रमपि रागं न मुंचति तावत्कालं कर्मणा न मुच्यते
॥ इति प्रतिपादयति ॥ जो अणुमित्तु वि राउ मणि जाम ण मिल्लइ एत्थु । सो णवि मुच्चइ ताम जिय जाणंतु वि परमत्थु ॥ जो

परमात्म: ॥जोइया॥ जोयः कर्त्ता अणुमित्तु वि अणुमात्रमपि स्वल्पमपि राउ वीतरागसदानंदैकशुद्धात्मनो विलक्षणं पंचेंद्रियविषय
१०२ सुखाभिलाषरागं मणि मनसि जाम न मिल्लइ यावंतं कालं न मुंचति एत्थु अत्र जगति सो ण विमुच्चइ स जीवो नैव मुच्यते
ज्ञानावरणादिकर्मणा तमिनावंतं कालं जिय हे जीव किं कुर्वन्नपि जाणंतु वि वीतरागानुष्ठानरहितः सन् शास्त्रमात्रेण
जानन्नपि कं जानन् परमत्थु परमात्मशब्दवाच्यं निजशुद्धात्मतत्त्वमिति॥ अयमत्र भावार्थः॥ निजशुद्धात्मस्वभावं जानन्नपि
शुद्धात्मोपलब्धिलक्षणं वीतरागचारित्रभावनां विना मोक्षं न लभंत इति॥१०२॥ अथ निर्विकल्पात्मभावनाशून्यः शास्त्रं पठ
न्नपि तपश्चरणं कुर्वन्नपि परमार्थं न वेत्ति कथयति॥ बुज्झइ सच्छइ तउ चरइ पर परमत्थु ण वेइ ताव ण मुंचइ जाम
मणवि इहु परमत्थु मुणेइ॥ बुज्झइ इत्यादि॥ बुज्झइ बुध्यति कानि सच्छइ शास्त्राणि न केवलं शास्त्राणि बुध्यते तउ चरइ
तपश्चरति परं परं किंतु परमत्थु ण वेइ परमार्थं न वेत्ति न जानाति कस्मान्न वेत्ति न जानाति यद्यपि व्यवहारेण परमा १०२

त्मप्रतिपादकशास्त्रेण ज्ञायते तथापि॥ निश्चयेन वीतरागस्वसंवेदनज्ञानेन परिछेद्यते यद्यप्यनशनादिद्वादश
विधितपश्चरणेन बहिरंगसहकारिकारणभूतेन साध्यते तथापि निश्चयेन निर्विकल्पशुद्धात्मविश्रांतिलक्षण
वीतरागचारित्रसाध्यो यो सो परमार्थशब्दवाच्यो निजशुद्धात्मा तत्र निरंतरानुष्ठानाभावात् ताव ण मुंचइ तावंतका
लं न मुच्यते केन कर्मणा जाम ण वि एहु परमत्थु मुणेइ यावंतं कालं नैव तं पूर्वोक्तलक्षणं परमार्थं मनुते जानाति
श्रद्धते सम्यगनुभवतीति॥ इदमत्र तात्पर्यं॥ यथा प्रदीपेन विवक्षितं वस्तु निरीक्ष्य गृहीत्वा च प्रदीपः त्यज्यते तथा शु
द्धात्मतत्त्वप्रतिपादकशास्त्रेण शुद्धात्मतत्त्वं ज्ञात्वा गृहीत्वा च प्रदीपस्थानीयः शास्त्रविकल्पस्त्यज्यत इति॥१०३॥ अ
थ यो सौ शास्त्रं पठन्नपि विकल्पं न मुंचति निश्चयेन देहस्थं शुद्धात्मानं न मन्यते॥ स जडो भवतीति प्रतिपादयति॥
सत्थु पढंतु वि होइ जडु जो ण हणेइ वियप्पु देहि वसंतु वि णिम्मलउ णवि मण्णइ परमप्पु॥ सत्थु इत्यादि॥ सत्थु पढंतु वि

शास्त्रंपठन्नपिहोइजडुसजडोभवति यःकिंकरोति जोणहलेइवियप्पु यःकर्त्ताशास्त्राभ्यासफलभूतस्यरागादिवि
कल्परहितस्यनिजशुद्धात्मस्वभावस्यप्रतिपक्षभूतंमिथ्यात्वरागादिविकल्पंनहंति नकेवलंविकल्पंनहंति देह
शास्त्रंपठन्नपिहोइजडुसजडोभवति यःकिंकरोति जोणहलेइवियप्पु यःकर्त्ताशास्त्राभ्यासफलभूतस्यरागादिवि
कल्परहितस्यनिजशुद्धात्मस्वभावस्यप्रतिपक्षभूतंमिथ्यात्वरागादिविकल्पंनहंति नकेवलंविकल्पंनहंति देहवसं
तुविदेहवसंतमपिणिम्मलुतउनिर्म्मलंकर्म्ममलरहितंणविमणइ नैवमन्यतेनश्रद्धत्तेकंपरमप्पुनिजपरमात्मानमि
ति अत्रेदंव्याख्यानंज्ञात्वात्रिगुप्तसमाधिंकृत्वाचस्वयंभावनीयंयदातुत्रिगुप्तिगुप्तसमाधिकर्त्तुंनायाति तदाविषय
कषायवंचनार्थंशुद्धात्मभावनास्मरणदृढीकरणार्थंचबहिर्विषयेव्यवहारज्ञानवृध्यर्थंचपरेषांकथनीयंकिं १०४
तुतथापिपरप्रतिपादनव्याजेनमुख्यवृत्तास्वकीयजीवएवसंबोधनीयः॥कथमितिचेत्॥इदमनुत्पन्नमिदंव्याख्या

नंनभवति मदीयमनसियदिसमीचीनंनप्रतिभाति तर्हित्वमेवस्वयंकिंनभावयसीतितात्पर्यं॥२४॥ अथबोधार्थंशा
स्त्रंपठन्नपियस्यविशुद्धात्मप्रतीतिलक्षणोबोधोनास्तिसमूढोभवतीतिप्रतिपादयति॥छ॥बोहणिमित्तेसत्थुकिलले
इपढिज्जइइत्थु तेणविबोहुणजासुवरसोकिंमूढणतत्थु॥ बोधनिमित्तेनकिलशास्त्रंलोकेपठ्यते अत्रतेनैवकार
णेनबोधोनयस्य कथंभूतोवरोविशिष्टः सकिंमूढोननभवति किंतुभवत्येवतथ्यमिति॥तद्यथा॥अत्रयद्यपिलोकव्यव
हारेणकविगमकवादित्वाग्मित्वादिलक्षणंशास्त्रजनितोबोधोजल्प्यते॥तथापि॥निश्चयेनपरमात्मप्रकाशकाध्यात्म
शास्त्रोत्पन्नोवीतरागस्वसंवेदनरूपःसएवबोधोग्राह्योनचान्यः॥तेनतुबोधेनविनाशास्त्रंपठन्नपिमूढोभवतीति अ
त्रयःकोपिपरमात्मबोधजनकमल्पशास्त्रंज्ञात्वापिवीतरागभावनंकरोतिससिध्यतीति॥तथाचोक्तं॥वीरावेरग्गप
राथोवंपिहुसिक्खिऊणसिझंति॥णहुसिझंतिविरागेणविणापठिदेसुविसव्वसत्थेसु॥इत्यादि॥पाठमात्रंग्रहीत्वापरेषांबहुशास्त्र

परमात्मः
१०५

ज्ञानिनां दूषणं न कर्त्तव्यमिति बहुश्रुतैरप्यन्येषां अल्पश्रुततपोधनानां दूषणं न कर्त्तव्यं ॥ कस्मादिति चेत् दूषणे कृते सति
सति परस्परं रागद्वेषोत्पत्तिर्भवति तेन ज्ञानतपश्चरणादिकं नश्यतीति भावार्थः ॥ अथ वीतरागस्वसंवेदनज्ञानरहिता
नां तीर्थभ्रमणेन मोक्षो न भवतीति कथयति ॥ ३ ॥ तित्थइं तित्थु भमंताहं मूढहं मोक्खु ण होइ । णाणविवज्जिउ जेण जिय मुणि
वरु होइ ण सोइ ॥ तीर्थं तीर्थं प्रति भ्रमतां मूढात्मनां मोक्षो न भवति कस्मादिति चेत् ज्ञानविवर्जितो येन कारणेन
हे जीव मुनिवरो न भवति स एवेति ॥ तथाहि ॥ निर्दोषिपरमात्मभावनोत्पन्नवीतरागपरमाह्लादस्यंदिसुंदरानंदरूपनि
र्मलनीरप्रवाहनिर्भरज्ञानदर्शनादिगुणसमूहचंदनादिकुसुमवनविराजितं देवेंद्रचक्रवर्तिगणधरादिभव्यजीव
तीर्थयात्रिकसमूहस्य श्रवणसुखकरदिव्यध्वनिरूपराजहंसप्रभृतिविविधपक्षिकोलाहलमनोहरं यदर्हद्वीतरागस
र्वज्ञस्वरूपं तदेव निश्चयेन गंगादितीर्थं न लोकव्यवहारप्रसिद्धं गंगादिकं परमनिश्चयेन तु जिनेश्वरपरमतीर्थस

DR BHAU DAJI MEMORIAL

स्यं संसारतरणोपायकारणभूतत्वाद्वीतरागनिर्विकल्पपरमसमाधिरतानां निजशुद्धात्मतत्त्वस्मरणमेव तीर्थं व्य
वहारेण तु तीर्थंकरपरमदेवादिगुणस्मरणहेतुभूतं मुख्यवृत्त्या पुण्यबंधकारणं तन्निर्वाणस्थानादिकं च तीर्थमिति
॥ अयमत्र भावार्थः ॥ निश्चयतीर्थश्रद्धानपरिज्ञानानुष्ठानरहितानामज्ञानिनां शेषतीर्थं मुक्तिकारणं न भवतीति
॥ ८२ ॥ अथ ज्ञानिनां तथैवाज्ञानिनां च यतीनामंतरं दर्शयति ॥ णाणिहिं मूढहं मुणिवरहं अंतरु होइ महंतु देहु
वि मिल्लइ णाणियउ जीवहं भिन्नु मुणंतु ॥ ८३ ॥ ज्ञानिनां मूढानां च मुनिवराणामंतरं विशेषो भवति कथंभूतं महत् दे
हमपि मुंचति कोसौ ज्ञानी किं कुर्वन् सन् जीवात्सकाशाद्भिन्नं मन्यमानः जानन्निति ॥ तथाहि ॥ वीतरागस्वसंवेदनज्ञानी
कलत्रादिबहिर्द्रव्यं तावद्दूरे तिष्ठतु शुद्धबुद्धैकस्वभावात् स्वशुद्धात्मतत्त्वस्वरूपात्सकाशात् पृथग्भूतं जानन् स्वकी
यं देहमपि त्यजति मूढात्मा पुनः स्वीकरोतीति तात्पर्यं ॥ ८३ ॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये पंचद

परमात्म॰ तः सूत्रैः वीतरागस्वसंवेदनज्ञानमुख्यत्वेन द्वितीयमंतरस्थलं समाप्तं॥ तदनंतरं तस्यैव महास्थलमध्ये सूत्रा
१०६ ष्टकपर्यंतं परिग्रहत्यागमुख्यत्वेन तृतीयमंतरस्थलं प्रारभ्यते॥ तद्यथा॥ जे णइं इक्कइं मूढु परु भुवणु वि एहु असेसु
बहुविहधम्मिसे णजिय दोहिंमि एहु विसेसु॥ २३॥ तातुं गृहीतुमिछति कोसौ मूढो बहिरात्मा परः कोर्थः नियमेन किंतु
वनमप्येतत् अशेषं समस्तं केन कृत्वा बहुविधधर्ममिषेण व्याजेन हे जीव द्वयोरप्येषविशेषः कयोर्द्वयोः पूर्वोक्ति
सूत्रकथितज्ञानिजीवस्यात्रोक्तपुनरज्ञानिजीवस्य च॥ तद्यथाहि॥ वीतरागसहजानंदैकसुखरसास्वादरूपः स्वशुद्धात्मै
व उपादेय इति रुचिरूपं सम्यग्दर्शनं तस्यैव परमात्मनः समस्तमिथ्यात्वरागाद्यास्रवेभ्यः पृथग्रूपेण परिछित्तिरूपं
सम्यक्ज्ञानं तत्रैव रागादिपरिहाररूपेण निश्चलचित्तवृत्तिः सम्यक्चारित्रं इत्येवं निश्चयरत्नत्रयस्वरूपं तत्त्रयात्मक १०६
मात्मानमरोचमानस्तथैवाजानन्नभावयंश्च मूढात्मा किं करोति समस्तं जगद्धर्मव्याजेन ग्रहीतुमिछति पूर्वोक्तज्ञानी

मुक्तिमिछतीति॥ भावार्थः॥ २१४॥ अथ शिष्यकरणाद्यनुष्ठानेन पुस्तकाद्युपकरणेनाज्ञानी तुष्यति ज्ञानी पुनर्बंधहेतुं
जानन् सन् लज्जां करोतीति॥ प्रकटयति॥ २१॥ चिल्लाचिल्लीपुत्थियहिं तूसइ मूढु णिभंतु एयहिं लज्जइ णाणियउ बंधहं
हेउ मुणंतु॥ २१॥ शिष्यार्जिकादीक्षादानेन पुस्तकप्रभृत्युपकरणैश्च तुष्यति संतोषं करोति कोसौ मूढः कथंभूतो निर्भ्रा
न्तः एतैर्बहिर्द्रव्यैर्लज्जां करोति कोसौ ज्ञानी किं कुर्वन्नपि पुण्यं बंधहेतुं जानन्नपि॥ तथाच॥ पूर्वसूत्रोक्तसम्यग्दर्शनज्ञा
नचारित्रलक्षणं निजशुद्धात्मस्वभावमश्रद्धानो विशिष्टज्ञानभेदेनाजानंश्च तथैव वीतरागचारित्रेण भावयन्मू
ढात्मा किं करोति पुण्यबंधकारणमपि जिनदीक्षादानादिशुभानुष्ठानं पुस्तकाद्युपकरणं वा मुक्तिकारणं मन्यते ज्ञानी तु
यद्यपि साक्षात्पुण्यबंधकारणं मन्यते परंपरया मुक्तिकारणं च तथापि निश्चयेन मुक्तिकारणं न मन्यत इति तात्पर्यं॥
२१५ अथ चट्टपट्टकुंडिकाद्युपकरणैर्मोहमुत्पाद्य मुनिवराणामुत्पथे पात्यंत इति प्रतिपादयति॥ [illegible]॥ चट्टहिं पट्टहिं

६

परमात्मं
१०८

ॐ कियहिं चिल्ला चिल्लियएहिं मोहउ जेण विलग्गु लिविरहं उप्पद्दियाडियत्ते दि ॥ ८८ ॥ वदपद ॐ किंका
द्युपकरणैः शिष्या र्जिकादियरिवारिस्य कर्त्तभूतैर्मोहं जनयित्वा केषांचु निवराणां पश्चाउन्मार्गे
पातितास्तु तैस्तथा हि यथा कश्चिदजीर्णनयेन विशिष्टाहारं त्यक्त्वा लंघनं कर्वन्नास्ते पश्चा
दजीर्णप्रतिपक्षभूतं किमपि मिष्टौषधं गृहीत्वा जिह्वालंपटो नौषधेनापि अजीर्णं करोत्यज्ञानी
न च ज्ञानीति ॥ तथापि ॥ कोपि तपोधनो विनीतवनितादिकं मोहभयेन त्यक्त्वा जिनदीक्षां गृही
त्वा च शुद्धबुद्धैकस्वभावनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिरोगत्वप्रतिपक्ष १०८
भूतमजीर्णरोगस्थानीयमोहमुत्पाद्यात्मनः किं कृत्वा किमप्यौषधस्थानीयमुपकरणादि...

त्वा कोसाववज्ञानी न तु ज्ञानीति ॥ इदमत्र तात्पर्यं ॥ परमोपेक्षासंयमधरेण शुद्धात्मानुभूतिप्रतिपक्ष
भूतं सर्वोपि तावत्परिग्रहस्त्याज्यः परमोपेक्षासंयमाभावे तु वीतरागशुद्धात्मानुभूतिभावसंया
मरक्षणार्थं विशिष्टसंहननादिशक्त्यभावे सति यद्यपि तपःपर्यायशरीरसहकारीभूतमन्नपा
नसंयमशौचज्ञानोपकरणतृणमयप्रावरणादिकं किमपि गृह्णाति ॥ तथापि ममत्वं न करोतीति
॥ तथा चोक्तं ॥ रम्येषु वस्तुवनितादिषु वीतमोहो मुह्येद्वृथा किमिति संयमसाधनेषु धीमान् कि
मामयभयात्परिहृत्य भुक्तिं पीत्वौषधं व्रजति जातुचिदप्यजीर्णं ॥ ८८ ॥ अथ केनापि निजदी
क्षां गृहीत्वा शिरोलुंचनं कृत्वापि सर्वसंगपरित्यागमकुर्वतात्मा त्मानं वंचितमिति निरूपयति

परमात्म: ॥छ॥ केनणवि अप्पउ वंचियउं सिर लुंचिवि छारेण सयल वि संगण परिहरिय जिणवर लिंगधरेण
३०८ ॥छ॥ केनाप्यात्मा वंचितः किं कृत्वा शिरोलुंचनं कृत्वा केन भस्मना कस्मादिति चेत् यतः सर्वेपि सं
गा न परिहृताः कथंभूतेन भूत्वा जिनवरलिंगधारकेणेति ॥ तद्यथा ॥ वीतराग निर्विकल्प नित्यानंदैक
रूपसुखरसास्वादपरिणत परमात्मभावनास्वभावेन तीक्ष्णशस्त्रोपकरणेन बाह्याभ्यंतरपरिग्रहकां
क्षारूपप्रभृति समस्त मनोरथ रूप कल्लोलमाला परित्यागरूपं भुनो मुंडनं धर्ममकृत्वा जिनदीक्षारू
पं शिरोमुंडनं कृत्वापि केनाप्यात्मा वंचितः कस्मात् ॥ सर्वसंगपरित्यागाभावादिति ॥ अत्रेदं व्याख्या ३०८
नं ज्ञात्वा स्वशुद्धात्मभावनोत्थवीतरागपरमानंदपरिग्रहं कृत्वा ज्ञानत्रये कालत्रयेपि मनोवचनका

येः कृतकारितानुमतैश्च दृष्टश्रुतानुभूताभिः परिग्रहश्च त्यक्तानुभूति विपरीतपरिग्रहकां
क्षात्याज्यो स्पृहेति भावार्थः ॥ २९० ॥ अथ ये सर्वसंगपरित्यागरूपं जिनलिंगं गृहीत्वापीष्टपरिग्रहान् गृह्णं
ति ते छर्दिं कृत्वा पुनरपि गिलंति ॥ तामिति प्रतिपादयति ॥ जे जिणलिंगु धरेवि मुणि इट्ठपरि
ग्गह लिंति छर्दि करेविणु ते जि जिय सा पुणु छर्दि गिलंति ॥ छ ॥ ये केचन जिनलिंगं गृहीत्वापि मुन
यस्तपोधना इष्टपरिग्रहान् ल्लांति गृह्णंति ॥ ते किं कुर्वंति ॥ छर्दिं कृत्वा ते एव हे जीव तां पुनश्छर्दिं गि
लंतीति ॥ तथापि ॥ गृहस्थापेक्षया चेतनपरिग्रहः पुत्रकलत्रादिः सुवर्णादिः पुनरचेतनः साभर
णवनितादि मिश्रः तपोधनापेक्षया छात्रादि सचित्तः पिच्छकमंडलादि पुनरचित्तः उप

परमात्म: करणसहितछात्रादिरूपमिश्रः॥ अथवा मिथ्यात्वरागादिरूपसचित्तः द्रव्यकर्मनोकर्मरूपं पु
१०९ नरचित्तः॥ द्रव्यकर्मभावकर्मरूपस्तु मिश्रः॥ वीतरागत्रिगुप्तसमाधिस्थः पुरुषापेक्षया सिद्ध
स्वरूपः॥ सचित्तः पुद्गलादिपंचद्रव्यरूपः पुनरचित्तः गुणस्थानमार्गणास्थानजीवस्थानादि
परिणतः संसारीजीवस्तु मिश्रश्चेति॥ एवंविधबाह्याभ्यंतरपरिग्रहरहितं जिनलिंगं गृहीत्वापि
ये शुद्धात्मानुभूतिविलक्षणं इष्टपरिग्रहं गृह्णंति ते छर्दिताहारयाहकपुरुषसदृसा भवंती
ति॥ भावार्थः॥ तथाचोक्तं॥ त्यक्त्वा स्वकीयपितृमित्रकलत्रपुत्रान् सक्तोन्यगेहवनितादिषु निर्मु १०९
क्तः दोर्भ्यां पयोनिधिसमुत्तत्तनक्रचक्रं प्रोत्तीर्य गोष्पदजलेषु निमग्नवान् सः॥ ८८॥ अथये

ख्यातिपूजालाभनिमित्तं शुद्धात्मानं त्यजंति॥ तेलोहकीलनिमित्तं देवं देवकुलं च दहंती
ति कथयंति॥ लाहहं कित्तिहं कारणेण जे सिवसंगु चयंति खीलालग्गि वि त्ते विसु णि देवउ
देउ डहंति॥ [illegible]॥ लाभकीर्त्तिकारणेन ये केचन सिवसंगं शिवशब्दवाच्यं निजपरमात्मध्यानं
त्यजंति ते मुनयस्तपोधनाः किं कुर्वंति लोहकीलकप्रायं निःसारेंद्रियसुखनिमित्तं देवशब्द
वाच्यं निजपरमात्मपदार्थं दहंति देवकुलशब्दवाच्यं दिव्यपरमौदारिकशरीरं च दहंतीति॥
कथमिति चेत्॥ ख्यातिपूजालाभार्थं शुद्धात्मभावनां त्यक्त्वा वर्त्तते तदा ज्ञानावरणादिकर्म
बंधो भवति तेन ज्ञानावरणकर्मणा केवलज्ञानं प्रच्छाद्यते प्रच्छाद्यते केवलदर्शनावरणेन के

वलदर्शनंप्रछाद्यते॥ वीर्यांतरायेणकेवलवीर्यंप्रछाद्यते॥ मोहोदयेनानंतसुखंचप्रछाद्यतइति
एवंविधानंतचतुष्टयस्यालाभेपरमौदारिकशरीरंचनलभ्यतइति॥ यदिपुनरेकमपिपरिग्रहंगृ
त्वाशुद्धात्मभावनांकरोति॥ तदासंसारस्थितिंछित्वाद्यकालेपिस्वर्गंगत्वागत्यशीघ्रंशाश्वतसुखंप्रा
प्नोतीतितात्पर्यं॥ तथाचोक्तं॥ सग्गोतवेणसव्वोवि पावएकिंतुझाणजोएण॥ जोपावइसोपव
ई परभवेसासयंसोक्खं॥२९॥ अथयोबाह्याभ्यंतरपरिग्रहेणात्मानंमहांतंमन्यतेसपरमार्थं
नजानातीतिदर्शयति॥ अप्पउमण्णइजोजिमुणि गरुयउगंथहितत्थु॥ सोपरमत्थेजिणुभणइ ११०
णविबुज्झइपरमत्थु॥ आत्मानंमन्यते॥ यएवमुनिःकथंभूतंमन्यतेगुरुकंमहांतंकेनग्रंथैर्बा

ह्याभ्यंतरपरिग्रहैस्तथ्यंसत्यंसपुरुषःपरमार्थेनवस्तुवृत्त्यानैवबुध्यते॥ परमार्थमितिजिनोवदं
ति॥ तथाहि॥ निर्दोषिपरमात्मविलक्षणैःश्वेतांकंसचित्ताचित्तमिश्रपरिग्रहैर्ग्रंथरचनारूपशा
स्त्रैर्वा आत्मानंमहांतंमन्यते॥ यःसपरमार्थशब्दवाच्यंवीतरागपरमानंदैकस्वभावंपरमात्मानंनजाना
तीतितात्पर्यं॥ २९॥ ग्रंथेनात्मानंमहांतंमन्यतेमन्यमानःसन्परमार्थंकस्मान्नजानातीतिचेत्॥ बुज्झं
तहंपरमत्थुजियगुरुलहुअत्थिणकोइ जीवासयलविबंभुपरुजेणवियाणइसोइ॥ ३०॥ बुध्यमानानांकं
परमार्थंहिजीवगुरुत्वंलघुत्वंवानास्तिकस्मान्नास्तिजीवाःसर्वेपिपरमब्रह्मस्वरूपाःतदपिकस्मात्येन
कारणेनब्रह्मशब्दवाच्योमुक्तात्माकेवलज्ञानेनसर्वंजानातियथातथानिश्चयेनसोप्येकोविवक्षितोजीवः॥
संसारीसर्वंजानातिइत्यभिप्रायः॥ ३०॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्येपरिग्रहपरित्याग॥

परमात्मः व्याख्यानमुख्यतया सूत्राष्टकेन तृतीयमंतरस्थलं समाप्तं ॥ अत ऊर्ध्वं त्रयोदशसूत्रपर्यंतं शुद्धनिश्चयेन सर्वे जी
१११ वाः केवलज्ञानादिगुणैः समानास्तेन कारणेन षोडशवर्णिकासुवर्णवद्भेदो नास्तीति प्रतिपादयति ॥ तद्यथा ॥ जो भ
त्तउ रयणत्तयहं तसु मुणि लक्खणु एउ ॥ अच्छउ कहिं मि कुडिल्लियइं सो तसु करइ ण भेउ ॥ जो इत्यादि ॥ पदखंडना
रूपेण व्याख्यानं क्रियते जो यः कर्ता भत्तउ भक्तः कस्य रयणत्तयहं रत्नत्रयस्य तसु तस्य पुरुषस्य मुणि मन्य
स्व जानीहि किं लक्खणु एउ लक्षणं इदं प्रत्यक्षीभूतं इदं किं अच्छउ कहिं मि कुडिल्लियइं तिष्ठतु कस्यापि
कुड्यां शरीरे सो तसु करइ ण भेउ स ज्ञानी तस्य जीवस्य देहभेदेन भेदं न करोतीति ॥ तथाहि ॥ यासौ वीतरागस्व
संवेदनज्ञानी निश्चयस्य निश्चयरत्नत्रयलक्षणपरमात्मनो वा भक्तः तस्येदं लक्षणं जानीहि हे प्रभाकर
भट्ट कापि देहे तिष्ठतु जीवस्तथापि शुद्धनिश्चयेन षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणैर्भेदं न करोतीति

D. BHAU DAJI MEMORIAL

अत्राह प्रभाकरभट्टः ॥ हे भगवन् जीवानां यदि देहभेदेन भेदो नास्ति तर्हि यथा केचन वदंत्येक एव जीवस्तन्मतमायातं ॥ भगवानाह ॥ शुद्धसंग्रहनयेन सेनावनादि
वज्जात्यपेक्षया भेदो नास्ति व्यवहारनयेन पुनर्व्यक्त्यपेक्षया वने तिन्तिणिलिंबकदंब सेनायां तिन्तिणि हस्त्यश्वादिवद्भेदोस्तीति भावार्थः ॥ २२२ ॥ अथ त्रिभुव
नस्थजीवानां मूढा भेदं कुर्वंति ज्ञानिनस्तु तिन्तिणिसुवर्णानां षोडशवर्णिकैकत्ववत्केवलज्ञानलक्षणेनैकत्वं जानंतीति दर्शयति जीवहं तिहुयणसंठियहं
मूढा भेउ करंति केवलणाणिं णाणि फुडु सयलु वि एक्कु मुणंति ॥ जीवहं इत्यादि ॥ जीवहं तिहुयणसंठियहं श्वेतकृष्णरक्तादि तिन्तिणि वर्णैः स्थितानां षोडशा
देन वर्णिकानां तिन्तिणि सुवर्णानां यथा व्यवहारेण तेषु वे ? न भेदः तथा त्रिभुवनसंस्थितानां जीवानां व्यवहारेण भेदं दृष्ट्वा निश्चयनयेनापि मूढा भेदं क
रंति मूढात्मानो भेदं कुर्वंति केवलणाणिं वीतरागसदानंदैकसुखाविनाभूतकेवलज्ञानेन णाणि वीतरागस्वसंवेदनज्ञानिनः फुडु स्फुटं निश्चितं सयलु वि
समस्तमपि जीवराशिं एक्कु मुणंति संग्रहनयेन समुदायं प्रत्येकं मन्यंत इति ॥ अभिप्रायः ॥ २२३ ॥ अथ केवलज्ञानादिलक्षणेन शुद्धसंग्रहनयेन सर्वे जीवाः स
मानाइति कथयति ॥ जीवा सयल वि णाणमय जम्मणमरणविमुक्क जीवपएसहिं सयल सम सयल वि सगुणहिं एक्कु ॥ जीवा इत्यादि ॥ जीवा सयल वि

ज्ञानमयाश्च व्यवहारेण लोकालोकप्रकाशकं निश्चयेन तदावरणाभावात् सर्वेषां लक्षणकेवलज्ञानेन निर्वृत्तत्वात् सर्वेपि जीवा ज्ञानमयाः जन्ममरणविमु
क्ता व्यवहारनयेन यद्यपि जन्ममरणसहितास्तथापि निश्चयेन वीतरागनिजानंदैकरूपसुखामृतमयत्वादनाद्यनिधनत्वाच्च शुद्धात्मस्वरूपादिलक्षणस्य ज
न्ममरणनिर्वर्त्तकस्य कर्मोदयस्याभावाज्जन्ममरणविमुक्ताः जीवप्रदेशैः सर्वे समाः यद्यपि संसारावस्थायां व्यवहारेण उपसंहारविस्तारयुक्तत्वाद्देहमात्रा
मुक्तावस्थायां तु किंचिदूनचरमशरीरप्रमाणास्तथापि निश्चयनयेन लोकाकाशप्रमितासंख्येयप्रदेशत्वहानिवृद्ध्यभावात् स्वकीयस्वकीयजीवप्रदेशैः
सर्वे समानाः सयलवि सगुणहिं एक यद्यपि व्यवहारेण अव्याबाधानंतसुखादिगुणाः संसारावस्थायां कर्मकंपिताः तिष्ठंति तथापि निश्चयेन कर्माभावात् अ
त्रैव स्वगुणैरेकप्रमाणा इति अत्र यदुक्तं शुद्धात्मनः स्वरूपं तदेवोपादेयमिति तात्पर्यं ॥२२४॥ अथ जीवानां ज्ञानदर्शनलक्षणं प्रतिपादयति ॥ जी
वहं लक्खणु जिणवरहिं भासिउ दंसण णाणु तेण ण किज्जइ भेउ तहं जइ मणि जाउ विहाणु ॥ जीवहं इत्यादि ॥ जीवहं लक्खणु जिणवरहिं भासिउ दं ११२
सणु णाणु यद्यपि व्यवहारेण संसारावस्थायां मत्यादिज्ञानं चक्षुरादिदर्शनं जीवानां लक्षणं भवति ॥ तथापि ॥ निश्चयनयेन केवलदर्शनं केवलज्ञा

।लक्षणं।

भाषितं कैः जिनवरैः तेण ण किज्जइ भेउ तहं तेन कारणेन व्यवहारेण देहस्तेपि केवलज्ञानदर्शनरूपनिश्चयलक्षणेन तेषां न क्रियते भेदः यदि किं ज
इ मणि जाउ विहाणु यदि चेन्मनसि वीतरागनिर्विकल्पस्वसंवेदनज्ञानादित्योदयो न जातः कोसौ प्रभातसमय इति अत्र यद्यपि षोडशवर्णिकासमाना
नां बहूनां सुवर्णानां मध्ये तथाप्येकस्मिन् सुवर्णे गृहीते शेषसुवर्णानि सहैव नायांति कस्मात् भिन्नभिन्नप्रदेशत्वात् तथापि केवलज्ञानदर्शनलक्षणं समानां
सर्वजीवानां तथाप्येकस्मिन् विवक्षितजीवे पृथक्कृते शेषजीवाः सहैव नायांति ॥ कस्मात् ॥ भिन्नभिन्नप्रदेशत्वात् तेन कारणेन ज्ञायते यद्यपि केवलज्ञा
नदर्शनलक्षणं समानं तथापि प्रदेशभेदोस्तीति तात्पर्यं ॥२२५॥ अथ शुद्धात्मानं ज्ञानी निजानुरूपेण लोकं दर्शयति ॥ बंभहं भुवणि वसंताहं जे णवि भेउ क
रंति ते परमप्पपयासयर जोइय विमलु मुणंति ॥ बंभहं इत्यादि बंभहं ब्रह्मणः शुद्धात्मनः किं कुर्वतः भुवणि वसंताहं भुवने त्रिभुवने वसतः तिष्ठतः जे ण
वि भेउ करंति ये नैव भेदं कुर्वंति केन शुद्धसंग्रहनयेन ते परमप्पपयासयरु ते ज्ञानिनः परमात्मस्वरूपस्य प्रकाशकाः संतः जोइय हे योगिन् अथवा
बहुवचनेन जोइय हे योगिनः किं कुर्वंति विमलु मुणंति विमलं रागादिरहितं शुद्धात्मस्वरूपं मन्यंते जानंतीति ॥ तद्यथा ॥ यद्यपि जीवराश्यपेक्षया

तेषामेकत्वं लभ्यते तथापि व्यवहारेणापृथक्प्रदेशभेदेन भिन्नत्वं न च सर्वथा रहादिभट्टचार्वादिभेदवत् कश्चिदाह । यथैकोपि चंद्रमा बहुजलघटेषु भिन्नभिन्नरूपेण दृश्यते तथैकोपि जीवो बहुशरीरेषु भिन्नभिन्नरूपेण दृश्यत इति ॥ परिहारमाह ॥ बहुषु जलघटेषु चंद्रकिरणोपाधिवशेन जलपुद्गला एव चंद्राकारेण परिणतास्तत्राकाशस्थचंद्रमाः ॥ अत्र दृष्टांतमाह ॥ यथा देवदत्तमुखोपाधिवशेन नानादर्पणानां पुद्गला एव नानामुखाकारेण परिणमंति न च देवदत्तमुखं नानारूपेण परिणमति यदि परिणमति तदा दर्पणस्थमुखप्रतिबिंबं चेतनत्वं प्राप्नोति न च तथा तथैकं चंद्रमा अपि नानारूपेण न परिणमतीति किंच न चैकः ब्रह्म नामा कोपि दृश्यते प्रत्यक्षेण यः पृथग्व्यवस्थितनानारूपेण भविष्यतीत्यभिप्रायः ॥ १२६ ॥ अथ सर्वजीवविषये समदर्शित्वं मुक्तिकारणमिति प्रकटयति ॥ रायदोसवे परिहरिवि जे सम जीव णियंति तेसमभावि परिट्ठिया लहु णिव्वाणु लहंति ॥ रागद्वेषा दि ॥ पदखंडनारूपेण व्याख्यानं क्रियते रायदोसवे परिहरिवि वीतरागनिजानंदैकस्वरूपस्वशुद्धात्मद्रव्यभावनाविलक्षणौ रागद्वेषौ परिहृत्य जे केचन सम जीव णियंति सर्वसाधारणकेवलज्ञानदर्शनलक्षणेन समानान् सदृशान् जीवान् निश्चिन्वंति जानंति ते पुरुषाः ॥ कथंभूता ॥ समभावि

परिट्ठिया जीवितमरणलाभालाभसुखदुःखादिसमतालक्षणरूपे समभावे प्रतिष्ठिताः संतः लहु णिव्वाणु लहंति लघु शीघ्रं प्राप्नुवंति किं लभंते केवलज्ञानादिगुणास्पदं निर्वाणं लभंत इति अत्रेदं व्याख्यानं ज्ञात्वा रागद्वेषौ त्यक्त्वा च शुद्धात्मानुभूतिलक्षणसमताभावना कर्तव्येत्यभिप्रायः ॥ १२७ ॥ अथ सर्वजीवसाधारणं केवलज्ञानदर्शनलक्षणं प्रकाशयति ॥ जीवहं दंसणु णाणु जिय लक्खणु जाणइ जो जि देहविभेएं भेउ तहं णाणि किं मण्णइ सो जि ॥ जीवहं इत्यादि ॥ जीवहं जीवानां दंसणु णाणु जगत्त्रयकालत्रयवर्तिसमस्तद्रव्यगुणपर्यायाणां क्रमकरणव्यवधानरहितत्वेन परिच्छित्तिसमर्थं विशुद्धदर्शनं ज्ञानं च जिय हे जीव लक्खणु जाणइ जो जि लक्षणं जानाति यः एव देहविभेएं भेउ तहं देहविभेदेन भेदं तेषां जीवानां देवोऽहं पिप्पलस्वरूप स्वात्मादिलक्षणशुद्धात्मभावनारहितेन जीवेन यान्युपार्जितानि कर्माणि तदुदयसमुत्पन्नेन देहभेदेन जीवानां भेदं णाणि किं मण्णइ वीतरागस्वसंवेदनज्ञानी किं मन्यते नैव कस्मात् सो जि तमेव पूर्वोक्तं देहभेदेन भेदमिति अत्र ये केचन ब्रह्माद्वैतवादिनो नानाजीवान्न मन्यंते तन्मतेन विवक्षितैकजीवस्य जीवितमरणसुखदुःखादिके जाते सर्वजीवानां तस्मिन्नेव क्षणे जीवितमरणसुखदुःखादिकं प्रा

णोति ॥ कस्मादिति चेत् एकजीवत्वादिति भावार्थः ॥ २२८ ॥ अथ जीवानां निश्चयेन यो ऽसौ देहभेदेन भेदं करोति स जीवानां दर्शन
ज्ञानचारित्रलक्षणं न जानातीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति ॥ देहविभेयइँ जो कुणइ जीवहँ भेउ विचित्तु सो णवि लक्खणु मुणइ तहँ दंसणु णाणु
चरित्तु ॥ देहइत्यादि ॥ देहविभेयइं देहममत्वमूलत्वानां ख्यातिपूजालाभस्वरूपादीनां अपध्यानानां विपरीतस्य स्वशुद्धात्मध्यानस्याभावेनोपा
र्जितानि कर्माणि तदुदयजनितेन देहभेदेन जो कुणइ यः करोति किं जीवहं भेउ विचित्तु जीवानां भेदं विचित्रं नरनारकादिदेहरूपं सो णवि ॥
लक्खणु मुणइ तहं स नैव लक्षणं मनुते तेषां जीवानां किं लक्षणं दंसणु णाणु चरित्तु सम्यग्दर्शनज्ञानचारित्रमिति अत्र निश्चयेन सम्यग्दर्शन
ज्ञानचारित्रलक्षणानां जीवानां ब्राह्मणक्षत्रियवैश्यचंडालादिदेहभेदं दृष्ट्वा रागद्वेषौ न कर्त्तव्याविति तात्पर्यं ॥ २२९ ॥ अथ शरीराणि बादर
सूक्ष्माणि विविधवर्णानि भवंति ॥ न च जीवा इति दर्शयति ॥ अंगइं सुहुमइं बादरइं विहिवसि होंति जि बाल जिय पुणु सयल वि तित्तडा सव्वत्थ ११४
वि सयकाल ॥ अंगइं इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते अंगइं सुहुमइं बादरइं अंगानि सूक्ष्मबादराणि जीवानां विहिवसि होंति विधे

वशाद्भवंति अंगो ऽपि पंचेंद्रियविषयकांक्षाप्रवृत्तत्ताभिदृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादीनि यान्यपध्यानानि तद्विलक्षणया सौ स्वशुद्धा
त्मभावनारहितेन जीवेन यदुपार्जितं विधिसंज्ञं कर्म तद्वशेन सर्वे स्वभावेन केवलं अंगानि भवंति जे बाल ये बालवृद्धादिपर्यायास्ते विविधवर्णे
व अथवा संबोधनं हे बाल हे अज्ञ जिय पुणु सयल वि तित्तडा जीवाः पुनः सर्वे ऽपि तत्प्रमाणा द्रव्यप्रमाणं अनंतानंताः क्षेत्रापेक्षया पुनरेकैको
ऽपि जीवो यद्यपि व्यवहारेण स्वदेहमात्रस्तथापि निश्चयेन लोकाकाशप्रमितासंख्येयप्रदेशप्रमाणः कस्मिन् सव्वत्थ वि सर्वत्र लोके तत्केवललोके सयकाल सर्व
त्रकालत्रये ऽपि अत्र जीवानां बादरसूक्ष्मादिकं व्यवहारेण कर्मकृतभेदं दृष्ट्वा विशुद्धज्ञानदर्शनलक्षणापेक्षया निश्चयेन भेदो न कर्त्तव्य इत्यभिप्रायः ॥
२३० ॥ अथ जीवानां शत्रुमित्रादिभेदं यो न करोति स निश्चयनयेन जीवलक्षणं जानातीति प्रतिपादयति ॥ सत्तु वि मित्तु वि अप्पु परु जीव असेस
वि एइ एक्कु करेविणु जो मुणइ सो अप्पा जाणेइ ॥ सत्तु वि इत्यादि ॥ सत्तु वि मित्तु वि शत्रुमपि मित्रमपि अप्पु परु आत्मा परो जीव असेस वि जीवा अशेषा
अपि एइ एते समस्ता जीवाः एक्कु करेविणु जो मुणइ एकत्वं कृत्वा यो मनुते शत्रुमित्रजीवितमरणलाभालाभादिसमता तावत्तारूपवीतरागपरमसामायिकं कृ

परमात्म: ११६

त्वायोसौजीवानांशुद्धसंग्रहनयेनैकत्वंमन्यतेसोअप्पाजाणेइ सवीतरागसहजानंदैकस्वभावंशत्रुमित्रादिविकल्पकल्लोलमालारहितमात्मानंजाना
तीतिभावार्थः॥९३॥ अथयोसौसर्वजीवान्समानान्मन्यतेतस्यसमभावोनास्तीत्यावेदयति॥ जोणविमण्णइजीवजियसयलविदव्वसहाव ताससु
थक्कइभावसमुभावसायरिजोणाव॥ जोणविइत्यादि॥ जोणविमण्णइयोनैवमन्यतेकान्जीवजीवान्जियहेजीवकतिसंख्योपेतान्सयलविसमस्ता
नपिकथंभूतान्नमन्यते एक्कसहावंवीतरागनिर्विकल्पसमाधौस्थित्वासकलविमलकेवलज्ञानादिगुणैर्निश्चयनयेनैकस्वभावान् तासुनथक्क
इभाउसुमु तस्यनतिष्ठतिसमभावः कथंभूतः भवसायरिजोणाव। संसारसमुद्रेयोनावस्तरणोपायस्तत्तान्नौरिति अत्रेदंव्याख्यानंज्ञात्वारागद्वेष
मोहान्मुक्त्वाचपरमोपशमभावरूपेशुद्धात्मनिस्थातव्यमित्यभिप्रायः॥ ९४॥ अथजीवानांयोसौभेदःसकर्मकृतइतिप्रकाशयति॥ जीवहं॥
लेयणुकम्मकिउँकंमुविजीउणहोइ जेणविभिण्णउहोइतहंकालुलहेविणुकोइ॥ जीवहंइत्यादि॥ जीवहंजीवानांलेयणुभेदःएककम्मकिउ ११६
निर्भेदशुद्धात्मविलक्षणेनकर्मणाकृतः कंमुविजीउणहोइ ज्ञानावरणादिकर्मैवविशुद्धज्ञानदर्शनस्वभावजीवस्वरूपंनभवति॥ कस्मान्न

भवतीतिचेत्॥ जेणविभिण्णउहोइतहं येनकारणेनविभिन्नोभवतितेभ्यःकर्मभ्यः किंकृत्वाकालुलहेविणुकोइ वीतरागपरमात्मानुभूतिग्राह
कारिकारणभूतंकमपिकालंलब्ध्वेति अयमत्रभावार्थः टंकोत्कीर्णज्ञायकैकशुद्धजीवस्वभावाद्भिन्नरूपंमनोज्ञामनोज्ञस्त्रीपुरुषादिजीवभेदं
दृष्ट्वारागाद्यपध्यानंनकर्त्तव्यमिति॥ ९५॥ अतःकारणात्शुद्धसंग्रहेणभेदंमाकार्षीरितिनिरूपयति॥ एक्कुकरिमणबिष्णिकरिमंकरिवण्णवि
सेसु इक्कइंदेवइंजिंवसइतिहुवणुएहुअसेसु॥ एक्कुकरिइत्यादि॥ पदखंडनारूपेणव्याख्यानंक्रियते एक्कुकरिसेनावनादिवज्जीवजात्यपेक्षयास
र्वनिककुरुमणबिष्णिकरिमाद्वैकार्षीःमंकरिवण्णविसेसु मनुष्यजात्यपेक्षयाब्राह्मणक्षत्रियवैश्यशूद्रादिवर्णभेदंमाकार्षीः यतःकारणात् इक्कइं
देवइं एकेनदेवेनअभेदनयापेक्षयाशुद्धैकजीवद्रव्येनजेंयेनकारणेनवसइवसतिकिंकर्त्तृतिहुवणुत्रिभुवनंइदंप्रत्यक्षीभूतंकतिसंख्योपेतंअ
सेसुअसेषंसमस्तमितितिहुवनएहएनत्रिभुवनस्थोजीवराशिर्गृहीतइति॥ तथाहि॥ लोकस्तावदयंस्वस्वभावेनजीवैर्निरंतरंभृतस्तिष्ठतिबादरैःसूक्ष्मैश्चाधारव
शेनक्वचित्क्वचिद्देवस्थैः क्वचिदपितथापितेचजीवाः शुद्धपारिणामिकपरमभावग्राहकेनशुद्धद्रव्यार्थिकनयेनशक्त्यपेक्षयाकेवलज्ञानादिगुण

परमात्म: ॥
११६

रूपास्तेन कारणेन सर्वजीवराशिर्यद्यपि व्यवहारेण कर्मरूपस्तिष्ठति ॥ तथापि निश्चयनयेन शक्तिरूपेण परमब्रह्मस्वरूपमिति तत्परं
परमविष्णुरिति तत्परं परमशिव इति च तेनैव कारणेन सर्वजीवराशिः केचन परमब्रह्ममयं जगद्वदंति केचन परमविष्णुमयं वदंति केचन पुनः प ×६×
रमशिवमयमिति च ॥ अत्राह शिष्यः ॥ यद्येवं तत्तं जगन्मतं तत्त्वता तर्हि विशेषं किमिति दूषणं दीयते तत्र वह्निः परिहारमाह यदि शुद्धनिश्चयनयेनाग
न केवलज्ञानादिगुणापेक्षया वीतरागसर्वज्ञप्रणीतमार्गेण मन्यंते तदा तेषां दूषणं नास्ति यदि पुनरेकः शुद्धविशेषो व्यापी जगत्कर्ता ब्रह्मादिनामा
स्तीति मन्यंते तदा तेषां दूषणं कस्मात् दूषणमिति चेत् प्रत्यक्षादिप्रमाणबाधितत्वात् साधकप्रमाणप्रमेयचिंता तर्के विचारिता तिष्ठत्यत्र पुनर्नोच्यते अ
ध्यात्मशास्त्रत्वादित्यभिप्रायः ॥ २२५ ॥ इति षोडशवर्णिकासुवर्णदृष्टांतेन केवलज्ञानादिलक्षणेन सर्वे जीवाः समाना भवंतीति व्याख्यानमुख्यत्वे
न त्रयोदशसूत्रैरंतरस्थलं गतं एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये चतुर्दशांतरस्थलैः शुद्धोपयोगवीतरागस्वसं ११६
वेदनज्ञानपरिग्रहत्यागसर्वजीवसमानताप्रतिपादनमुख्यत्वेनैकचत्वारिंशत्सूत्रैर्महास्थलं समाप्तं ॥ अत ऊर्ध्वं परु जाणंतु वि इत्यादि सप्ताधिकारश्चा

तस्मात्पर्यंतं स्थलसंख्याबहिर्भूतं प्रक्षेपकान्विहाय स्त्रग्विणिकाव्याख्यानं करोतीति ॥ परु जाणंतु वि परममुणि परसंसग्गु चयंति परसंसग्गइं
परमपयहं लक्खहं जेण चलंति ॥ २२६ ॥ परु जाणंतु वि इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते परु जाणंतु वि परद्रव्यं जानंतोऽपि के ते परममुणि
वीतरागस्वसंवेदनज्ञानरताः परममुनयः किं कुर्वंति परसंसग्गु चयंति परसंसर्गं त्यजंति निश्चयेनाभ्यंतरे रागादिभावकर्मज्ञानावरणादिद्रव्य
कर्मशरीरादिनोकर्म च बहिर्विषये मिथ्यात्वरागादिपरिणतासंवृतजनोऽपि परद्रव्यं भण्यते तत्संसर्गं परिहरंति यतः कारणात् परसंसग्गइं भवंति
बाह्याभ्यंतरपरद्रव्यसंसर्गेण परमपयहं वीतरागनित्यानंदैकस्वभावपरमसमरसीभावपरिणतपरमात्मतत्त्वस्य कथंभूतस्य लक्खहं लक्ष्यस्य ध्येयस्य
तस्य धनुर्विद्याभ्यासप्रस्तावे लक्ष्यरूपस्येव जेण चलंति येन कारणेन चलंति त्रिगुप्तिसमाधेः ॥ सकाशान्च्युता भवंतीति ॥ अत्र परमध्यानविघातकत्वा
त् मिथ्यात्वरागादिपरिणामसत्परिणतपुरुषरूपो वा परसंसर्गः संत्यजनीय इति तात्पर्यं ॥ २२६ ॥ अथ तमेव परद्रव्यसंसर्गत्यागं कथ
यति ॥ जो समभावहं बाहिरउ तिं सहु मं करि संगु चिंतासायरि पडहि पर अण्णु वि डज्झइ अंगु ॥ जो इत्यादि ॥ जो यः कोऽपि समभावहं बाहिरउ जी

वितमरणलाभालाभादिसमभावनानुकूलविशुद्धज्ञानदर्शनस्वभावपरमात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठानरूपसमभावबाह्यः तिंसङ्गमं करि संगु ते
नसहसंसर्गं माकुरु हे आत्मन् यतः किं चिंतासायरि पडहि रागद्वेषादिकल्लोलरूपे चिंतासमुद्रे पतसि परं परं नियमेन अलुवि अन्यदपि दूषणं भव
ति किं दुःखं दह्यते आकुलं भवति किं दह्यते अंगु शरीरमिति ॥ अत्र भावार्थः ॥ वीतरागनिर्विकल्पसमाधिभावनाप्रतिपक्षभूतरागादिस्व
कीयपरिणाम एव निश्चयेन परइत्युच्यते व्यवहारेण तु मिथ्यात्वरागादिपरिणतः पुरुषः सोपि कथंचिन्नियमो नास्तीति ॥ १०९ ॥ अथ तमेवार्थं
मर्थं दृष्टांतेन समर्थयति ॥ भल्लाहं वि णासंति गुण जहं संसग्गु खलेहिं वइसाणरु लोहहं मिलिउ तें पिट्टियइ घणेहिं ॥ ११० ॥ भल्लाहं वि इत्यादि
भद्राणामपि वीतरागस्वभावसहितानामपि [illegible] णासंति गुण नश्यंति परमात्मोपलब्धिलक्षणगुणं केषां किं जहं संसग्गु येषां संसर्गः कैः
सह खलेहिं परमात्मपदार्थप्रतिपक्षभूतैर्निश्चयनयेन स्वकीयबुद्धिदोषरूपैः रागद्वेषादिपरिणामैः खलैर्दुष्टैः व्यवहारेण तु मिथ्यात्वरागादिपरि
णतपुरुषैः अस्मिन्नर्थे दृष्टांतमाह वइसाणरु लोहहं मिलिउ वैश्वानरो लोहसहितः तें तेन कारणेन पिट्टियइ घणेहिं पिट्टनक्रियां लभते कैर्घनै

Dr. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

रिति अत्र अनाकुलत्वसौख्यविघातको येन दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधाद्यपध्यानपरिणाम एव परसंसर्गस्त्याज्यः व्यवहारेण तु पर
परिणतपुरुषप्रभृति त्याज्यः ॥ अथ मोहपरित्यागं दर्शयति ॥ जोइय मोहु परिच्चयहि मोहु ण भल्लउ होइ मोहासत्तउ सयलु जगु दुक्खु सहंतउ जो
इ ॥ १११ ॥ जोइय मोहु परिच्चयहि हे योगिन् निश्चयेन निर्मोहपरमात्मस्वरूपभावनाप्रतिपक्षभूतं मोहं त्यज कस्मात् मोहु ण भल्लउ होइ मोहो भद्रः
समीचीनो न भवति तदपि कस्मात् मोहासत्तउ सयलु जगु निर्मोहशुद्धात्मभावनारहितं मोहासक्तं समस्तं जगत् दुक्खु सहंतउ जोइ अव्याकुल
त्वलक्षणपारमार्थिकसुखविलक्षणमाकुलत्वोत्पादकं दुःखं सहमानं पश्येति अत्रास्तां तावद्बहिरंगपुत्रकलत्रादौ सर्वपरित्यक्ते भुक्तपूर्वभावनावशेन
स्मरणरूपो मोहो न कर्तव्यः शुद्धात्मभावनास्वरूपं तपश्चरणं तत्साधकभूतशरीरस्थितिनिमित्तं अन्नपानादिकं यद्गृह्यमाणं तत्रापि मोहो न कर्तव्यः।
इति भावार्थः ॥ ११२ ॥ अथ अन्तःसंगस्य बहिर्व्यक्तिमाहारमोहविषय इनिराकरणसमर्थनार्थं प्रक्षेपकत्रयमाह ॥ तद्यथा ॥ काऊण णग्गरूवं
बीभच्छं दड्ढमडयसारिच्छं । अहिलससि किं ण लज्जसि भिक्खाए भोयणं मिट्ठं ॥ १ ॥ काऊण इत्यादि ॥ काऊण कृत्वा किं णग्गरूवं नग्नरूपं निर्ग्रं

वितमरणलाभालाभादिसमभावनानुकूलविशुद्धज्ञानदर्शनस्वभावपरमात्मद्रव्यसम्यक्श्रद्धानज्ञानानुष्ठानरूपसमभावबाह्यः तिंसकुमंकरिसंगुते
नसहसंसर्गमाकुरु हेआत्मन् यतः किंचिंतासायरिपडहिरागद्वेषादिकल्लोलरूपे चिंतासमुद्रे पतसि परपरंनियमेन अग्नुवि अन्यदपिहृपणंभव
ति किंडमइदह्यते व्याकुलंभवति किंदह्यते अंगुशरीरमिति॥ अत्रभावार्थः॥ वीतरागनिर्विकल्पसमाधिभावनाप्रतिपक्षभूतरागादिस्व
कीयपरिणाम एव निश्चयेन परद्रव्यमुच्यते व्यवहारेण तु मिथ्यात्वरागादिपरिणतः पुरुषः सोपि कथंचित्नियमो नास्तीति॥१२६॥ अथानंतरेव पूर्व
मर्थं दृष्टांतेन समर्थयति॥ सद्दाहंविणासंतिगुणजहसंसग्गुखलेहिं वइसाणरुलोहहिंमिलिउतिंपिट्टियइघणेहि॥ सद्दाहंविइत्यादि
सद्दाहंवित्तइ णाम आदि स्वभावसहितानामपि [illegible] णासंति गुणाइ नश्यंति परमात्मोपलब्धिलक्षणगुणं केषां किं जह संसग्गु येषां संसर्गः कैः
सह खलेहि परमात्मपदार्थप्रतिपक्षभूतैः निश्चयनयेन स्वकीयबुद्धिदोषरूपैः रागद्वेषादिपरिणामैः खलैर्दुष्टैः व्यवहारेण तु मिथ्यात्वरागादिपरिण
तपुरुषैः अस्मिन्नर्थे दृष्टांतमाह वइसाणरुलोहहंमिलिउ वैश्वानरो लोहसहितः तिं तेन कारणेन पिट्टियइ घणेहि पिट्टणक्रियां लभते कैः घनै

रिति अत्र अनाकुलत्वसौख्यविघातको येन दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधाद्यपध्यानपरिणाम एव परसंसर्गस्त्याज्यः व्यवहारेण तु पर
परिणतपुरुषः परित्याज्यः॥ अथ मोहपरित्यागं दर्शयति॥ जोइयमोहुपरिच्चयहि मोहुणभल्लउहोइ मोहासत्तउसयलुजगुदुक्खुसहंतउजो
इ॥ जोइयमोहुपरिच्चयहि हेयोगिन् निश्चयेन निर्मोहपरमात्मस्वरूपभावनाप्रतिपक्षभूतं मोहं त्यज कस्मात् मोहुणभल्लउहोइ मोहोसद्भः
समीचीनो न भवति तदपि कस्मात् मोहासत्तउसयलुजगुनिर्मोहशुद्धात्मभावनारहितं मोहासक्तं समस्तं जगत् दुक्खुसहंतउजोइ अव्याकुल
त्वलक्षणपरमार्थिकसुखविलक्षणमाकुलत्वोत्पादकं दुःखं सहमानं पश्येति अयमत्रभावार्थः तावत् बहिरंगपुत्रकलत्रादौ सर्वपरित्यक्ते अनवस्थितान्येन
स्मरणरूपो मोहो न कर्तव्यः शुद्धात्मभावनास्वरूपं तपश्चरणं तत्साधकं भूतशरीरस्यापि स्थित्यर्थमशनपानादिकं यद्गृह्यमाणं तत्रापि मोहो न कर्तव्य।
इतिभावार्थः॥१२७॥ अथान्तःकाले संन्यासं बहिर्गतिभावार्थमोहविषयनिराकरणसमर्थनार्थं प्रदीपक त्रयमाह॥ तद्यथा॥ काउणणगारूवं
बीसच्छंदहमडयसारिच्छं। अहिलससि किंण लज्ज भिरकाए तोयणंमिट्ठं॥ काऊणइत्यादि॥ काउ यत्कृत्वा किं णगारूवं नग्नरूपं निग्रं

यं जिनरूपं कथंभूतं तं वीतस्य ध्यानकं पुनरपि कथंभूतं तं देहमध्यसाक्षिं दग्धमृतकसदृशं एवंविधं रूपं दृष्ट्वा हे तपोधन अहिलससि अतिलाषं करो
विकिलणै लेसिलड्डा किं ल्लकरो विकिकु ब्रूलि: सव सिरका एतोयणंमिहं सिद्धायं तो जनंमिर मितिमत्यमानः सन्निति श्रावकेन तावदाहारा तय से
वज्यथा स्वदानं तात्पर्येन दातव्यं आहारदानं येन दत्तं तेन शुद्धात्मानुभूतिसाधकं बाह्याभ्यंतरभेदभिन्नं द्वादशविधं तपश्चरणं दत्तं भवति शुद्धात्मभा
वनालक्षणसंयमसाधकस्य देहस्य स्थितिकृता भवति शुद्धात्मोपलंभप्राप्तिरूपा भवांतरगतिः प्रदत्ता भवति यद्यप्येवमादिगुणविशिष्टं च
तुर्विधदानं श्रावकाः प्रयच्छंति ॥ तथापि ॥ निश्चयव्यवहाररत्नत्रयाराधकतपोधनेन बहिरंगसाधनीभूतमाहारादिकं किमपि गृह्णतापि स्वस्वभावप्र
तिपक्षभूतो मोहो न कर्तव्य इति तात्पर्यं ॥ एवं सूत्र ॥ जइ इच्छसि तो साहू बारहविहतवहलं महाविउलं तो मणवयणे काए तोयणगिद्धी विवज्जेसु
॥ सू ॥ यदीच्छसि तो साधो द्वादशविधितपसः फलं कथंभूतं महद्विपुलं स्वर्गापवर्गरूपं ततः कारणात् वीतरागनिजानंदैकसुखरसास्वादानुभवेन ११५
तृप्तो भूत्वा मनोवचनकायेषु भोजनगृद्धिं वर्जय इति तात्पर्यं ॥ अथ गाथा ॥ जे सरसिं संतुट्ठमण विरसि कसाउ वहंति ते मुणि भोयणधारगणि णवि प

रमत्थु मणंति ॥ सू ॥ जे इत्यादि ॥ जे सरसिं संतुट्ठमण ये केचन सरसेन सरस्या ॥ ॥ हारेण संतुष्टमनस्काः विरसि कसाउ वहंति विरसे वि
रसाहारे सति कषायं वहंति कुर्वंति ते पूर्वोक्ताः मुणि मुनयः तपोधनाः भोयणधारगणि तो ज्ञातव्याः विषये गृद्धशाहस्वात् गणय मत्यस्व जानीहि इत्यर्थः
संतः णवि परमत्थु मणंति नैव परमार्थं मन्यंते जानंतीति ॥ अयमत्रभावार्थः ॥ गृहस्थानामाहारदानादिकमेव परमो धर्मस्तेनैव सम्यक्त्वपूर्वेण परंपरया
मोक्षं लभते कस्मात्स एव परमो धर्म इति चेत् निरंतरविषयकषायाधीनतया आर्तरौद्रध्यानरतानां निश्चयरत्नत्रयलक्षणस्य शुद्धोपयोगपरमध
र्मस्यावकाशो नास्तीति शुद्धोपयोगपरमधर्मरतैस्तपोधनैस्त्वन्नपानादिविषये मानापमानसमतां कृत्वा यथालाभेन संतोषः कर्तव्य इति
॥ २ ॥ अथ शुद्धात्मोपलंभाभावे सति पंचेंद्रियविषयासक्तजीवानां विनाशं दर्शयति ॥ रूवि पयंग सद्दि मय गय फासहि णासंति अलिउ
लगंधइ मच्छ रसि किम अणुराउ करंति ॥ सू ॥ रूपे समासक्ताः पतंगाः शब्दे मृगाः गजाः स्पर्शे गंधेनालिकुलानि मत्स्या रसासक्ता नश्यंति ॥ यतः कार
णात् ॥ कारणात् कथं तेषु विषयेष्वनुरागं कुर्वंतीति ॥ तथाहि ॥ पंचेंद्रियविषयाकांक्षाप्रभृतिसमस्तापध्यानविकल्पैररहितः ख्यातीस्पर्शनादींद्रिय

परमात्म: ११९

कषायातीतनिर्दोषिपरमात्मसम्यक्श्रद्धानज्ञानानुचरणरूपनिर्विकल्पसमाधिसंजातवीतरागपरमाह्लादैकलक्षणसुखामृतरसास्वादेनपूर्ण
कलशावद्भरितावस्थः केवलज्ञानादिव्यक्तिरूपस्य कार्यसमयसारस्योत्पादकः शुद्धोपयोगस्वभावो योसावेवंभूतः कारणसमयसारस्तद्भाव
नारहिताजीवाः पंचेंद्रियविषयाभिलाषवशीकृताः नश्यंतीतिज्ञात्वाकथंतत्राशक्तिंगच्छंतितेविवेकिनइति अत्रपतंगादयएकैकविषयाश
क्तानश्यंतियेतुपंचेंद्रियविषयमोहितास्तेविशेषेणनश्यंतीतिभावार्थः ॥२४१॥ अथलोभकषायदोषंप्रतिपादयति ॥ जोइयलोहुपरिच्चयहिलोहु
णभल्लउहोइ लोहासत्तउसयलुजगुदुक्खुसहंतउजोइ ॥१॥ हेयोगिन्लोभंपरित्यजकस्मात् लोभोलोभकोसमीचीनोनभवति लोभाशक्तंसम
स्तंजगत्दुःखंसहमानंपश्येति ॥तथाहि॥ लोभकषायविपरीतात्परमात्मस्वभावाद्विपरीतंलोभंत्यजहेप्रभाकरभट्टयतःकारणात्निर्लोभपर
मात्मभावनारहिताजीवाः दुःखमुपलभंतेजानानास्तिष्ठंतीतितात्पर्यार्थं ॥२४२॥ अथलोभकषायदोषंदृष्टांतेनसमर्थयति ॥ तलिअहिरणिव ११९
रिघणवडणुसंडस्सयलुंचोडु लोहहंलग्गिविहुयवहहंपिक्खुपडंततोडु ॥३॥ तलिअधस्तनभागेअधिकरणसंज्ञोपकरणंउपरितनभागे

घातपतनंतथैवसंडसकसंज्ञेनोपकरणेनलुंचनमाकर्षणंकेनलोहपिंडनिमित्तेनकस्यकर्तृभूतस्याग्नेः त्रोटनंखंडनंपतंतंपश्येति ॥अत्रभाव
ार्थः॥ यथालोहपिंडसंसर्गादग्निरज्ञानिलोकप्रसिद्धोदेवताविहितक्रियांलभतेतथालोभादिकषायपरिणतिकारणभूतेनपंचेंद्रिय
शरीरसंबंधेननिर्लोभिपरमात्मतत्वभावनारहितोजीवोघनघातस्थानीयानिनारकादिदुःखानिबहुकालंसहतइति ॥२४४॥ अथस्नेहंपरित्या
गंकथयति ॥ जोइयणेहुपरिच्चयहिणेहुणभल्लउहोइ णेहासत्तउसयलुजगुदुक्खुसहंतउजोइ ॥४॥ रागादिस्नेहप्रतिपक्षभूतेवीतरागपर
मात्मपदार्थध्यानेस्थित्वाशुद्धात्मतत्वाद्विपरीतं हेयोगिन्स्नेहंपरित्यजकस्मात्स्नेहोभद्रसमीचीनोनभवति तेनस्नेहेनाशक्तंसकलंजगन्नि
स्नेहशुद्धात्मतत्वभावनारहितंविविधशारीरमानसरूपंबहुदुःखंसहमानंपश्येति अत्रभेदाभेदरत्नत्रयात्मकंमोक्षमार्गंमुक्त्वाप्रतिपक्षभू
तेमिथ्यात्वरागादौस्नेहोनकर्त्तव्यइतितात्पर्यं ॥तथाचोक्तं॥ तावदेवसुखीजीवोयावन्नस्निह्यतेक्वचित् स्नेहानुविद्धहृदयःदुःखमेवपदेपदे ॥२४५॥
॥अथस्नेहदोषंदृष्टांतेनदृढयति॥ जलसिंचणुपयणिद्दलणुपुणुपुणुपीलणदुक्खु णेहहंलग्गिवितिलणियरजंतिसहंतउपिक्खु ॥५॥ जला

परमात्म: १२०

सिंचनं पादनिर्दलनं ततः पुनः पीडनदुःखं स्नेहनिमित्तं तिलनिकरं यंत्रेण सह समाप्तं पश्येति अत्र वीतरागचिदानंदैकस्वभावं परमात्मतत्त्वमसेवमाना
अजानंतो वीतरागनिर्विकल्पसमाधिबलेन निश्चलचित्तेनाभावयंतश्च जीवा मिथ्यामार्गं रोचमानाः पंचेंद्रियविषयासक्ताः संतो नारकादिगति
षु यंत्रपीडनक्रकचविदारणशूलारोहणादिनानादुःखं सहंत इति तात्पर्यार्थः ॥२४८॥ नूनं च॥ ते च्चिय धण्णा ते च्चिय सप्पुरिसा ते जियंतु जियलोए वो
दहदहम्मि पडियातरंति जे चेव लीलाए॥ ३॥ ते चैव धन्यास्ते चैव सत्पुरुषास्ते जीवंतु जीवलोके से केवो दहद्राहेन यौवनं स एव द्रहो महाद्रहस्त
त्र पतिताः संतस्तरंति ये चैव कया लीलयेति अत्र विषयकांक्षारूपस्नेहजलप्रवेशरहितेन सम्यग्दर्शनज्ञानचारित्रात्मकरत्नत्रयांडतरणेन निजशु
द्धात्मभावनापोतेन यौवनमहाद्रहं ये तरंति त एव धन्यास्त एव सत्पुरुषा इति तात्पर्यं ॥ किं २४९ किंबहुना विस्तरेण॥ मोक्खु जि साहिउ जि
णवरहिं छंडिवि बहुविह रज्जु सिरकत्तरी डाजीव तुहुं करहि ण अप्पणकज्जु ॥ मोक्खु हि डि इत्यादि॥ पदखंडनारूपेण व्याख्यानं क्रियते मोक्खु ३२०
जि साहिउ मोक्ष एव साधितः निरवशेषनिराकृतकर्ममलकलंकस्यात्मन आत्यंतिकस्वाभाविकज्ञानादिगुणास्पदमवस्थांतरं मोक्षः साधितः

कैः जिणवरहिं जिनवरैः किं कृत्वा छंडिवि त्यक्त्वा किं बहुविह रज्जु सप्तांगराज्यं केन ते दोसे दरत्नत्रयभावनाबलेन एवं ज्ञात्वा सिरकत्तरी डा तिष्ठानो
जानन् हे जीव तु कृत्वं करहि न अप्पणकज्जु किं तो करोष्यात्मीयकार्यमिति अत्रेदं व्याख्यानं ज्ञात्वा बाह्याभ्यंतरपरिग्रहं त्यक्त्वा वीतरागनिर्विक
ल्पसमाधौ स्थित्वा च विशेषतपश्चरणं कर्तव्यमित्यभिप्रायः ॥२४८॥ अथ हे जीव त्वमपि जिनभट्टारकवदष्टकर्मनिर्मूलनं कृत्वा मो
क्षं गच्छेति संबोधयति॥ पावहि दुरकु महंतु तुहुं जिय संसारि भमंतु अठ वि कम्मइं तिद्दलिवि वच्चहि मुक्खु महंतु ॥ पावहि इत्यादि॥ पा
वहि दुरकु महंतु प्राप्नोषि दुःखं महत् कं तु कर्तृ त्वं जिय हे जीव किं कुर्वन् संसारि भमंतु निश्चयेन संसारविवर्जितशुद्धात्मविलक्षणं द्रव्यक्षे
त्रकालभवभावपंचप्रकारभिन्नं संसारं भ्रमन् तस्मात् कुरु अठ वि कम्मइं णिद्दलिवि शुद्धात्मोपलंभबलेनाष्टापि कर्माणि निर्मूल्य वच्च
हि व्रज कं मुक्खु स्वात्मोपलब्धिलक्षणं मोक्षं ॥ तथा चोक्तं ॥ सिद्धिः स्वात्मोपलब्धिः कथंभूतं मोक्षं महंतु केवलज्ञानादिमहागुणयुक्तत्वा
न्महांतमित्यभिप्रायः ॥२४९॥ अथ यद्यप्यल्पमपि दुःखं सोढुमसमर्थस्तथापि कर्माणि किमिति करोषीति शिक्षां प्रयच्छति ॥ ३॥ जिय अ

णु मित्तु वि दुक्खडा सहण ण सक्कहि जोइ चउगइदुक्खहं कारणइं कम्मइं कुणहि किं तोइ ॥७४॥ जिय हे मूढजीव अणुमित्तु वि अणुमात्राण्यपि का
नि दुक्खडा दुःखानि सहण ण सक्कहि सोढुं न शक्नोषि जोइ पश्य यद्यपि चउगइदुक्खहं कारणइं परमात्मभावनोत्पन्नतात्त्विकवीतरागनि
त्यानंदैकविलक्षणानां नारकादिदुःखानां कारणभूतानि कम्मइं कुणहिं किं कर्माणि करोषि किमर्थं तोइ यद्यपि दुःखानीष्टानि न स्तवं
ति तथापीति अत्रेदं व्याख्यानं ज्ञात्वा कर्माश्रवप्रतिपक्षभूते रागादिविकल्परहिते निजशुद्धात्मभावना कर्त्तव्येति तात्पर्यं ॥७४॥ अथ
बहिर्मिथ्यासंगासक्तं जगदज्ञानमयात्मानं न चिंतयतीति प्रतिपादयति ॥ धंधइं पडियउ सयलु जगु कम्मइं करइ अयाणु मोक्खहं कार
णु एक्कु खणु ण वि चिंतइ अप्पाणु ॥ धंधइं इत्यादि ॥ धंधइं धंधे मिथ्यात्वविषयकषायनिमित्तोत्पन्ने दुर्ध्यानार्त्तरौद्रव्यासंगे पडियउ पतितं व्या
सक्तं किं सयलु जगु समस्तं जगत् शुद्धात्मभावनापराङ्मुखो मूढप्राणिगणः कम्मइं करइ कर्माणि करोति कथंभूतं जगत् अयाणु विशि
ष्टभेदज्ञानरहितं मोक्खहं कारणु अनंतज्ञानादिस्वरूपमोक्षकारणं एक्कु खणु एकक्षणमपि ण वि चिंतइ नैव ध्यायति कं अप्पाणु वीतराग १२१

परमाह्लादरसास्वादपरिणतं स्वशुद्धात्मानमिति तात्पर्यं ॥७५॥ अथ तमेवार्थं दृढयति ॥ जोणिहिं लक्खइं परिभमइ अप्पा दुक्खु सहंतु पुत्तकलत्तहं
मोहियउ जाम ण णाणु महंतु ॥ जोणिहिं लक्खइं इत्यादि ॥ जोणिहिं लक्खइं परिभमइ चतुरशीतियोनिलक्षाणि परिभ्रमति कोसौ अप्पा बहिरात्मा किं कु
र्वन् दुक्खु सहंतु निजपरमात्मतत्त्वध्यानोत्पन्नवीतरागसदानंदैकरूपाव्याकुलत्वलक्षणपारमार्थिकसुखाद्विलक्षणं शारीरमानसदुःखं सहमानः क
थंभूतः सन् पुत्तकलत्तहं मोहियउ निजपरमात्मभावनाप्रतिपक्षभूतैः पुत्रकलत्रैर्मोहितः कियत्पर्यंतं जाव ण यावत्कालं न किं णाणु ज्ञानं किंविशिष्टं महंतु
महतो मोक्षलक्षणस्यार्थस्य साधकत्वाद्वीतरागनिर्विकल्पस्वसंवेदनज्ञानं महदित्युच्यते तेन कारणेन तदेव निरंतरं भावनीयमित्यभिप्रायः ॥७६॥ अथ हे
जीव परस्वपरिजनशरीरादिकमात्मीयं मा कार्षीरिति संबोधयति ॥ जीव म जाणहि अप्पणउ घरु परियणु तणु इट्ठु कम्मायत्तउ कारिमउं आगमि जोइहिं दिट्ठु ॥ जीव
इत्यादि ॥ जीव म जाणहि हे जीव मा जानीहि अप्पणउं आत्मीयं किं घरु परियणु तणु इट्ठु गृहं परिजनं शरीरं इष्टमित्रादिकं कथंभूतमेतत् कस्मायत्तं शु
द्धचेतनास्वभावात्तत्त्वात्परमात्मनः सकाशाद्विलक्षणं यत्कर्म तदुदयेन निर्मितत्वात् कम्मायत्तं पुनरपि कथंभूतं कारिमउं अकृत्रिमात् टंकोत्कीर्णज्ञा

यच्चैकस्वभावात् शुद्धात्मद्रव्याद्विपरीतत्वात् कृतिमं विनश्वरं इदं वस्तु तदित्थं दृष्टं कैः ज्ञानिभिः परमज्ञानसंपन्नदिव्ययोगिभिर्गणिभिः कर्तृदृष्टं आगमे। वीतरागस
र्वज्ञप्रणीतपरमागमे इति। अत्रेदमध्रुवं व्याख्यानं ज्ञात्वा ध्रुवस्वशुद्धात्मस्वभावे स्थित्वा गृहादिपरद्रव्ये ममत्वं न कर्तव्यमिति तात्पर्यार्थः॥१२४॥ अथ गृहपरिवा
रादिचिंतया मोक्षो न लभ्यत इति निश्चिनोति। मुक्खु ण पावहि जीव तुहुं घरु परियणु चिंतंतु तो वरि चिंतहि तउ जि तउ पावहि मोक्खु महंतु॥ मुक्खु इत्यादि
॥मोक्खु कर्ममलकलंकरहितं केवलज्ञानाद्यनंतगुणसहितं मोक्षं न पावहि न प्राप्नोषि न केवलं मोक्षं निश्चयव्यवहाररत्नत्रयात्मकं मोक्षमार्गं च हे जीव।
हे मूढजीव तुहुं त्वं किं कुर्वन्सन् घरु परियणु चिंतंतु गृहपरिवारादिकं परद्रव्यं चिंतयन् तो ततः कारणात् वरि वरं किंतु चिंतहिं चिंतय ध्याय किं तउ
जि तउ तपस्तप एव चिंतयनात्मत् तपश्चरणचिंतनात् किं फलं भवति पावहि प्राप्नोषि किं मोक्खु पूर्वोक्तलक्षणं मोक्षं कथंभूतं महंतु महत् तीर्थकरपर
मदेवादिमहापुरुषैराश्रितत्वात् महांतमिति अत्र बहिर्द्रव्येच्छानिरोधेन वीतरागतात्त्विकानंदपरमात्मरूपे निर्विकल्पसमाधौ स्थित्वा गृहादिममत्वं १२२
सर्वतात्पर्येण त्यागसदा भावनाकर्तव्येति तात्पर्यं॥१२५॥ अथ जीववधहिंसादोषं दर्शयति॥ मारिवि जीवहं लक्खडा जं जिय पाउ करीसि पुत्तकलत्तहं कारणइं तं तुहुं

एक्कु सहीसि॥ मारिवि इत्यादि॥ मारिवि जीवहं लक्खडा रागादिविकल्परहितस्य स्वस्वभावनालक्षणस्य शुद्धचैतन्यप्राणस्य निश्चयेनाभ्यंतरे वधं कृत्वा बहि
र्विषये चानेकजीवलक्षाणि केनहिं मारयित्वा करणेन पुत्तकलत्तहं कारणइं पुत्रकलत्रममत्वनिमित्तेन तस्य दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधेन जं
जिय पाउ करीसि हे जीव यत्पापं करिष्यसि तं तुहुं एक्कु सहीसि तत्पापफलं त्वं कर्ता नारकादिगतिषु एकाकी सन् सहिष्यसे हि अत्र रागाद्युत्पत्तिर्वा निश्चयेन
हिंसा लक्ष्यते कस्मात् निश्चयशुद्धचैतन्यप्राणस्य हिंसाकारणत्वात् इति मत्वा रागादिपरिणामरूपा निश्चयहिंसा त्याज्येति तात्पर्यार्थः॥ तथा चोक्तं॥ निश्च
यहिंसालक्षणं॥ रागादीणमणुप्पा अहिंसगत्तेदि देसिदं समए तेसिं चे उप्पत्ती हिंसेति जिणेहिं णिद्दिट्ठं॥१२६॥ अथ तमेव हिंसादोषं दर्शयति॥ मारिवि चूरि
वि जीवडा जं तुहुं दुक्खु करीसि तं तहु पासि अणंतगुणु अवसइं जीव लहीसि॥ मारिवि इत्यादि॥ मारिवि बहिर्विषये अन्यजीवान् प्राणिप्राणवियोग
लक्षणेन मारयित्वा चूरिवि हस्तपादैकदेशच्छेदरूपेण चूरयित्वा कान् जीवडा जीवान् निश्चयेनाभ्यंतरे तु मिथ्यात्वरागादिरूपतीक्ष्णशस्त्रेण शुद्धात्मा
नुभूतिरूपनिश्चयप्राणांश्च जं तुहुं दुक्खु करीसि यदुःखं त्वं कर्ता करिष्यसि तेषु पूर्वोक्तेषु परजीवेषु तं तहु पासि अणंतगुणु अणंतगुणुं तद्दुःखं तद्दे

स्यात् अनंतगुणं अवसइ अवश्यमेव जीवहे तइ जीवलहीसि घाश्रोसीति अत्रायं जीवो मिथ्यात्वरागादिपरिणतः सन् स्वयमेव निजशुद्धात्म
प्राणं हिनस्ति बहिर्विषये अन्यजीवानां प्राणघातो भवतु मा भवतु नियमो नास्ति परघातार्थं तप्तायःपिंडग्रहणेन स्वहस्तदाहवदिति भावार्थः ॥ तथा
चोक्तं ॥ स्वयमेवात्मनात्मानं हिनस्त्यात्मा कषायवान् पूर्वं प्राण्यंतराणां तु पश्चात्स्याद्वा न वा वधः ॥१२५॥ अथ जीववधे नरकगतिरभयदाने स्वर्ग
भवतीति निरूपयति ॥ जीववहंतहं णरयगइ अभयपदाणें सग्गु बे पह जवला दरिसिया जहिं भावइ तहिं लग्गु ॥ जीववहंतहं इत्यादि ॥ जीववहंत
हं निश्चयेन मिथ्यात्वविषयकषायरूपं वधं स्वकीयजीवस्य व्यवहारेणेंद्रियबलायुःप्राणापानविनाशरूपमन्यजीवानां च वधं कुर्वतां नरयगइ
नरकगतिर्भवति अभयपदाणें निश्चयेन वीतरागनिर्विकल्पस्वसंवेदनपरिणामरूपमभयप्रदानं स्वकीयजीवस्य व्यवहारेण प्राणरक्षारूपमभय
प्रदानं परजीवानां च कुर्वतां सग्गु स्वर्गस्तथाभयप्रदानेन मोक्षो भवत्यन्यजीवानामभयप्रदानेन स्वर्गश्चेति बे पह जवला दरिसिया एवं द्वौ पथानौ समीपे द
र्शितौ जहिं भावइ तहिं लग्गु हे जीव यत्र रोचते तत्र लग्नो भव त्वमिति कश्चिदज्ञानी आह प्राणा जीवादभिन्ना भिन्ना वा यद्यभिन्ना तर्हि जीववत्प्राणा

नां विनाशो नास्ति अथ भिन्नास्तर्हि प्राणवधेपि जीवस्य वधो नास्त्यनेन प्रकारेण जीवहिंसैव नास्ति कथं जीववधे पापबंधो भविष्यतीति ॥ परि
हारमाह ॥ कथंचिद्भेदाभेदः ॥ तथाहि ॥ स्वकीयप्राणे हते सति दुःखोत्पत्तिदर्शनाद्व्यवहारेणाभेदः सैव दुःखोत्पत्तिस्तु हिंसा भण्यते ततश्च
पापबंधः यदि पुनरेकांतेन देहात्मनोर्भेद एव तर्हि यथा परकीयदेहघाते दुःखं न भवति तथा स्वदेहघातेपि दुःखं न स्यात् न च तथा निश्चयेन पुनर्जी
वे गतेपि देहो न गच्छतीति हेतोर्भेद एव न तु तथापि व्यवहारेण हिंसा जाता पापबंधोपि न निश्चयेनेति सत्यमुक्तं त्वया व्यवहारेण पापं तथैव नारका
दि दुःखमपि व्यवहारेणेति तदिष्टं भवतां चेत्तर्हि हिंसां कुरुत यूयमिति ॥१२६॥ अथ मोक्षमार्गे रतिं कुर्विति शिक्षां ददातीति ॥ मूढा सयलु वि का
रिमउ भुल्लउ म तुस कंडि सिवपहि णिम्मलि करहि रइ घरु परियणु लहु छंडि ॥ मूढा इत्यादि ॥ मूढा सयलु वि कारिमउ हे मूढ जीव शुद्धात्मानं वि
हाय अन्यत् पंचेंद्रियविषयरूपं समस्तमपि कृत्रिमं विनश्वरं भुल्लउ म तुस कंडि भ्रांतो भूत्वा तुषकंडनं मा कुरु एवं विनश्वरं ज्ञात्वा सिवपहि णिम्म
लि शिवशब्दवाच्यो विशुद्धज्ञानदर्शनस्वभावो मुक्तात्मा तस्य प्राप्त्युपायः पंथा निजशुद्धात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपः स च रागादि

परमात्म:
१२४

रहितत्वेननिर्म्मलः करहिरइइ स्वंत्तेमोक्षमोक्षमार्गेचरति दीर्तिंकरु घरुपरियणुलकुस्वंडि न्नवेक्तिमोक्षमार्गप्रतिपक्षान् स्त्रुतं परहंपरिजना
दिकंसीघ्रंत्यजेतितात्पर्यं॥२५८॥अथपुनरप्यध्रुवानुप्रेक्षांप्रतिपादयति॥ जोइयसयलुविकारिमउणिक्कारिमउणकोइ जीवेजंतिंकुडिलग
यइकुपरिखिंदाकोइ॥जोइयइत्यादि॥ जोइयहेयोगिन्सयलुविकारिमउदंकोत्कीर्णंज्ञायकैकस्वभावादकृत्रिमाद्वीतरागनित्यानंदैकस्व
रूपात्परमात्मनः सकाशात्यदन्यत्मनोवाक्कायव्यापाररूपंतत्समस्तमविकृत्रिमंविनश्वरंणिक्कारिमउणकोइ अकृत्रिमंनित्यंपुनर्व्वेकिप
रमात्मासदृशोसंसारेकिमपिनास्त्यस्मिन्नर्थेदृष्टांतमाह जीविंजंतेंकुडिलगयशुद्धात्मतत्त्वभावनारहितेननिथ्यात्वविषयकषायाद्यक्ते।
नयानुपार्ज्जितानिकर्म्माणितत्कर्मसहितेनजीवेनभवांतरंप्रतिगच्छतापिकुडिलाइत्वाच्योदेहः सदेहनागच्छतइतिहेतोःपइकुपडिखिंदाजो
इ इत्यंभूतंदृष्टांतंपश्यतितिअत्रेदमध्रुवंज्ञात्वाहेहममम त्वंपरतिविनश्वरहितनिजशुद्धात्मपदार्थभावनाकर्त्तव्येतिअभिप्रायः॥२५९॥ १२४
॥अथतदेवाध्रुवंप्रकारांतरेणध्रुवानुप्रेक्षांप्रतिपादयति॥ देउलुदेउविसत्थुगुरु तित्थुविवेउविकव्वु वत्थुजुदीसइकुसुमियउं इंधणुहोसइ।

सव्वु॥देउलुइत्यादि॥ पदखंडनारूपेणव्याख्यानंक्रियते देउलुनिर्द्दोषिपरमात्मस्थापनाप्रतिमायाःस्थानार्थंदेवकुलंचादेउचितस्सेव॥
परमात्मनोनंतज्ञानादिगुणस्मरणार्थंधर्मप्रभावनार्थंवाप्रतिमास्थापनारूपोदेवः रागादिपरिणतदेवताप्रतिमारूपोवा सत्थुवीतरागा
निर्विकल्पात्मतत्त्वप्रभृति पदार्थप्रतिपादकंशास्त्रंमिथ्याशास्त्रंवा गुरुलोकालोकप्रकाशककेवलज्ञानादिगुणसमृद्धस्यपरमात्म
नः प्रच्छादकोमिथ्यात्वरागादिपरिणतिरूपोमहाज्ञानांधकारस्तेनापियत्प्रवचनदिनकरकिरणैर्विदारितः सनूदूणमात्रेणत्वविलयंग
तः सचजिनदीक्षादायकः श्रीगुरुः तद्विपरीतोमिथ्यागुरुर्व्वातित्थुविसंसारतरणोपायभूतनिजशुद्धात्मतत्त्वभावनारूपनिश्चयती
र्थंतत्सहकारिरूपंतः परमतदीक्षितानांआवासस्तत्तंतीर्थकरदेवकमणिमिथ्यातीर्थसमूहोवा वेउविनिर्द्दोषिपरमात्मोपदिष्टवेदशास्त्र॥
वाच्यः सिद्धांतोपिपरकल्पितवेदोवाकव्वुशुद्धजीवपदार्थादीनांगद्यपद्याकारेणवर्णकंकाव्यंलोकप्रसिद्धचित्रकथाकाव्यंवा वत्थुपरमा
त्मभावनारहितेनजीवेनयदुपार्ज्जितंवनस्पतिनामकर्मतदुदयजनितवृक्षेकदंबकंजोदीसइकुसुमियउं यत्तदृश्यतेकुसुमितंपुष्पितंइंधणुहो

सह्यसु तत्सर्वं कालादेरिंधनं तद्विष्यतिविनाशं यास्यतीत्यर्थः अत्र तथा तावत्पंचेंद्रियविषयेमोहोनकर्तव्यः प्राथमिकानांयानिधर्मतीर्थवर्तनानिमित्तानिदेवकुलदेववसतीमादीनितत्रापिमुद्धात्मभावनाकालेमोहोनकर्तव्यमितिभावार्थः ॥२८०॥ अथशुद्धात्मद्रव्यादन्यत्सर्वमध्रुवमितिप्रकटयति ॥ एक्कुजिमिल्लिविबंभुपरुभुवणुविएहुअसेसु पुहविहिणिम्मिउभंगुरउएहउबुज्झिविसेसु ॥ एक्कुजिइत्यादि ॥ एक्कुजिएकमेवमिल्लिविमुक्त्वाकिंब्रह्मपरुपरमब्रह्मशब्दवाच्यं नानाव्यक्तिभेदभिन्नवनमिवनानाजीवजातिभेदभिन्नं शुद्ध ॥ संग्रहनयेनशुद्धजीवद्रव्यं भुवणुवि भुवनमपिएहुप्रत्यक्षीभूतंकतिम्यंरमोपेतंअसेसु अशेषंसमस्तमपि कथंभूतमिदं सर्वंपुहविहिणिम्मिउ पृथिव्यांलोकेनिर्मापितं भंगुरउ विनश्वरं एहउबुज्झिविसेसु इमंविशेषंबुध्यस्वजानीहित्वंहेप्रभाकरभट्ट ॥ अत्र भावार्थः ॥ विशुद्धज्ञानदर्शनस्वभावं परमब्रह्मशब्दवाच्यंशुद्धजीवतत्त्वंमुक्त्वान्यत्पंचेंद्रियविषयभूतंविनश्वरमिति ॥२८१॥ अथयत् १२९
दृष्टंतदध्रुवत्वंज्ञात्वाधनयौवनेतृष्णानकर्तव्येतिकथयति ॥ जेदिट्ठासूरुग्गमणितेअत्थवणिणदिट्ठ तिंकारणिवढधम्मुकरिधणिजो

व्वणिकउतिट्ठ ॥ जेदिट्ठाइत्यादि ॥ जेदिट्ठायेकेचनदृष्टाःसूरुग्गमणि सूर्योदयेतेअत्थवणिणदिट्ठ तेपुरुषागृहधनधान्यादिपदार्थावा अस्तमनेन दृष्टाः एवमध्रुवत्वंज्ञात्वातिंकारणिवढधम्मुकरि तेनकारणेनवत्सवत्सपुत्रसागारानागारधर्मंकुरु धणिजोव्वणिकउतिट्ठ धनेयौवनेवाका तृष्णानकापीति ॥ तद्यथा ॥ गृहस्थेधनेतृष्णानकर्तव्यातर्हिकिंकर्तव्यंसदासेदरत्नत्रयाराधनांसर्वतासर्वेणदारादिचतुर्विधंदानंदातव्यं नोचेत्सर्वसंगपरित्यागंकृत्वानिर्विकल्पपरमसमाधौस्थातव्यंयौवनेपितृष्णानकर्तव्यायौवनावस्थायांयौवनोद्रेकजनितविषयरागंत्यक्त्वाविषयप्रतिपक्षभूतेवीतरागनिजानंदैकस्वभावेशुद्धात्मस्वरूपेस्थित्वानिरंतरंभावनाकर्तव्येतिभावार्थः ॥ अथधर्मतपश्चरणरहितानांमनुष्य ॥२८२॥
जन्मव्यर्थमितिप्रतिपादयति ॥ धम्मुणसंचिउतउणकिउरुक्खेंचम्ममएण खज्जिविजरउद्देहियएणरइपडिव्वउतेण ॥ धम्मुणइत्यादि ॥ धम्मुणसंचिउ धर्मःसंचयो नकृतःगृहस्थावस्थायांदानशीलपूजोपवासादिरूपसम्यक्त्वपूर्वकोगृहधर्मोनकृतःदर्शनिकव्रतिकाद्येकादशश्रावकधर्मरूपोवातउणकिउ तपश्चरणंनकृतं तपोधनेनतुसमस्तपरद्रव्येच्छानिरोधंकृत्वानशनादिद्वादशविधतपश्चरणबलेननिजशुद्धात्मध्यानेस्थित्वानिरंतरंभावनानकृ

ता कथंस्तेनसुरकेंवमममएण स्हेण मनुष्यश्चारी स्वर्मनि स्तेनयेनैवं न कृतं गृहस्थेन तपोधनेन वा नरइपडिवुत्तेण नरके पतितव्यं तेन किं
कृत्वा खड्गिवित्तं स्रायित्वा कया कर्तृत्वा तया जरबदेहियएजरोदेहिकया॥ इदमत्र तात्पर्यं॥ गृहस्थेना भेदरत्नत्रयस्वरूपमुपादेयं कृत्वा भे
दरत्नत्रयात्मकः श्रावकधर्मः कर्तव्यः यतिना तु निश्चयरत्नत्रये स्थित्वा व्यावहारिकरत्नत्रयबलेन विशिष्टतपश्चरणं कर्तव्यं॥
नो चेद् दुर्लभपरंपरया प्राप्तं मनुष्यजन्म निष्फलमिति॥ २६३ ॥अथ देवीवजिनेश्वरपदेवरमत्त किं करोमीति शिक्षां ददाति॥
॥अरिजियजिणपइंतज्ञिकरिसुहिसङ्गणुअवहेरि तिंबप्पेणविकज्जुणविजोयाइइ संसारि॥ अरिजियइत्यादि॥ अरिजिय अहो तत्र जीव
जिणपइंतन्निकरि जिनपदे तत्किं कुरु गुणानुरागवचननिमित्तं जिनेश्वरेण प्रणीत श्रीधर्मे रतिं कुरु सुहिस्वङ्गणुअवहेरि संसारसुखसह
कारिकारणत्वं तंस्वजनं गोत्रमप्यवहर सजकस्मात् तिंबप्पेणवि तेन स्नेहितपित्रापि कज्जुणवि कार्यं नैव यः किं करोती यो पाडइ यः पातयति कस्मं १२६
सारि संसारसमुद्रे॥ तथा च॥ हे आत्मन् अनादिकालदुर्लभे वीतरागसर्वज्ञप्रणीते रागद्वेषमोहरहिते जीवपरिणामलक्षणे शुद्धोपयोगरूपे नि

श्चयधर्मेपि व्यवहारधर्मे च पुनः षडावश्यकादिलक्षणे गृहस्थापेक्षया दानपूजादिलक्षणे वा शुभोपयोगस्वरूपे रतिं कुरु इत्थंत्रेधर्मेशति कृत्वा यः
तंमनुष्यं स्वर्गो यद्यपि स्वजनस्वकुलं परगोत्रजमपीस्वीकृतिति अयं तावाद्यो विषयसुखनिमित्तं यथानुरागं करोति जीवस्तथा यदि जिनध
र्मं करोति तर्हि संसारे न पततीति॥ तथा चोक्तं॥ विसहं कारणि सव्वुजणुडिम अणुरागु करेइ तिम जिणभासिए धम्मि जइ णउ संसारि पडेइ॥
२६४॥ अथ येन चित्तशुद्धिं कृत्वा तपश्चरणं न कृतं तेनात्मानं वंचितमत्यभिप्रायं मनसि धृत्वा सूत्रमिदं प्रतिपादयति॥ जेण णवि
ण्णुतवयरणुणिम्मलुचित्तुकरेवि अप्पा वंचिउ तेण पर माणुसजम्मु लहेवि॥ जेणइत्यादि॥ जेण येन जीवेन णवि चिण्णउ नैव चीर्णं न
चरितं न कृतं किं तवयरणु बाह्याभ्यंतरतपश्चरणं किं कृत्वा णिम्मलुचित्तुकरेवि कामक्रोधादिरहितं वीतरागचिदानंदैकसुखामृतरसं नि
र्मलं चित्तं कृत्वा अप्पा वंचिउ तेण पर आत्मानं वंचितं तेन नियमेन किं कृत्वा लहेवि लब्ध्वा किं माणुसजम्मु मनुष्यजन्मेति॥ तथाहि॥ दुर्लभ
परंपरारूपेण मनुष्यत्वेन लब्धे तपश्चरणे पि च निर्विकल्पसमाधिबलेन रागादिपरिहारेण चित्तशुद्धिः कर्तव्येति येन चित्तशुद्धिर्न कृता सम्या

परमात्मः १२७

त्मा आत्मवंचक इतिभावार्थः॥ तप्पाचीनं॥ चित्तेबद्धेबद्धोमुक्तेमुक्तोनास्तिसंदेहो अप्पाविमलसहावोमइलिज्जइमइलिएचित्ते॥२८४॥ अथपंचें
द्रियविषयांदर्शयति॥ एकंचेंदियकरहडाजियमोकलामचारि चरिविअसेसुविविसयवणपुणुपाडहिंसंसारि॥एकस्यादि॥ एकतेन्द्रियस्त्वत्ताः पं
चेंद्रियकरहडा अतींद्रियसुखास्वादरूपात्परमात्मतत्त्वकाशात्त्वतिरस्त्वीत्वत्ताः पंचेंद्रियकरहडानंइपुः जियहे मूढजीवमोकलामचारिस्वशुद्धा
त्मतावनोद्भवीतरागपरमानंदैकरूपसुखपराङ्मुखीत्वोत्तत्वास्वैच्छामामाचरस्यमाश्रुद्दययतः किंकुर्वंति पाडहिंपातयंति कं जीवं कस्मिंसारे निः
संसारशुद्धात्मप्रतिपक्षस्त्वत्तेपंचप्रकारसंसारेपुणुपश्चात् किंकृत्वापूर्वंचरिविचरित्वासद्द्रूपंकृत्वा किंविसयवणुपंचेंद्रियविषयवनमिसन्निपायः
॥२८५॥ अथध्यानवैषम्यंकथयति॥ जोइयविसमीजोयगइ मणुसंठवणणजाइ इंदियविसयजिसुक्खडापलिवि
लितिवुजिजाइ॥ जोइयइत्यादि॥ जोइयहेयोगिन्विसमीजोयगइविषमायोगगतिंकस्मात् मणुसंठवणनजाइ निजशुद्धात्मप्रतिचपलंम १२८
र्कटप्रायंमनोधर्तुंनजातितदपिकस्मात् ॥इंदियविषयजिसुक्खडा इंद्रियविषयेषुयानिसुखानि वलिवलि॥

तिह्रूजिजाइ॥ वीतरागपरमाह्लादसमरसीभावपरमसुखरहितानां अनादिवासनावासितपंचेंद्रियविषयसुखास्वादसक्तानां जीवानांपुनः पुनः तत्रै
वगच्छतीतिभावार्थः॥२८६॥ अथस्वजनसंख्याबाह्यप्रदीपकं कथयति॥ सोजोइउजोगइदंसणुणाणुचरित्तु होइविपंचहिंबाहिरउकायंतउपरमत्थु॥ सो
इत्यादि॥ सोजोइउसजोगीध्यानीतपस्वीतेयः किंकरोति जोजोगवइ यः कर्तायोगवइ प्रतिपालयतिरक्षति किं दंसणुणाणुचरित्तु निजशुद्धा
त्मद्रव्यसम्यक्श्रद्धानज्ञानानुचरणरूपंनिश्चयरत्नत्रयं किंकृत्वा होइविभूत्वा कथंभूतः बाहिरउ बाह्यः केभ्यः पंचहंपंचपरमेष्ठिभावनाप्रतिप
क्षभूतेभ्यः पंचमगतिसुखविनाशकेभ्यः पंचेंद्रियेभ्यः किंकुर्वाणः झायंतउध्यायन्सन् कं परमत्थु परमार्थशब्दवाच्यंविशुद्धज्ञानदर्शनस्वभावं
परमात्मानमितितात्पर्यं॥ योगशब्दस्यार्थःकथ्यते॥ योजनंयोगः युजसमाधौइत्यस्यधातुरिति निष्पन्नेनयोगशब्देनवीतरागनिर्विकल्पसमा
धिरुच्यते॥ अथवानंतज्ञानादिरूपेस्वशुद्धात्मनियोजनंपरिणमनंयोगः सइत्थंभूतोयोगोयस्यास्ति इतिसउयोगीध्यानीतपोधनइत्यर्थः॥२८७
॥अथपंचेंद्रियसुखस्यानित्यत्वंदर्शयति॥ विसयसुहइदुइदिवहडापुणुदुक्खहंपरिवाडि भुल्लउजीवमवाहितुहुं अप्पणखंधिकुहाडि॥ विसय

परमात्मः

इत्यादि॥ विसयसुहइं निर्विषयान्नित्याद्वीतरागपरमानंदैकस्वभावात्परमात्मसुखात्प्रतिकूलानि विषयसुखानि बेदिवहडादिनद्वयस्थायीनि
भवंति॥ पुणुपुनः पश्चात्दिनद्वयानंतरं दुःखहं परिवाडि॥ आत्मसुखबहिर्मुखेन विषयासक्तेन जीवेन यान्युपार्जितानि पापानि तदुदयज-
१२८ नितानां नारकादिदुःखानां परिपाटिः प्रस्तावः एवंज्ञात्वा भुल्लउ जीव हे भ्रांत जीव म वाहि तुहुं मा निक्षिप त्वं कं कुहाडि कुठारं क अप्पणखंधि
॥ आत्मीयस्कंधे अत्रेदं व्याख्यानं ज्ञात्वा विषयसुखं त्यक्त्वा वीतरागपरमात्मसुखे स्थित्वा च निरंतरं भावना कर्तव्येति भावार्थः॥ २८९॥ अथा
त्मभावनार्थी यो सौ विद्यमानविषयान् त्यजति॥ तस्य प्रसंसां करोति॥ संता विसय जु परिहरइ बलि किज्जउ हउं तासु॥ सो दइवेण जि मुंडिय-
उ सीसु खडिल्लउ जासु॥ संता इत्यादि॥ संता विसय कटुकविषप्रख्यान् किंपाकफलोपमान् अध्यवसितरूपान् शुद्धात्मतत्त्वोपलंभरूपनिश्चय-
धर्मरत्नचौरान् विद्यमानविषयान्॥ जो परिहरइ यः परिहरति॥ बलि किज्जउ हउं तासु॥ बलिपूजा क्रियते॥ तस्याहमिति॥ श्रीयोगींद्रदेवा-
स्वकीयगुणानुरागं प्रकटयंति॥ ॥विद्यमाने विषयत्यागे दृष्टांतमाह॥ सो दइवेण जि मुंडियउ॥ स दैवेन मुंडितः सकः सीसु खडि- १२८

ल्लउ जासु॥ सिरः खल्वाटं यस्येति॥ अत्र पूर्वकाले देवागमनं दृष्ट्वा समवसरणादिरूपं धर्मातिशयं दृष्ट्वा अवधिमनःपर्ययकेवलज्ञानोत्पत्तिं च दृष्ट्वा भरतसगरराम
पांडवादिकमनेकराजाधिराजमणिमुकुटकिरणकलापचुंबितपादारविंदजिनधर्मरतं दृष्ट्वा च परमात्मभावनार्थं केचन विद्यमानविषय
त्यागं कुर्वंति तद्भावनारतानां दानपूजादिकं च कुर्वंति॥ तत्राश्चर्यं नास्ति इदानीं पुनः देवागमपरिहीणे काले अतिशयवर्जिते केवलोत्पत्तिही-
ने जडवक्रधरोक्षिते इति श्लोककथितलक्षणे दुस्समकाले यत्कुर्वंति तदाश्चर्यमिति भावार्थः॥ २९०॥ अथ मनोजये कृते सतींद्रियजयः
कृतो भवतीति प्रकटीकरोति॥ पंचहं णायकु वसिकरहु जेण होंति वसि अण्ण॥ मूलि विणट्ठइ तरुवरहं अवसइं सुक्कहिं पण्ण॥ पंचहं इ-
त्यादि॥ पदखंडनारूपेण व्याख्यानं क्रियते पंचहं पंचज्ञानप्रतिपक्षभूतानां पंचेंद्रियाणां णायकु रागादिविकल्परहितपरमात्मभावनाप्र-
तिकूलं दृष्टश्रुतानुभूतभोगाकांक्षारूपप्रभृतिसमस्तापध्यानजनितविकल्पजालरूपं मनो नायकं भव्याः वसिकरहु विशिष्टभेदभाव-
नांकुशबलेन स्वाधीनं कुरुत येन नकिं भवति॥ जेण होंति वसि अण्ण॥ येन वशीकृतेन अन्यानींद्रियाणि वशानि भवंति॥ दृष्टांतमाह॥ मूलवि

परमात्म:

३२९

णह इतरु वरहं ॥ मूले विनष्टे तरोर्वृक्षस्य ॥ अवसइं सक्कहिं पण्ण ॥ अवश्यं नियमेन सुष्यंति पर्णानीति ॥ अयमत्र भावार्थः ॥ निजशुद्धात्मतत्त्व
भावनार्थं येन केन विधिकारेण मनोजयः कर्तव्यः तस्मिन् मनसि जिते इंद्रियजयो भवति ॥ तथा चोक्तं ॥ येनोपायेन शक्येत संनियंतुं चलं मनः ॥
स एवोपासनीयोत्र न खेदव्य विरमेत्ततः ॥१२१॥ अथ हे जीव विषयासक्तः सन् कियंतं कालं गमिष्यसीति संबोधयति ॥ विसयासत्तउ जी
व तुं कित्तिउ कालु गमीसि सिवसंगमु करि णिच्चलउ अवसिं मुक्खु लहीसि ॥ विसया इत्यादि ॥ विसयासत्तउ ॥ शुद्धात्मभावनोत्पन्नवीत
रागपरमानंदस्यंदि पारमार्थिकसुखानुभवरहितत्वेन विषयासक्तो भूत्वा जीव हे अज्ञानजीव तुहुं त्वं कित्तिउ कालु गमीसि कियंतं कालं ग
मिष्यसि बहिर्मुखभावेन नयसि तर्हि किं करोमीति प्रश्ने उत्तरमाह ॥ सिवसंगमु करि शिवशब्दवाच्यो योसौ केवलज्ञानदर्शनस्वभाव स्वकी
य शुद्धात्मा तत्र संगमं संसर्गं कुरु ॥ कथंभूतं णिच्चलउ घोरोपसर्गपरीषहप्रस्तावेपि मेरुवन्निश्चलं ॥ तेन निश्चलात्मध्यानेन ॥ अवसइं मुक्खु
लहीसि नियमेनानंतज्ञानादिगुणास्पदं मोक्षं लप्स्यसे त्वमिति तात्पर्यं ॥१२२॥ अथ शिवशब्दवाच्यस्य शुद्धात्मसंसर्गत्यागिनीका

DR BHAU DAJI
डाक्टर भाऊ दाजी

षीस्त्वमिति पुनरपि संबोधयति ॥ इक्कु सिवसंगमु परिहरिवि गुरुवड कहिंमि म जाहि जे सिवसंगमि लीण णवि दुक्खु सहंता वाहि ॥ इक्कु इत्यादि ॥
इक्कु इमं एकस्वभावीभूतं शिवसंगमं शिवसंसर्गं शिवशब्दवाच्यानंतज्ञानादिस्व[भा]वः स्वशुद्धात्मा तस्य रागादिरहितं संबंधं परिहरवि परिहृत्य
हे गुरुवड हे तपोधन कहिंमि म जाहि शुद्धात्मभावनाप्रतिपक्षभूते मिथ्यात्वरागादौ क्वापि गमनं मा कार्षीः ॥ जे सिवसंगमि लीण णवि ये केचन
न विषयकषायाधीनतया शिवशब्दवाच्ये स्वशुद्धात्मनि लीना तन्मया न भवंति ॥ दुक्खु सहंता वाहि व्याकुलत्वलक्षणं दुःखं सहमाना-
संतः पश्येति ॥ अत्र स्वकीयदेहे निश्चयनयेन तिष्ठति योसौ केवलज्ञानाद्यनंतगुणसहितपरमात्मा स एव शिवशब्देन सर्वत्र ज्ञातव्यो नान्यः को
पि शिवनामा व्यापको जगत्कर्तेति भावार्थः ॥१२३॥ अथ सम्यक्दर्शनत्वं दर्शयति ॥ कालु अणाइ अणाइ जिउ भवसायरु वि अणंतु ॥ जीविं विणि
ण पत्ताइं जिणु सामिउ सम्मत्तु ॥ कालु इत्यादि ॥ कालु अनागतकालोपि अनादिः ॥ अणाइ जिउ जीवोप्यनादिः ॥ भवसायरु वि अणंतु ॥ भवः सं-
सारस्स एव समुद्रः सोप्यनादिरनंतश्च जीविं विण्णि ण पत्ताइं ॥ एवमनादिकाले मिथ्यात्वरागाद्यधीनतया निजशुद्धात्मभावनाच्युतेन जीवेन इयं न

परमात्मः

लहुं ध्यायेः किं जिण सामिउ सम्मत्तु। अनंतज्ञानादिचतुष्टयसहितः क्षुधाद्यष्टादशदोषरहितो जिनस्वामी परमाराध्यः सिवसंगमु सम्मत्तु। इति पाठांतरे
सम्यक्त्वं शिवशब्दवाच्यो निजात्मस्वरूपविशेषः सम्यक्त्वशब्देन तु निश्चयेन शुद्धात्मानुभूतिलक्षणं वीतरागसम्यक्त्वं व्यवहारेण तु वीतरागसर्वज्ञप्रणीत
१३० षड्द्रव्यादिश्रद्धानरूपं सरागसम्यक्त्वं चेति भावार्थः॥२७४॥ अथ शुद्धात्मसंवित्तिसाधकतपश्चरणप्रतिपक्षभूतं गृहवासं दूषयति॥ घरवास
उ मा जाणि जिय दुक्कियवासउ एहु। पासु कयंतिं मंडियउ अविचलु णिस्संदेहु॥ घरवासउ इत्यादि॥ घरवासउ गृहवासं अत्र गृहशब्देन वासमु
ख्यभूता स्त्री ग्राह्या॥ तथा चोक्तं॥ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते॥ मा जाणि जिय हे जीव स्वस्वभावरहित मा जानीहि॥ कथंभूतो गृहवासः॥ दुक्कियवा
सउ एहु॥ समस्तदुःकृतानां पापानां वासः स्थानमेव॥ पासु कयंतिं मंडियउ॥ अज्ञानिजीवबंधनार्थं पाशो मंडितः केन कृतांतेन कालकर्मणा कथंभू
तः अविचलु॥ शुद्धात्मतत्त्वभावनाप्रतिपक्षभूतेन मोहबंधनेन बंधत्वाच्चाल्यः निस्संदेहु। संदेहो न कर्तव्य इति॥ अयमत्र भावार्थः॥ विशुद्धज्ञानद १३०
र्शनस्वभावपरमात्मपदार्थभावनाप्रतिपक्षभूतैः कषायैरिंद्रियैर्व्याकुलीक्रियते मनः मनः शुद्धतया च गृहस्थानां तपोधनवत् शुद्धात्मभावना कर्तुं

नायातीति॥ तथा चोक्तं॥ कषायैरिंद्रियैर्दुष्टैर्व्याकुलीक्रियते मनः। ततः कर्तुं न शक्नोति भावनां गृहमेधिनिः॥२७५॥ अथ गृहममत्वत्यागानंतरं देह
ममत्वत्यागं दर्शयति॥ देहु वि जित्थु ण अप्पणउ तहिं अप्पणउ किं अण्णु। परकारणि मण गुरुव तुहुं सिव संगमु अवगण्णि॥ देह इत्यादि॥ देहु वि जि
त्थु ण अप्पणउ देहोपि यत्र नात्मीयः॥ तहिं अप्पणउ किं अण्णु तत्रात्मीयाः किमन्ये पदार्था भवंति किंतु नैव एवं ज्ञात्वा परकारणे परस्य देहस्य वहि
र्भूतस्त्रीवस्त्राभरणोपकरणादिपरिग्रहनिमित्ते मण गुरुव तुहुं॥ सिव संगमु अवगण्णि हे तपोधन शिवशब्दवाच्यशुद्धात्मभावनात्यागं मा कार्षीरि
ति॥ तथा हि॥ अमूर्तेन वीतरागस्वभावेन निजशुद्धात्मना सह व्यवहारेण क्षीरनीरवदेकीभूत्वा तिष्ठति योसौ देहः सोपि जीवस्वरूपं
न भवतीति ज्ञात्वा बहिःपदार्थे ममत्वं त्यक्त्वा शुद्धात्मानुभूतिलक्षणवीतरागनिर्विकल्पसमाधौ स्थित्वा च सर्वतात्पर्येण भावना कर्तव्येत्यभि
प्रायः॥२७६॥ अथमेवार्थं पुनरपि प्रकारांतरेण व्यक्तं करोति॥ करि सिव संगमु एक्कु पर जहिं पाविज्जइ सुक्खु। जोइय अण्णु म चिंति तुहुं जे
ण ण लब्भइ मुक्खु॥ करि इत्यादि॥ करि कुरु कं सिवसंगमु शिवशब्दवाच्यशुद्धबुद्धैकस्वभावनिजशुद्धात्मभावनासंसर्गं एक्कु परं तमेवैकं ज॥

परमात्मः

३२१ हिंयाविजइ सोरकु यत्र स्वशुद्धात्मसंसर्गे प्राप्यते। किं अक्षयानंतसुखं जोइय अण्णु म चिंतु कुं। हे योगिन् स्वस्वभावत्वादन्यचिंतां मा कार्षीः स्वं जेन न
जप्पइ येन कारणेन बहिर्द्वितयाज्जन्यते। कोसौ मुरकु अव्याबाधसुखादिलक्षणो मोक्ष इति तात्पर्यं ॥२५१॥ अथ निदानबंधरत्नत्रयभावनार
हितं मनुष्यजन्म किं विशिष्टं निःसारमिति निश्चिनोति ॥ बलि किउ माणुसजम्मडा देक्खंतहं पर सारु। ज[illegible] उट्ठब्भइ तो कुहइ अह डज्झइ तो छा
रु ॥ बलि किउ इत्यादि ॥ बलि किउ बलिः क्रियते। मस्तकस्योपरितनभागेनावतारणं क्रियते किं। माणुसजम्मडा मनुष्यजन्म किं विशिष्टं
देक्खंतहं पर सारु बहिर्भागव्यवहारेण परं केवलं रूपतामेव सारभूतं कस्मात्। जइ उट्ठब्भइ तो कुहइ यद्यवष्टभ्यते भूमौ निखन्यते ततः कुथित
रूपेण परिणमति। अह डज्झइ तो छारु अथवा दह्यते तर्हि भस्म भवतीति ॥ तथाहि। हस्तिशरीरे दंताश्चमरीशरीरे केशा इत्यादि सारत्वं ति
र्यक्शरीरे दृश्यते मनुष्यशरीरे किमपि सारत्वं नास्तीति ज्ञात्वा घुणभक्षितेक्षुदंडवत् सारं जोकाबीजं कृत्वा निःसारमपि सारं क्रियते कथ- ३२१
मिति चेत्। यथा घुणभक्षितेक्षुदंडे बीजे कृते सति विशिष्टेक्षूणां लाभो भवति। तथा निःसारशरीराधारेण वीतरागसहजानंदैकस्वशु

द्धात्मस्वभावसम्यक्श्रद्धानज्ञानानुचरणरूपनिश्चयरत्नत्रयभावनाबलेन तत्साधकव्यवहाररत्नत्रयभावनाबलेन स्वर्गफलं गृह्यत इति ता-
त्पर्यं ॥२५२॥ अथ देहस्याशुचित्वानित्यत्वादिप्रतिपादनरूपेण व्याख्यानं करोति ॥ उव्वलि ॥ तथाहि ॥ उव्वलि चोप्पडि चिट्ठ करि देहि सु-
मिट्ठाहार देहहं सयल णिरत्थ गय जिम दुज्जणि उवयार ॥ उव्वलि इत्यादि ॥ पदखंडनारूपेण व्याख्यानं क्रियते। उव्वलि उद्वर्तनं स्नानादिकुरु चो
प्पडि तैलादिम्रक्षणं कुरु चिट्ठ करि मंडनरूपां चेष्टां कुरु देहि सुमिट्ठाहार देहि सुमिष्टाहारान् कस्य देहहं देहस्य सयल णिरत्थ गय स-
कलमपि विशिष्टाहारादयो निरर्थका गताः। केन दृष्टांतेन। जिम दुज्जणि उवयार दुर्जने यथोपकारा इति ॥ तथाहि ॥ यद्यप्ययं कायः स्वस
ध्यापि किमपि ग्रासादिकं दत्वा अस्थिरेणापि स्थिरं मोक्षसौख्यं गृह्यते। अपवित्रेणापि ... अशुचित्वेनाप्यशुचिभूतेनापि शुचिभूतं शुद्धात्मस्वरूपं गृह्यते
निर्गुणेनापि केवलज्ञानादिगुणसमूहः साध्यत इति भावार्थः ॥ तथा चोक्तं ॥ अथिरेण थिरा मलिणेण णिम्मला णिग्गुणेण गुणसारा ॥
काएण जा विढप्पइ सा किरिया किं ण कायव्वा ॥२५३॥ अथ ॥ हेला जं जरु णरयघय रुत्तेहं जोइय का त्तु। णरयणिरंतरुट्टरियउ किमि

परमात्मा:

१३२ जइ अणुराउ ॥ जेहउ इत्यादि ॥ जेहउ जज्जरु यथा जर्जरं शतजीर्णं णरयघरु नरकगृहं तेहउ जोइय काउ तथा देहिनः कायः यतः किं
णरय पूरियउ नरकेन निरंतरं पूरितं एवं ज्ञात्वा किम किज्जइ अणुराउ कथं क्रियते अनुरागो न कथमपीति ॥ तद्यथा ॥ यथा नर
कगृहं शतजीर्णं तथा कायगृहमपि नवद्वारच्छिद्रित्वात् शतजीर्णं परमात्मा तु जन्मजरामरणादिच्छिद्रदोषरहितः कायस्तु मूत्रपुरीषादिनरक
पूरितः भगवान् शुद्धात्मा तु भावकर्म्मद्रव्यकर्म्मनोकर्म्ममलरहित इति ॥ अत्र भावार्थः ॥ एवं देहात्मनोर्भेदं ज्ञात्वा देहममत्वं सक्त्वा वीत
रागनिर्विकल्पसमाधौ स्थित्वा च निरंतरं भावना कर्त्तव्येति ॥ २८ ॥ अथ ॥ दुक्खइं पावइं असुचियइं तिहुयणि सयलइं लेवि एव
हिं देहु विणिम्मियउ विहिणा वइरु मुणेवि ॥ दुक्खइं इत्यादि ॥ दुक्खइं दुःखानि पावइं पापानि असुचियइं अशुचिद्रव्याणि तिहुयणि सयल
इं लेवि त्रिभुवनमध्ये समस्तानि गृहीत्वा एयहिं देहु विणिम्मियउ एतैर्देहो विनिर्म्मितः केन कर्त्तृभूतेन विहिणा विधिशब्दवाच्येन कर्म
णा कस्मात् देवं भूतो देहः कृतः वइरु मुणेवि वैरं मत्वेति ॥ तद्यथा ॥ त्रिभुवनस्थदुःखैर्निर्मितत्वात् दुःखरूपोयं देहः परमात्मा १३२

तु व्यवहारेण देहस्थोपि निश्चयेन देहाद्भिन्नत्वात् दनाकुलत्वलक्षणसुखस्वभावः त्रिभुवनस्थपापैर्निर्मितत्वात् पापरूपोयं देहः शुद्धात्मा
तु व्यवहारेण देहस्थोपि निश्चयेन पापरूपदेहाद्भिन्नत्वात् दत्यंतपवित्रः त्रिभुवनस्थाशुचिद्रव्यैर्निर्मितत्वाद् अशुचिरूपोयं देहः शुद्धात्मा तु व्य
वहारेण देहस्थोपि निश्चयेन देहात् पृथग्भूतत्वात् दत्यंतनिर्मल इति ॥ अत्रैवं देहेन सह शुद्धात्मनो भेदं ज्ञात्वा निरंतरं भावना कर्त्तव्येति ता
त्पर्यं ॥ २९ ॥ अथ ॥ जोइय देहु घिणावणउ लज्जहि किण रमंतु णाणिय धम्मिं रइ करहि अप्पा विमलु करंतु ॥ जोइय इत्यादि ॥ जो
इय हे योगिन् देहु घिणावणउ देहो घृणया जुगुप्सया सहितः लज्जहिं किण रमंतु दुर्गन्धरहितं परमात्मानं मुक्त्वा देहे रममाणो लज्जां किं न क
रोषि तर्हि किं करोमीति प्रश्ने प्रत्युत्तरं ददाति ॥ णाणिय हे विशिष्टभेदज्ञानिन् धम्मिं निश्चयधर्मशब्दवाच्ये वीतरागसदानंदैकस्वभाव
परद्रव्यरतिं कुरु किं कुर्वन् सन् आत्मा वीतरागसदानंदैकस्वभावपरमात्मानं विमलु करंतु आर्त्तरौद्रादिसमस्तविकल्पत्यागे
न विमलं निर्मलं कुर्वन्निति तात्पर्यं ॥ ३० ॥ जोइय देहु परिच्चयहि देहु ण भल्लउ होइ देहविभिण्णउ णाणमउ सो तुहुं अप्पा जोइ

॥जोइयइत्यादि॥ हे योगिन् देहु परिच्चयहि शुचिदेहान्नित्यानंदैकस्वभावत्वात् शुद्धात्मद्रव्याद्विलक्षणं देहं परित्यज कस्मात् देहुण भ-
ल्लउ होइ देहो न भद्रः समीचीनो न भवतीति॥ तर्हि किं करोमि इति॥ प्रश्ने कृते प्रत्युत्तरं ददाति॥ देहविभिण्णउ देहविभिन्नं णाणमउ ज्ञानेन निर्वृत्तं ज्ञा- २
३३३ नमयं केवलज्ञानाविनाभूतानंतगुणमयं सो तुहुं अप्पा जोइ तं पूर्वोक्तलक्षणमात्मानं त्वं कर्त्ता पश्येति॥ अयमत्र भावार्थः॥ चंडो
ण मुयइ वेरं भंडणसीलो य धम्मदयरहिओ दुट्ठो ण य एइ वसं लक्खणमेयं तु किण्हस्स॥ इति गाथाकथितलक्षणा॥ कृष्णलेश्या धनधान्यादिती-
व्रमूर्च्छाविषयाकांक्षादिरूपा नीललेश्या रणे मरणं प्रार्थयति स्तूयमानः संतोषं करोतीत्यादिलक्षणा कापोतलेश्या चैव लेश्यात्रयप्रभृति
समस्तविभावत्यागेन देहाद्भिन्नमात्मानं भावयति॥२८४॥ दुक्खहं कारणु मुणिवि मणि देहु वि एहु चयंति जित्थु ण पावहिं परमसुहु तित्थु किं
संत वसंति॥ दुक्खहं इत्यादि॥ दुक्खहं कारणु वीतरागतात्त्विकानंदरूपशुद्धात्मसुखाद्विलक्षणस्य नारकादिदुःखस्य कारणं मुणिवि मत्वा क ३३३
मणि मनसि कं देहु वि देहमपि एहु इमं प्रत्यक्षीभूतं चयंति त्यजंति। देहममत्वं त्यक्त्वा शुद्धात्मनि स्थित्वा ध्यायंतीति। जित्थु ण पावहिं यत्र देहेन प्राप्नु-

वंति किं परमसुहु स्वेंद्रियविषयातीतं शुद्धात्मानुभूतिसंपन्नं परमसुखं तित्थु किं संत वसंति तत्र देहे संतः सत्पुरुषाः किं वसंति शुद्धात्मा-
सुखसंतोषयुक्तास्तत्र किं रतिं कुर्वंतीति भावार्थः॥ अथात्मा यत्र सुखे रतिं कुर्वंति तद्दर्शयति॥ अप्पायत्तउं जं जि सुहु तेण जि करि संतोसु॥
॥पर सुहु वढ चिंतंताहं हियइ ण फिट्टइ सोसु॥ अप्पायत्तउ॥ अन्यद्रव्यनिरपेक्षत्वेनात्माधीनं जं जि सुहु यदेव शुद्धात्मसंवित्तिसमुत्पन्नं सुखं ते-
ण जि करि संतोसु तेनैव तदनुभवेनैव संतोषं कुरु पर सुहु वढ चिंतंताहं इंद्रियाधीनं परसुखं चिंतयतां वढ वत्स मित्र हियइ ण फिट्टइ सोसु
हृदयेन न पश्यति शोषो तद्दाह इति आध्यात्मरतिः स्वाधीना विच्छेदविघ्नौघरहिता भोगरतिस्तु पराधीना वह्नेरिंधनैरिव समुद्रस्य नदीसह॥
स्रैरिवातृप्तिकरा च एवं ज्ञात्वा स्वाधीनसुखस्य कृते एदंम्हि रदो णिच्चं संतुट्ठो होहि णिच्चमेदम्हि एदेण होहि तित्तो तो होहदि उत्तमं सुक्खं॥ इतिगा॥
था कथितलक्षणे अध्यात्मसुखे रतिस्तस्य सा भावना कर्त्तव्येति तात्पर्यं॥ तथा चोक्तं॥ तिणकट्ठेण व अग्गी लवणसमुद्दो णदीसहस्सेहिं॥
॥ण इमो जीवो सक्को तिप्पेदुं कामभोगेहिं॥ अथात्मशब्दस्य व्युत्पत्तिः क्रियंते॥ मिथ्यात्वविषयकषायादिबहिर्द्रव्यनिरालंबनेनात्मनु॥

परमात्म:

ध्यानमधात्मं ॥२८५॥ अथात्मनो ज्ञानस्वभावं दर्शयति ॥ अप्पलँ णुवसियविअण्णु अण्णिसहाउ इयं जाणेविण जोइयहु परहंमबं
धहु राउ ॥ अप्पइं इत्यादि ॥ अप्पइं आत्मा शुद्धात्मनः णाणु परसियविरीतरागस्वसंवेदनज्ञानं त्यक्त्वा अण्णु अण्णिसहाउ अन्यो ज्ञाना
१२४ दिः स्वभावो नास्ति इउ जाणेविणु इदमात्मनः शुद्धात्मज्ञानस्वभावं ज्ञात्वा जोइयहो योगिनः परहं म बंधहु राउ परस्मिन् शुद्धा
त्मनो विलक्षणे देहे रागादिकं मा बधीत मा कुरु ततस्मात्त्ज्ञात्वमनः शुद्धात्मज्ञानस्वरूपं ज्ञात्वा रागादिकं त्यक्त्वा निरंतरं भाव
नाकर्त्तव्येति तात्पर्यं ॥२८६॥ अथ स्वात्मनो वलेन तत्रिर्मितं चित्तनिश्चलीकरणरूपं परमोपदेशं दर्शयति ॥ प्रक्षेपकं ॥ विसयकसा
यहिं मण सलिलु णवि डहुलिजइ जासु अप्पा णिम्मलु होइ लहु वढ पच्चक्खु वि तासु ॥ विसयइत्यादि ॥ विसयकसायहिं मण सा
लिलु ज्ञानावरणाद्यष्टकर्मजलचराकीर्णसंसारसागरेति विषयरूपात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतैर्विषयकषायमहावातै १२४
र्यतः अस्तुरसलिलं णवि डहुलिजइ नैव क्षुभ्यते जासु यस्य तत्त्ववरपुंडरीकस्य अप्पा णिम्मलु होइ लहु आत्मा रत्नविशेषोह्य

नादिकालरूपमहापातालेपतितः सन् रागादिमलपरिहारेण लघु शीघ्रं निर्मलो भवति वेइरत्नकं केवलं निर्मलो भवति पच्च
क्खु विशुद्धात्मा परमइस्तुभ्यं तेन तस्य परमस्य कला अनुभूतिः परमकलाः एवद्दृष्टिः परमकलादृष्टिः तया परमकलादृष्ट्या यावद्
वलोकमे स्वर्गनिरीक्षणीतेन प्रत्यक्षोपि स्वसंवेदनया ह्यापि भवति कस्य तासु यस्य पूर्वोक्तप्रकारेण निर्मलं मनः संस्थितं भावा
र्थः ॥२८७॥ अथ ॥ अप्पा परहं णमेलविउ मणु मारिवि सहसत्ति सो वढ जोएं किं करइ जासु ण एह सत्ति ॥ अप्पा इत्यादि ॥ अ
प्पा अयं प्रत्यक्षस्ततः सविकल्प आत्मा परहं ण्मा तिहु जालाम रकृतिसमस्तमनोरथरूपविकल्पजालरहितस्य विशुद्धज्ञा
नदर्शनस्वभावस्य परमात्मनः णमेलविउ नयोजितः किं कृत्वा मणु मारिवि मिथ्यात्वविषयकषायादिविकल्पसमूहपरि
णतं मनो वीतरागनिर्विकल्पसमाधिशस्त्रेण मारयित्वा सहसत्ति झटिति सो वढ जोएं किं करइ स पुरुषः वढ वत्स योगेन
किं करोति सकः जासु ण एह सत्ति यस्य हृदि मनोमारणशक्तिर्नास्तीति तात्पर्यं ॥२८८॥ अप्पा मिल्लवि णाणमउ

परमात्म:

३२५

अणुजिझायहिझाणए वढअणाणवियंभियहं कउतहं केवलणाणु ॥ अप्पा इत्यादि ॥ अप्पा स्वशुद्धात्मानं मिल्लिवि वि
मुक्त्वा कथंभूतं मात्मानं णाणमउ सकलविमलकेवलज्ञानाद्यनंतगुणनिर्वृत्तं अणुजि अन्यदेव झायहिं ध्यायंति ये एव तज्झा
यहिं ध्यायंती किं झाणए ध्यानं वढ वत्स पित्र अणाणवियंभियहं शुद्धात्मानुभूतिलक्षणाज्ञानविजृंभितानां परिणतानां क
उ तहं केवलणाणु कथं तेषां केवलज्ञानं किंतु नैवेति अत्र यद्यपि प्राथमिकानां सविकल्पावस्थायां चित्तस्थितिकरणा
र्थं विषयकषायरूपदुर्ध्यानवंचनार्थं च जिनप्रतिमाक्षरादिकं ध्येयं भवतीति तथापि निश्चयध्यानकाले स्वशुद्धात्मैव ध्ये
य इति भावार्थः ॥ १२९ ॥ अथ ॥ सुण्णउपउझायंताहं बलिबलिजोइयडाहं समरसिभावपरेणसहु पुण्णुविपाउणजाहं ॥ सुण्णउ इत्या
दि ॥ सुण्णउ शुभाशुभमनोवचनकायव्यापारैः शून्यं पउ वीतरागपरमानंदैकसुखामृतरसास्वादरूपः स्वसंवित्तिमयी या
सा परमकला तया भरितावस्थपदं निजशुद्धात्मस्वरूपं झायंताहं वीतरागत्रिगुप्तिसमाधिबलेन ध्यायतां बलि बलि जो

इयडाहं योगींद्रदेवा स्वकीयाभ्यंतरगुणानुरागं प्रकटयति बलि क्रियेऽहमिति परमयोगिनां प्रसंसां कुर्वंति येषां किं समरसिभा
उ वीतरागपरमाह्लादसुखेन परमसमरसीभावं केन सह परेण सहु स्वसंवेद्यमानपरमात्मना सह पुनरपि किं च ये पां पुण्णुविपाउणजा
हं शुभाशुभरूपैकस्वभावपरमात्मनो विलक्षणं पुण्यपापद्वयमिति न येषां मित्यभिप्रायः ॥ १३० ॥ अथ ॥ उव्वसवसियाजोकरइवसियाक
रइसुण्णु बलिकिजउतसुजोइयहिं जासुणपाउणपुण्णु ॥ उव्वस इत्यादि ॥ उव्वस उद्वसान् शून्यान् कारु वीतरागत्वान्निर्विकल्पिदाने
दैकलक्षणनिर्दिशानंदशुद्धात्मानुभूतिपरिणामरतान् परमानंदनिर्विकल्पस्वसंवेदनज्ञानबलेन दानें विशिष्टज्ञानकाले वसि
या करइ तेनैव स्वसंवेदनाज्ञानेन वासिया वसितान् भरितावस्थान् करोति जो यः परमयोगी वसिया करइ सुण्णु निश्च
यनयेन शुद्धचैतन्यं निश्चयप्राणं तस्य निश्चयप्राणस्य हिंसकत्वान्मिथ्यात्वविकल्पजालमेव निश्चयहिंसा तद्भावृति समस्तवि
भावपरिणामान् स्वसंवेदनज्ञानेनाभ्यासबलेन वसितानि दानि शून्यान् करोति यः परमो योगी बलि किज्जउ तसु जोइयहिं बलि मस्तक

८

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

परमात्म

स्यापरिणवतारणं किं येहमिति तस्य योगिन एवं श्रीयोगींद्रदेवा गुणप्रसंसां कुर्वंति पुनरपि किं यस्य योगिनः जासु ण यस्य न हि
ण गुणः वीतरागशुद्धात्मतत्वाद्विपरीतं पुण्यपापद्वयमिति तात्पर्यं ॥२०५॥ अथैकस्त्रेणेव संदला सूत्रचतुष्टयेनानंद
३२६ च्युतमेव तत्वं सूत्रपंचकेनोक्तं निर्विकल्पसमाधिरूपपरमोपदेशं पुनरपि विवृणोति ॥ पंचकलं ॥ उव्वसमो जु तडत्ति जहि म
णु अत्थवणइं जाइ सोसामिय उवएसु कहि अण्णेंदेविकाइ ॥ उव्वस इत्यादि ॥ पदखंडनारूपेण व्याख्यानं क्रियते उव्वस उद्वस
ति कोसौ मोहु निर्मोहिशुद्धात्मद्रव्यप्रतिपक्षभूतो मोहः तडत्ति झटिति जहिं यो हेतुद्वयो तत्र समस्तविकल्परहिते यत्र
परमात्मपदार्थे पुनरपि किं यत्र मणु अत्थवणइं जाइ निर्विकल्पात्मशुद्धात्मवाद्विपरीतं नानाविकल्पजालरूपं मनोऽस्त
गं गच्छति सो सामिय उवएसु कहि हे स्वामिन् तदुपदेशं कथयेति प्रभाकरभट्टः श्रीयोगींद्रदेवान् पृच्छति अण्णें देवि उपदेशेन ४
काइ निर्दोषिपरमात्मानः परमाराध्यात् सकाशात् अन्येन देवेन किं प्रयोजनमित्यर्थः ॥ इति प्रभाकरभट्टप्रश्नः ३२६

च्यमेकं गतं ॥२०६॥ अथोत्तरं ॥ णासविणिग्गउ सासडा अंबरि जित्थु विलाइ तुट्टइ मोहु तडत्ति तहिं मणु अत्थवणहं जाइ
॥ णासविणिग्गउ इत्यादि ॥ णासविणिग्गउ नासिकाविनिर्गतः सासडा उच्छ्वासः अंबरे मिथ्यात्वरागादिविकल्पजालरहित
शून्ये अंबरशब्दवाच्ये जित्थु यत्र त्रैकालिकपरमानंदस्थिरिता निर्विकल्पसमाधौ विलाइ विलीयते किं कृत्वा सो विलयं गच्छति
नासिकाद्वारं विहाय तालुरंध्रेण गच्छतीत्यर्थः ॥ तुट्टइ त्रुट्यति नश्यति कोसौ मोहु मोहोदयेनोत्पन्नरागादिविकल्पजालः त
डत्ति झटिति तहिं तत्र ब्रह्मद्वेधिपर्यंते निर्विकल्पसमाधौ मणु मनः कुर्वंति रागादिविकल्पाधारभूतं तन्मयं वा अत्थवणहं
जाइ अस्तं विनाशं गच्छति स्वस्वभावेन तिष्ठतीति अयमत्र यदायं जीवो रागादिपरभावशून्यनिर्विकल्पसमाधौ तिष्ठति तदा
यमभूमृत्सरूपो वायुर्नासिकाछिद्रद्वयं वर्जयित्वा स्वयमेवानीहितवृत्त्या तालुप्रदेशे यत् केशात् अष्टमभागप्रमाणछिद्रमस्ति
तेन द्वारेण दशमद्वारेण तदनंतरं तत एव नासिकायाः समागच्छति तरं कृत्वा रंध्रेण निर्गच्छतीति तत्र परकल्पितवायु

परमात्म: धारणास्थानं न सो ग्राह्यः ॥ कस्मादितिचेत् ॥ वायुधारणा तावदीहापूर्विका इहाकार्यरूपो विकल्पः स च मोहकारणं न भवतीति न च परिक
ल्पितवायुः किंच कुंभकपूरकरेचकादिसंज्ञा वायुधारणा क्षणमात्रं भवत्येवात्र किंतु अभ्यासवशेन घटिकाप्रहरदिवसादिष्वपि भवति ।
३३७ तस्य वायुधारणस्य च कार्यं देहारोगत्वलघुत्वादिकं न च मुक्तिरिति । यदि मुक्तिरपि भवति तर्हि वायुधारणाकारकाणामिदानींतनपु २
रुषाणां मोक्षो किं न भवतीति भावार्थः ॥ २०७ ॥ अथ ॥ मोक्खु विजिजइ मणएण मरइ हड सासु केवलणाणविपरिणवइ अंबरजाहं जि
णसु ॥ मोक्खु विजिजइ इत्यादि ॥ मोक्खु मोक्षो न मत्वादि विकल्पजालविलिजइ विलयं गच्छति मणएण मरइ इहलोकपरलोकाशाप्रभृतिवि ॥
कल्पजालरूपं मनो मृयते त्रुटइ हडस्पति कोसौ सासु निःश्वासः अनीहितवृत्त्या नासिकाद्वारं विहाय तत्क्षणमात्रे तालु
रंध्रेण गच्छति पुनरप्यंतरं कृत्वा नासिकया याति निर्गच्छति पुनरपि रंध्रेण स तु श्वासनिःश्वासलक्षणो वायुः पुरवि
क्लितवती केवलणाणविपरिणइ केवलज्ञानमपि परिणमिति समुच्चयं तेषां किं अंबरजाहं जिणवासुरागद्वेषमोहरूपवि ३३७

कल्पजालशून्ये अंबरे अंबरशब्दवाच्ये शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपे निर्विकल्पत्रिगुप्तिगुप्तपर
मसमाधौ येषां निवास इति ॥ अयमत्र भावार्थः ॥ अंबरशब्देन शुद्धात्मा काशं न ग्राह्यं किंतु विषयकषाय
कृषायविकल्पशून्यः ॥ परमसमाधिर्ग्राह्यः ॥ वायुशब्देन च कुंभकपूरकरेचकादिरूपो वायुनिरोधो न ग्रा
ह्यः किंतु स्वयमनीहितवृत्त्या निर्विकल्पसमाधिबलेन दशमद्वारसंज्ञेन ब्रह्मरंध्रसंज्ञेन सूक्ष्मातिसूक्ष्मतरू
पेण च तालुरंध्रेण यो सौ गच्छति स एव ग्राह्यः ॥ तत्र न च दुक्कं केणावि ॥ मणएम रपवणं जहिंखयहं जाइ ॥

परमात्म: सव्वंगइ तिहुयणु वहइ तहिं जि वाइ मूढा अंतरालु परियाणहिं तुट्टइ मोहजालु जइ जाणहि ॥ अत्र सर्वोत्कृष्ट
१३८ त्मानमेव मनोमरणं ग्राह्यं पवनस्त्वयोपि प्रवेकि उसणएव सव्वंगइ तिहुवणह तहिं जि वाइ त्रिभुवनप्रका
शकस्वात्मानं तत्रैव निर्विकल्पसमाधौ तिष्ठतीत्यर्थः अंतराल अंतरिष्ठे ननु रागादिपरमात्मस्वरूपं तं ग्राह्यं स्वान्का
ले ज्ञाते सति मोहजालं न त्रुट्यति न मोक्षं स्यात् दृष्टं परकलितं ग्राह्यं मित्यतिप्रायः ॥१२९॥ अथ जो आया सहमणहधरइ
लोयालोयपरमाणु तुट्टइ मोक्खु तडत्ति तसु पावइ परहं पवाणु ॥ ता॰ इत्यादि॰ जो यो ध्याता पुरुषः आत्मान्या सहमणहधरइ ॥ १३८

यथा परद्रव्यसंबंधरहितत्वेनाकाशमंबरशून्यमित्युच्यते तथा वीतरागचिदानंदैकस्वभावेनभरितावस्थोपि मिथ्या
त्वरागादिपरभावरहितत्वान्निर्विकल्पसमाधिकाले अंबरशून्यमित्युच्यते तत्राकाशसंज्ञे निर्विकल्पसमाधौ मन
धरति स्थिरं करोति कथंभूतं मनः लोयालोयपरमाणु लोकालोकप्रमाणं लोकालोकव्याप्तिरूपं अथवा प्रसिद्धलोक
लोकाकाशव्यवहारेण ज्ञानापेक्षया न च प्रदेशापेक्षया लोकालोकप्रमाणं परमात्मानं संज्ञां धरति तुट्टइ मोक्खु तडत्ति
तस्स त्रुट्यति न त्रुट्यति कोसौ मोक्खु मोह कथं झटिति तस्य ध्यातानु न केवलं मोहो न त्रुट्यति पावइ प्राप्नोति किं परहं पवाणु
परस्य परमात्मस्वरूपस्य प्रमाणं कीदृशं तत्प्रमाणमिति चेत् व्यवहारेण रूपग्रहणविषये चक्षुरिव सर्वगतः यदि
पुनर्निश्चयेन सर्वगतो भवति तर्हि वस्तुं कापि स्पर्शो दाहं प्राप्नोति तथात्मनोपि परकीयसुखदुःखविषये तन्मयपरिणाम
त्वेन परकीयसुखदुःखानुभवं प्राप्नोति न च तथा निश्चयेन पुनर्लोकमात्रासंख्यप्रदेशोपि सन् व्यवहारेण पुनः शरीरनामकर्मो
त्वसंहारविस्तारवशात् दिव्यस्ति तत्ताजनस्य प्रदीपवत् देहमात्र इति भावार्थः ॥१३०॥ अथ ॥ देहादिवसंतु विणि विमुणिं जोयोदेवु अ

णंतु अंबरि समरसि मणु धरिवि सामियणहु णिलंतु ॥ दिहिवसं त्रइसंसादि ॥ देहिवसंतु वियक्खरेण देहे वसन्तमपि णविमुणिणु नैव ज्ञातः कोसौ ॥ वाजिञ्जात्मा किंविशिष्टः ज देहः आराधना योग्यः केवल ज्ञानाद्यनंतगुणस्वरूपत्वेन देवः परमाराध्यः पुनरपि किंविशिष्टः अणंतु अनंतप दार्थः परिच्छित्तिकारणत्वाद्विनश्वरत्वादनंतः किं कृत्वा मणु धरिवि मनो धृत्वा क्व अंबरे अंबरशब्दवाच्ये शुद्धे लक्षणे रागादिशून्ये निर्वि कल्पसमाधौ कथंभूते समरसि वीतरागतात्विकपरमानंदस्पंदितिसमरसीभावे साधोऽसामियदेह स्वामिन् प्रभाकरभट्ट पश्चात्तापम नुशयं करिष्यामि किंभूते णहु णिलंतु इयंतं कालमिकं भूतं परमात्मनोपदेशमलब्ध्वा नः समु निन्द्योतोऽनिष्टो दमि सत्ति भाव ॥ १२८ ॥ ॥ एवं परमोपदेशकथनमुख्यत्वेन सूत्रदशकं गतं ॥ अथ परमोपशमभावसहितेन सर्वसंगपरित्यागेन संसारविच्छेदो भवतीति नि श्चितोति त्युयं ॥ सयलविसंगमछिया णवि किंजिउ उवसमभाउ ॥ सिवपयमग्गु मणिमु णवि जहिं जोइहिं अणुराउ ॥ ॥ घोरुण चिणउ तवचरणु जं णियबोहहं सारु ॥ पुण्णु वि पाउ विकिमछिउ जइ संसारु ॥ ॥ ॥ ॥ श्री ३३८ ॥ ॥ २१ रत्ना ॥ ३२९

१८१० विप्र चौबि

सयलविसंसादि ॥ सयलविसमस्ता अपि संगामिथ्यात्वादिचतुर्दशभेदभिन्ना अभ्यंतराः क्षेत्रवास्त्वादिदशभेदभिन्ना बाह्या अपि संगाः णमिछिया नामुक्ताः पुनरपि किं न कृतं णविकिउ उवसमभाउ जीवितमरणलाभालाभसुखदुःखादिसमतालक्षणो नैव कृत उपशम भावः पुनश्च किं न कृतं सिवपयमग्गु विमुणिउ णवि शिवं परमकल्याणं निर्वाणं शांतमक्षयं प्राप्तं मुक्तिपदं यन्न सशिवपरिकीर्तितः ॥ शिवप नात् ॥ शिवशब्दवाच्यो योऽसौ मोक्षस्तस्य मार्गोपि न ज्ञातः कथंभूतो मार्गः स्वशुद्धात्मसम्यक् श्रद्धानज्ञानानुचरणरूपः यत्र मार्गे किं जहिं जोइहिं अ णराउ यत्र निश्चयमोक्षमार्गे परमयोगिना मनुरागस्तात्पर्यं ॥ १२९ ॥ न केवलं मोक्षमार्गोपि न ज्ञातः ॥ घोरुणचिणउ तवचरणु जं णिय बोहहं सारु पुण्णु वि पाउ विदहु णवि किंकिमछिज्जइ संसारु घोरुण चिणउ तवचरणु घोरं दुर्धरं परीषहोपसर्गजयरूपं नैव चीर्णं न कृतं कि तत् अनशनादि द्वादशविधं तपश्चरणं यत्कथंभूतं जं णियबोहहं सारु यत्तपश्चरणं वीतरागनिर्विकल्पात्मसंवेदनलक्षणेन निजबोधेन सा रभूतं पुनश्च किं न कृतं पुण्णु वि पाउवि निश्चयनयेन शुभाशुभनिरालम्बयरहितस्य संसारिजीवस्य व्यवहारेण सुवर्णलोहनिगलद्वयस दृशं पुण्यपापद्वयमपि दहु णवि शुद्धात्मध्यानानुभावरूपेण ध्यानाग्निना दग्धं नैव किं मछिज्जइ संसारु कथं छिद्यते संसारः इति अत्रेदं व्या

ध्यानं ज्ञात्वा निरंतरं शुद्धात्मध्यानभावना कर्तव्येति तात्पर्यं ॥ २९८ ॥ अथ दानपूजापंचपरमेष्ठिवंदनादिरूपं परंपरया मुक्तिकारणं
श्रावकधर्मं कथयति ॥ दाणु ण दिण्णउ मुणिवरहं ण वि पुज्जिउ जिण णाहु । पंच ण वंदिय परमगुरु किमु होसइ सिवलाहु ॥ दाणु इ
त्यादि ॥ दाणु ण दिण्णउ आहाराभयभैषज्यशास्त्रभेदेन चतुर्विधदानं भक्तिपूर्वकं न दत्तं केषां मुणिवरहं निश्चयव्यवहाररत्नत्रया
राधकानां मुनिवरादिचतुर्विधसंघस्थितानां पात्राणां ण वि पुज्जिउ जलधारया सद्गंधाक्षतपुष्पाद्यष्टविधपूजया न पूजितः कोसौ जि
णणाहु देवेंद्रधरणेंद्रनरेंद्रपूजितः केवलज्ञानाद्यनंतगुणपरिपूर्णो पूज्यपदस्थितो जिननाथः पंच ण वंदिय पंच न वंदिताः के ते परम
गुरु त्रिभुवनाधीशवंद्यपदस्थिता अर्हत्सिद्धाः त्रिभुवनेशवंद्यमोक्षपदाराधकाः आचार्योपाध्यायसाधवश्चेति पंचगुरवः किमु होस
इ सिवलाहु शिवशब्दवाच्यमोक्षपदस्थितानां तदाराधकानामाचार्यादीनां च यथायोग्यं दानपूजावंदनादिकं न कृतं कथं शिवश **१४०**
ब्दवाच्यमोक्षसुखस्य लाभो भविष्यति न कथमपीति अत्रेदं व्याख्यानं ज्ञात्वा उपासकाध्ययनशास्त्रकथितमार्गेण विधिदातृपा

त्रलक्षणविधानेन दातव्यं पूजावंदनादिकं च कर्तव्यमिति तात्पर्यार्थः ॥ २९९ ॥ अथ निश्चयेन चिंतारहितध्यानमेव मुक्तिकारणमि
ति प्रतिपादयति ॥ चतुष्कलं ॥ अद्धुम्मीलियलोयणिहिं जोउ कि झंपियएहिं । एमइ लब्भइ परमगइ णिच्चिंतिं ठियएहिं ॥ अ॥
अद्धुम्मीलियलोयणिहिं अर्धोन्मीलितलोचनपुटाभ्यां जोउ कि योगो ध्यानं किं न भवति अपितु भवत्येव केवलमर्धोन्मीलिताभ्यां झं
पियएहिं झंपिताभ्यां सम्यग्मीलितलोचनाभ्यां नैव तर्हि कथं लभ्यते परमगति एमइ लब्भइ परमगइ एवमेव लभ्यते लोचनपुटनिमीलनोन्मी
लननिरपेक्षो लभ्यते परमगइ केवलज्ञानादिपरमगुणयोगात् परमगतिर्मोक्षगतिः कैः णिच्चिंतिं ठियएहिं ख्यातिपूजा
लाभप्रभृतिसमस्तचिंताजालरहितैः स्वरूपे चिंतारहितस्वशुद्धात्मस्वरूपस्थितैः स्थितैरित्यभिप्रायः ॥ ३०० ॥ जोइय मिल्लहि चिंत ज
इ तो तुट्टइ संसारु । चिंतासत्तउ जिणवरु वि लहइ ण हंसाचारु ॥ जोइय इत्यादि ॥ जोइय हे योगिन् मिल्लहि मुंचसि कां चिंत चिंतारहिताद्विज्ञा
नदर्शनस्वभावात्परमात्मपदार्थाद्विलक्षणां चिंतां जइ यदि चेत् तो ततश्चिंतात्यागात् किं भवति तुट्टइ नश्यति सकः संसारु निःसंसा
रात् शुद्धात्मनः विलक्षणो द्रव्यक्षेत्रादिभेदभिन्नः पंचप्रकारसंसारः यतः कारणात् चिंतासत्तउ जिणवरु वि छद्मस्थाव

DR BHAU DAJI

स्थायी शुद्धात्मा चिंतासक्तो जिनवरो भिन्नः स्वात्मन्येतेन कं हंसाचार्यसंशयविभ्रमविमोहरहितामनंतज्ञानादिनिर्मलगुणयो
गो न हंसः स्वहंसः परमात्मा तस्याचारं रागादिरहितं शुद्धात्मपरिणाममिति आद्वेदं व्याख्यानं ज्ञात्वा दृष्टश्रुतानुभूतभोगाकां
क्षारूपनिदानबंधादिसमस्तविभावजालं त्यक्त्वा चिंतारहिते शुद्धात्मतत्वे सर्वतात्पर्येण भावना कर्तव्येति तात्पर्यं ॥ २०१ ॥ अथ ॥ जोइ
य दुम्मइं कवणु तुह भवकारणि ववहारि बंभु पवंचहि जो रहिउ सो जाणिवि मणु मारि ॥ जोइय इत्यादि ॥ जोइय हे योगिन्
दुम्मइं कवण तुह दुर्मतिः कातवेयं भवकारणि ववहारि निश्चयरहिता शुद्धाशुद्धमनोवचनकायव्यापाररूपव्यवहारवि
लक्षणे स्वशुद्धात्मद्रव्यात्प्रतिपक्षभूते पंचप्रकारसंसारकारणे व्यवहारे तर्हि किं करोमीति चेत् बंभु ब्रह्मशब्दवाच्यं
शुद्धात्मानं किंविशिष्टं पवंचहि जो रहिउ प्रपंचमायापाखंडेभ्यो रहितः तं ज्ञात्वा पश्चात् किं कुरु सो जाणिवि तं निजशु
द्धात्मानं वीतरागस्वसंवेदनज्ञानेन ज्ञात्वा पश्चात् किं कुरु मणु मारि अनेकमानसविकल्पजालरहिते परमात्मनि स्थित्वा शु

द्धात्मा शुद्धनिर्विकल्पजालरूपं मनो मारय विनाशयेति तात्पर्यं ॥ २०२ ॥ अथ ॥ सव्वहिं रायहिं छहरसहिं पंचहिं रूवहिं जंतु चित्तु णिवारिवि झा
इ तुहुं अप्पा देउ अणंतु ॥ सव्व इत्यादि ॥ ध्याय चिंतय त्वं हे प्रभाकरभट्ट कं आत्मानं स्वशुद्धात्मानं कथंभूतं देवं वी
तरागपरमानंदसुखेन दीव्यति क्रीडतीति देवस्तं देवं पुनरपि कथंभूतं अणंतु केवलज्ञानाद्यनंतगुणाधारत्वादनंतसुखास्वा
दत्वादविनश्वरत्वाच्चानंतस्तमनंतं किं कृत्वा पूर्वं चित्तु णिवारिवि चित्तं निवार्य व्याघुट्य किं कुर्वन् सन् जंतु गच्छंतं परिणममानं
सत् कैः करणभूतैः सव्वहिं रायहिं वीतरागात् शुद्धात्मद्रव्याद्विलक्षणैः सर्वैः शुभाशुभरागैः न केवलं रागैः छहरसहिं रसरहि
ताद्वीतरागसदानंदैकरसपरिणतात्मनो विपरीतैः गुडखंडदधिदुग्धतैलघृतषट्रसैः पुनरपि कैः पंचहिं रूवहिं अ
रूपात् शुद्धात्मनस्तत्वात्प्रतिपक्षभूतैः कृष्णनीलरक्तश्वेतपीतपंचरूपैरिति तात्पर्यं ॥ २०३ ॥ अथ येन स्वरूपेण चिंत्यते
परमात्मा तेनैव परमात्मा तेनैव परिणमतीति निश्चिनोति ॥ जेण सरूविं झाइयइ अप्पा एहु अणंतु तेण सरूविं परि

परमातम:
३४२

एव इत्थि म फलिहउ मणि मंउ ॥ तेण सरूविं इत्यादि ॥ तेण सरूविं परिणवइ तेन स्वरूपेण परिणमति कोसौ कर्त्ता अप्पा आत्मा
का एउ एषः प्रत्यक्षीभूतः पुनरपि किंविशिष्टः अणंतु वीतरागनाकुलत्वलक्षणानां सुखाद्यनंतशक्तिपरिणतत्वादनंतः
तेन केन जेण सरूवें झाइयइ येन स्वरूपेण शुभाशुभशुद्धोपयोगरूपेण ध्यायते चिंत्यते ॥ दृष्टांतमाह ॥ जह फलिहउ मणि मंतु
यथा स्फटिकमणिः जपापुष्पाद्युपाधिपरिणतः गारुडादिमंत्रेवेति ॥ अत्र विशेषव्याख्यानं तु ॥ येन येन स्वरूपेण युज्य
ते यंत्रवाहकः तन्मतन्मयतां याति विश्वरूपो मणिर्यथा ॥ इति श्लोकार्थकथितदृष्टांतेन ध्यानव्याख्या ॥ इदमेव तात्पर्यं
अयमात्मा येन येन स्वरूपेण चिंत्यते तेन तेन परिणमतीति ज्ञात्वा शुद्धात्मपदप्राप्त्यर्थिना समस्तरागादिविकल्पसमूहं
त्यक्त्वा शुद्धरूपेणैव ध्यातव्य इति १७४ अथ चतुष्पदादिकं कथयति ॥ एहु जु अप्पा सो परमप्पा कम्मविसेसें जाय १४२
उ जप्पा जामइ जाणइ अप्पे अप्पा तामइ सो जि देउ परमप्पा ॥ छ ॥ एहु जो अयं प्रत्यक्षीभूतो अप्पा स्वसंवेदनप्रत

क्ष आत्मा स कथंभूतः सो परमप्पा शुद्धनिश्चयेनानंतचतुष्टयस्वरूपः क्षुधाद्यष्टादशदोषरहितः सन् निर्दोषिपरमात्मा कम्मविसे
सें जायउ जप्पा व्यवहारनयेनानादिकर्मबंधविशेषेण स्वकीयबुद्धिदोषेण जातस्तन्नः कथंभूतो जातो जप्पा पराधीनः जाव
इ जाणइ इत्यदा यावत्कालं जानाति केन कं अप्पें अप्पा वीतरागनिर्विकल्पस्वसंवेदनज्ञानपरिणतेनात्मना निजशुद्धात्मानं ताव
इ तस्मिन् स्वशुद्धात्मानुभूतिकाले सो सो जि स एवात्मा देउ निजशुद्धात्मभावनोत्थवीतरागसुखामृतरसेन दीव्यतीति क्रीडती
ति देवः परमाराध्यः किंविशिष्टो देवः परमप्पा शुद्धनिश्चयेन मुक्तिगतपरमात्मसमानः ॥ अथ मतमताचार्याः ॥ यदेवं
तः परमात्मा शक्तिरूपेण देहमध्ये तिष्ठति तर्हि केवलज्ञानोत्पत्तिकाले कथं बहिर्व्याप्नोतीति ॥ १७५ ॥ अत एवमेवाशंक्य
निराकरोति ॥ जो परमप्पा णाणमउ सो हउं देउ अणंतु जो हउं सो परमप्पु पर एहउ भावि णिभंतु ॥ जो परमप्पा इत्यादि ॥ प
दखंडनारूपेण व्याख्यानं क्रियते जो परमप्पा यः कश्चित् प्रसिद्धपरमात्मा सर्वोत्कृष्टानंतज्ञानादिरूपानालक्ष्मीर्यस्य स जव

परमात्म
१४२ तिपरब्रह्मसंज्ञः स चात्मा च परमात्मा। एणमन्तज्ञानेन निर्वृतो ज्ञानमयः। सोऽहं तं यद्यपि व्यवहारेण कर्मकृतस्तिष्ठामि तथापि निश्चयेन ४
स एवाहं पूर्वोक्तः परमात्मा कथंभूतः देवः परमाराध्यः पुनरपि कथंभूतः अनंतानंतसुखादिगुणास्पदत्वादनंतः सोऽहं
सो परमप्रभुर्योऽहं स्वदेहे सोऽपि निश्चयेन परमात्मा स एव तत्त्वं द्रव्य मुक्तिगत परमात्मा कथंभूतः परः परमगुणयोगात्परः उत्कृष्टः
एवं भेदविरहितं परमात्मानं भावय हे प्रभाकरभट्ट कथंभूतः सन् एनं तं ... निरहितः सन् इति भेदं स्वदेहे पि स्थिता
त्मास्तीति निश्चयरूपत्वा मिथ्यात्वादिरूपसमस्तविकल्पजालकेवलज्ञानाद्युत्पत्तिबीजभूतं कारणं समयसाररूपमागमभाषया
वीतरागसम्यक्त्वादिरूपं शुद्धोपयोगरूपं ... सर्वतात्पर्येण भावना कर्तव्येति भावार्थः॥ अथ शुद्धनिश्चयेन तदा
र्शनाज्ञानसमर्थयति॥ णिम्मलफलिहहं जेम जिय भिण्णउं परकियभाउ अप्पसहावहं तेम मुणि सयलु विकप्पसहाउ १४२
॥णिम्मलु इत्यादि॥ निर्मलं भिन्नो भवति जिय हे जीव जेम यथा कोसौ कर्ता परकितभाउ जपापुष्पाद्युपाधिरूपः परकृतभावः

कस्मात्सकाशात् णिम्मलफलिहहं निर्मलस्फटिकात् तेम तथा भिण्णउं भिन्नं मुणि मन्यस्व जानीहि कं सयलु वि कप्पसहाउ स
मस्तमपि भावकर्मद्रव्यकर्मनोकर्मस्वभावं कस्मात् सकाशात् अप्पसहावहं अनंतज्ञानादिगुणस्वभावात्परमा
त्मन इति भावार्थः॥ ॥२०७॥ अथ तमेवार्थं दृष्टान्तेन दृढयति॥ जेम सहावि णिम्मलउ फलिहउ तेम
सहाउ भंतिए मइलु म मण्णि जिय मइलउ देक्खि विकाउ॥ जेम इत्यादि॥ जेम सहावि णिम्मलउ यथा स्वभावेन निर्मलो भवति
कोसौ फलिहउ स्फटिकमणिः तेम तथा निर्मलो भवति कोसौ कर्ता सहाउ विशुद्धज्ञानरूपस्य परमात्मनः स्वभावः भं
तिए मइलु म मण्णि पूर्वोक्तमात्मस्वभावं कर्मोपाधिभ्रान्त्या मलिनं मा मन्यस्व जिय हे जीव किं कृत्वा मइलउ देक्खि विमलितं
दृष्ट्वा कं कान्तं निर्मलशुद्धबुद्धैकस्वभावपरमात्मपदार्थाद्विलक्षणं कायमिति भावः॥ ॥२०८॥ अथ दृष्टान्तेन भेद
भावनां दृढयति ... ॥ रत्तें वत्थें जेम बुहु देहु ण मण्णइ रत्तु देहिं रत्तिं णाणि तह अप्पु
ण मण्णइ रत्तु ॥२०९॥ जिण्णिं वत्थिं जेम बुहु देहु ण मण्णइ जिण्णु देहिं जिण्णि णाणि तह अप्पु ण मण्णइ जिण्णु ॥२१०॥ वत्थुपणु

परमात्म:
१४४

इ जेम बुहु देहु ण मण्णइ जिण्णु । एउं देहिं जिण्णि णाणि तहँ अप्पु ण मण्णइ जिण्णु ॥ ॥ यथा कोपि व्यवहारज्ञानी रक्ते वस्त्रे जीर्णे वस्त्रे
नष्टेपि स्वकीयवस्त्रस्य कायं देहं रक्तं जीर्णं नष्टं न मन्यते तथा वीतरागनिर्विकल्पस्वसंवेदनज्ञानी देहे रक्ते जीर्णे नष्टेपि
सति व्यवहारेण देहस्थमपि वीतरागचिदानंदैकपरमात्मानं शुद्धनिश्चयनयेनादेहं भिन्नं रक्तं जीर्णं नष्टं न मन्य
ते इति भावार्थः ॥ १७९ ॥ अथ ॥ भिण्णउ वत्थु जि जेम जिय देहहँ मण्णइ णाणि । देहु वि भिण्णउ णाणि तहँ अप्पहँ मण्णइ
जाणि ॥ भिण्णउ इत्यादि ॥ मन्यते कोसौ णाणि देहवस्त्रविषये भेदज्ञानी किं मन्यते भिन्नं किं वस्तु जि वस्त्र
मेव येन यथा जिय हे जीव कस्मात् भिन्नं मन्यते देहहं स्वकीयदेहात् ॥ देहु वि भिण्णउ ॥ मन्यते कोसौ णाणि देहा
त्मनोर्भेदज्ञानी तहँ तथा भिन्नं मन्यते कमपि देहु वि देहमपि कस्मात् अप्पहँ निश्चयेन देहविलक्षणात् व्यवहारेण १४५
देहस्थात् शुद्धबुद्धपरमानंदैकस्वभावान्निजपरमात्मनः जाणि ज्ञानी भवतीति भावार्थः ॥ अथ इह तणु जन

कदेहघातकं शत्रुमपि मित्रं जानीहीति दर्शयति ॥ इहु तणु जीवडउ तुहु रिउ उप्पज्जइ जेण ज णेइ सो पर जाणहि
मित्तु जु तउ जो तणु णाहु हणेइ ॥ रिउ इत्यादि ॥ रिउ रिपुर्भवति कः इहु तणु इयं तनुः कर्तृ जीवडहे जीव वत्स तव कस्मा
त् उप्पज्जइ जेण ज णेइ येन कारणेन दुःखानि जनयति सोपि तत्तं परं जाणहि जानीहि किं मित्तु परममित्रं जं तणु त्वं क
र्तयः परः किं करोति जो तणु एहु हणेइ यः कर्ता तनुमिमां घातयति नीत्तत्तां हंतीति अत्र यदा वैरी देहविनाशं करोति
ति तदा वीतरागचिदानंदैकस्वभावपरमात्मतत्त्वभावनोत्पन्नसुखामृतसमरसीभावे स्थित्वा शरीरघाते
कस्योपरि यथा पांडवैः कौरवकुमारस्योपरि द्वेषो न कृतस्तथान्यतपोधनैरपि न कर्तव्य इत्यभिप्रायः ॥ २१२ ॥ अथ उदयागत
तेपापकर्मणि स्वस्थभावेन स्थातव्यमिति मनसि संप्रधार्य सूत्रमिदं कथयति ॥ उदयहं आणिवि कम्मु मइं जं भुंजेवउ हो
इ तं सइं आविउ खविउ मइं सो पर लाहु जि कोइ ॥ जं इत्यादि ॥ जं यत् भुंजेवउ होइ भोक्तव्यं भवति किं कृत्वा उदयहं आणि

परमात्म:
१४९

विविक्तिश्च छात्रानावनाबलेनोदयमानीय किं कम्मु चिरसंचितं कर्म्म केनमइं मयानंतत् पूर्वोक्तं कर्म्म सइं आविउ उदइ स्वयमेवाहोप
सर्गवशेन स्वयमुदयागतं सत् खविउ मइं निजपरमात्मतत्त्वनावनोत्पन्नवीतरागसहजानंदैकसुखरसास्वादद्रवीनूतेन परि
णतेन मनसा क्षपितं मया सो सपरपरं नियमेन लोउ जिला नएव कोइ कस्मिंदपूर्वइति अत्र केचन महापुरुषाः दुर्द्धरानुष्ठानं
कृत्वा वीतरागनिर्विकल्पसमाधौ स्थित्वा च कर्मोदयमानीय तत् भुंजन्ति अस्माकं पुनः स्वयमेवोदयागत मिति मत्वा संतो
षः कर्त्तव्य इति नावार्थः ॥२१७॥ अथ इदानीं दुर्वचनं सोढुं न याति तदा निर्विकल्पात्मतत्त्वनावनाक्ष
यं करोति इति निरूपयति ॥ णिठुरवयणु सुणेवि जिय जइ मणि सहण ण जाइ तो लहु नावहि बंनु परु जिं मणु झत्ति विलाइ जइ
यदि चेत् सहण ण जाइ सोढुं न याति । कस्मिन् मनसि जिय हे मूढ जीव किं कृत्वा सुणेवि श्रुत्वा । किं णिठुरवयणु निष्ठुरं हृदयकर्णशूल १४९
वचनं तो तदा वचनश्रवणानंतरं लहु शीघ्रं नावहि नावय वीतरागपरमानंदैकलक्षणनिर्विकल्पसमाधौ स्थित्वा नावय कं बंनु ब्रह्मशब्दा

वाच्यनिजदेहस्थपरमात्मानं कथंनूतं परमात्मज्ञानादिगुणाधारत्वात्परमुत्कृष्टं जेंयेन परमात्मध्यानेन किं नवति मणु झत्ति विलाइ वीतरा
गनिर्विकल्पसमाधिसमुत्पन्नपरमानंदैकरूपसुखामृतरसास्वादेन मनो झटिति शीघ्रं विलयं याति द्रवीनूतं नवतीति नावार्थः ॥
२१५॥ अथ जीवः कर्म्मवशेन जाति नेदनिन्नो नवतीति निश्चिनोति ॥ लोउ विलक्खण कम्मवसु इत्थु नवंतरि एइ चुज्जु किउ जइ इउ
अप्पि ठिउ इत्थु जि विलय पडेइ ॥ लोउ विलक्खण इत्यादि ॥ विलक्खण षोडशवर्णिका सुवर्णवत्केवलज्ञानादिगुणसदृशेन सर्व
जीवराशिसदृशात्परमात्मतत्त्वाद्विलक्षणो विसदृशो नवति केन ब्राह्मणक्षत्रियवैश्यशूद्रादिजातिनेदेन को सौ लोउ लोको जनः कथं
नूतः सन् कम्मवसु कर्म्मरहितशुद्धात्मानुनूतिनावनारहितेनयउपार्जितं कर्म्म तस्य कर्म्मणः आधीनः कर्म्मवश इत्थं नूतः स
न् किं करोति इत्थु नवंतरि एइ पंचप्रकारनवरहिताद्वीतरागपरमानंदैकस्वनावात् शुद्धात्मद्रव्याद्विसदृशे अस्मिन् नवांतरे संसारे
समायाति चोज्जु किउ इदं किमाश्चर्यं किं तु नैव जइ इउ अप्पि ठिउ यदि चेदयं जीवः स्वशुद्धात्मनि स्थितो नवति तर्हि इत्थु जि नविन

परमात्म०

पडेइ अत्रैव भवेन पततीति इदमत्र भावार्थं भवति अनेनेदं व्याख्यानं ज्ञात्वा संसारभयभीतेन भव्येन तत्कारणमिथ्यात्वादिपंचास्रवा-
१४६ न् मुक्त्वा इजन्ताया आस्रवरहिते परमात्मतत्त्वे स्थित्वा च निरंतरं भावकर्त्तव्यमिति तात्पर्यं ॥२५६॥ अथ परेण दोषग्रहणे गुणहानि
करोति न कर्तव्यं इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति ॥ अवगुणगहणइं महुतणइं जइ जीवहं संतोसु तो तहं सुक्खहं हे
उहउं इउ मण्णिवि चइ रोसु ॥ अवगुण इत्यादि ॥ जइ जीवहं संतोसु यदि चेद् ज्ञानीजीवानां संतोषो भवति केन अवगुणगहणइं निर्दोषिपरमात्म
नो विलक्षणा ये दोषा अवगुणास्तेषां ग्रहणेन कथंभूतेन महुतणइं मदीयेन तो तहं सोक्खहं हेउहउं यतः कारणात् मदीयदोषग्रहणेन तेषां
सुखं जातं ततस्तेषां महं सुखस्य हेतुर्जातः इउ मण्णिवि चइ रोसु केचन परोपकारनिरताः परेषां द्रव्यादिकं दत्वा सुखं कुर्वंतिम
या पुनर्द्रव्यादिकं मुक्त्वापि तेषां सुखं कृतमिति मत्वा रोषं त्यजेति अथवा मदीया अनंतज्ञानादिगुणा न गृहीतास्तैः किं दोषा एव गृहीता इति म १४६
त्वा चो कोपं त्यज अथवा मम ते दोषाः संति सत्यमिदं मम वचनं तथापि रोषं त्यज अथवा मम ते दोषा न संति तत्तस्य वचनेन किं मम दोषीजा

तस्तथापि क्षमितव्यं अथवा परोक्षे दोषग्रहणं करोति न च प्रत्यक्षे समीचीनो सौ तथापि क्षमितव्यं अथवा च न मान्नेरोव दोषग्रहणं करो
ति न च शरीरबाधां करोति तथापि क्षमितव्यं अथवा शरीरबाधामेव करोति न च प्राणविनाशं तथापि क्षमितव्यं अथवा प्राणविना
शमेव करोति न च तद्विनाशनादरूपं रत्नत्रयभावनाविनाशं चेति सर्वतात्पर्येण क्षमा कर्तव्येत्यभिप्रायः ॥२५७॥ अथ सर्वचिंतानि
षेधयति ॥ जोइय चिंति म किं पि तुहुं जइ बीहउ दुक्खस्स तिलतुसमित्तु वि सल्लडा वेयण करइ अवस्स ॥ चिंति म इत्यादि ॥ चिं
ति म चिंतां मा कार्षीः किंपि तुहुं कामपि त्वं जोइय हे योगिन् यदि किं जइ बीहउ यदि बिभेषि कस्य दुक्खस्स वीतरागतात्त्विकानंदैकरूपा
त्परमार्थिकसुखात्प्रतिपक्षभूतस्य नारकादिदुःखस्य यतः कारणात् तिलतुसमित्तु वि सल्लडा तिलतुषमात्रमपि शल्यं वेयण
करइ अवस्स वेदनां बाधां करोत्यवश्यं नियमेन अत्र चिंतारहितात्परमात्मनः सकाशाद्विलक्षणा या विषयकषायादिचिंता सा
न कर्तव्या कांडादिशल्यमिव दुःखकारणत्वादिति भावार्थः ॥२५८॥ क्षेपकं ॥ मोक्खु म चिंतहि जोइया मोक्खु ण चिंतिउ होइ जेण णिबद्ध

परमात्म०
३४७

जीवडाउ मोक्खु करेसइ सोइ ॥ मुक्खइत्यादि ॥ मोक्खु म चिंतहि मोक्षमपि चिंतां मा कार्षीः त्वं जोइय हे योगिन् यतः कारणात् मोक्खु ण चिं
तिउ होइ रागादिचिंताजालरहितः केवलज्ञानाद्यनंतगुणव्यक्तिसहितो मोक्षः चिंतितो न भवति तर्हि कथं भवति जेण णिबद्धउ जी
वडउ येन निबद्धो मिथ्यात्वरागादिचिंताजालोपार्जितेन कर्मणा बद्धो जीवः सो इतद न कर्मो शुभाशुभविकल्पसमूहरहिते शुद्धात्मतत्त्व
स्वरूपे स्थितानां परमयोगिनां मोक्खु करेसइ अनंतज्ञानादिगुणोपलंभरूपं मोक्षं करिष्यतीति अत्र यद्यपि सविकल्पावस्था
यां विषयकषायाद्यपध्यानवंचनार्थं च मोक्षमार्गे भावनादृढीकरणार्थं च दुक्खक्खउ कम्मक्खउ बोहिलाहो सुगइगमणं च समा
हिमरणं जिणगुणसंपत्ति होउ मज्झं ॥ इत्यादि भावना कर्तव्या ॥ तथापि वीतरागनिर्विकल्पपरमसमाधिकाले न कर्तव्येति
भावार्थः ॥ २१७ ॥ अथ च ऊर्ध्वं [illegible] परमसमाधि[illegible]व्याख्यानमुख्यत्वेन सूत्र[illegible]
कथ्यते ॥ तद्यथा ॥ परमसमाहिमहासरहिं जे बुड्डहिं पइसेवि ॥ अप्पा थक्कइ विमलु तहं ॥ भवमलु जंति वहेवि ॥ जेइत्यादि ॥

जे बुड्डहिं ये केचन पुरुषा मग्ना भवंति क्व परमसमाहिमहासरहिं परमसमाधिमहासरोवरे किं कृत्वा मग्ना भवंति पइसेवि प्रविश्य सर्वात्मप्रदे
शैरवगाह्य अप्पा थक्कइ चिदानंदैकस्वभावः परमात्मा तिष्ठति कथंभूतः विमलु द्रव्यकर्मनोकर्ममतिज्ञानादिविभावगुणनरना
रकादिविभावपर्यायमलरहितः तहं तेषां परमसमाधिरतपुरुषाणां भवमलु जंति भवरहितान् शुद्धात्मद्रव्यादिलक्षणानि
यानि कर्माणि भवमलकारणभूतानि गच्छंति किं कृत्वा वहेवि विशुद्धपरिणामनीरप्रवाहेन प्रवाहितत्वेनेति भावार्थः ॥ २२० ॥ अथ ॥ सय
लवियप्पहं जो विलउ परमसमाहि भणंति तेण सुहासुह भावडा मुणि सयल वि मिल्लंति ॥ सयलेत्यादि ॥ भणंति कथयंति के
ते वीतरागसर्वज्ञाः कं भणंति परमसमाहि वीतरागपरमसामायिकरूपं परमसमाधिकं जो विलउ यं विलयं विनाशं केषां सयलवि
यप्पहं निर्विकल्पात् परमात्मस्वरूपात् प्रतिकूलानां समस्तविकल्पानां तेण तेन कारणेन मिल्लंति त्यजंति के कर्तारः मुणि परम
समाधिध्यानरताः तपोधनाः कान् सुहासुह भावडा शुभाशुभमनोवचनकायव्यापाररहितान् शुद्धात्मद्रव्याद्विपरीतान् शुभा

DR. BHAU DAJI MEMORIAL
३४७

परमात्म शुभाशुभान् परिणामान् कतिसंख्योपेतान् सयलवि समस्तानपि ॥ अत्र यं भावार्थः ॥ समस्तपरद्रव्येच्छारहितात् स्वशुद्धा
१४८ त्मस्वभावाद्विपरीतायाः सामीहलोकपरिणीकारणायावत्ति इति मन्तसिता यत् दुःखी जीव इति ज्ञात्वा सर्वपरद्रव्येच्छारहितशुद्धा
त्मद्रव्यभावना कर्तव्येति ॥ तथा चोक्तं ॥ आसापिसायगहिकउ जो वोपावे दारूणं दुक्खं आसा जाहं णियत्तता हं णियत्ताइं
सयलदुक्खाइं ॥ ३२१ आर्ष ॥ घोरू करंडवि तवचरणु सयलवि सच्छ मुणंतु परमसमाहिविवज्जियउ ण वि देक्खइ सिउ संतु ॥ कर
न्नित्यादि ॥ करंतु विकुर्वाणोपि किं तवचरणु समस्तपरद्रव्येच्छावर्जितं शुद्धात्मानुभूतिरहितं तपश्चरणं कथंभूतं घोरू घोरं दु
र्धरं द्रव्यलिंगातापनादिरूपं न केवलं तपश्चरणं कुर्वन् सयलवि सच्छ मुणंतु शास्त्रजनितविकल्पमात्रस्वरूपरहितान् परमात्मस्वरू
पात् प्रतिपक्षभूतानि सर्वशास्त्राण्यपि जानन् इत्थंभूतोपि सन् परमसमाहिविवज्जियउ रागादिविकल्परत परम १४८
समाधिविवर्जितो भवति तर्हि न वि देक्खइ सिउ संतु न पश्यति किं शिवशब्दवाच्यं विशुद्धज्ञानदर्शनस्वभावं स्वदेहस्थमपि च

परमात्मानं कथंभूतं संतु रागद्वेषमोहरहितत्वेन शांतं परमोपशमरूपमिति ॥ इदमत्र तात्पर्यं ॥ यदि निजशुद्धात्मैवोपादेय इति मत्वा त
त्साधकत्वेन तदनुकूलं तपश्चरणं करोति तत्परिज्ञानसाधकं शास्त्रं पठति तदा परंपरया मोक्षसाधकं भवति नो चेत् पुण्यबंधका
रणं तमेवेति ॥ तथा चोक्तं ॥ निर्विकल्पसमाधिस्थिताः संतः आत्मस्वरूपं न पश्यंति ॥ आनंदं ब्रह्मणो रूपं निजदेहे व्यवस्थितं ध्यानहीना
न पश्यंति जात्यंधा इव भास्करं ॥ ३२२ आर्ष ॥ विसयकसायविणिद्दलिवि जे ण समाहि करंति ते परमप्पह जोइया णवि आराहय होंति ॥
जे इत्यादि ॥ जे ये केचन न करंति न कुर्वंति कं समाहि त्रिगुप्तिगुप्तपरमसमाधिं किं कृत्वा पूर्वं णिद्दलिवि निर्मूल्य कान् पि विसयक
साय विनिर्दिष्टाया कषायात् शुद्धात्मतत्त्वात् प्रतिपक्षभूतान् विषयकषायान् पि ते ण वि आराहय हुंति ते नैवाराधका भवंति जोइय हे योगि
न् कस्याराधका न भवंति परमप्पह निर्दोषपरमात्मन इति ॥ तथाहि ॥ विषयकषायनिवृत्तिरूपं शुद्धात्मानुभूतिस्वभावं वैराग्यं शुद्धा
त्मोपलब्धिरूपं तत्त्वविज्ञानं बाह्याभ्यंतरपरिग्रहपरित्यागरूपं नैर्ग्रंथ्यं निश्चिंतात्मानुभूतिरूपा वसचित्तता वीतरागनिर्विकल्पसमा

परमात्म धिबहिरंगसहकारिकारणं जितपरीषहत्वं चेति पंचैतान् ध्यानहेतून् ज्ञात्वा भावयित्वा च ध्यानं कर्त्तव्यमिति भावार्थः ॥ तथा चोक्तं ॥ वैराग्यं तत्त्वविज्ञा
१४९ नं नैर्ग्रंथ्यं वशचित्तता जितपरीषहत्वं च पंचैते ध्यानहेतवः ॥ ३२३ ॥ अथ ॥ परमसमाहिधरेवि मुणि जे परबंभुण जंति ते भवदुक्खइं बहुविहइं का
लु अणंतु सहंति ॥ जे इत्यादि ॥ जे ये केचन मुनयः तपोधनाः न यांति न गच्छंति किं कर्मतापन्नं परबंभु परमब्रह्म परमब्रह्मशब्दवाच्यं नि
जदेहस्थं केवलज्ञानाद्यनंतगुणस्वभावं परमात्मस्वरूपं किं कृत्वा पूर्वं परमसमाहिधरेवि वीतरागनिर्विकल्पनिजानंदैका
नुभूतिरूपं परमसमाधिं धृत्वा ते पूर्वोक्तशुद्धात्मभावनारहिताः पुरुषाः सहंति सहंते कानि कर्मतापन्नानि भवदुक्ख
इं वीतरागपरमाह्लादरूपात् पारमार्थिकसुखात् प्रतिपक्षभूतानि नरनारकादिभवदुःखानि कति संख्योपेतानि बहुविह
इं शारीरमानसादिभेदेन बहुविधानि कियंतं कालं कालु अणंतु अनंतकालपर्यंतमिति अत्रेदं व्याख्यानं ज्ञात्वा निजशु १४९
द्धात्मनि स्थित्वा रागद्वेषादिसमस्तविभावत्यागेन भावना कर्त्तव्येति तात्पर्यं ॥ ३२४ ॥ अथ ॥ जाम सुहासुहभावडा ॥

विसल्ल वि णुटंति परमसमाहिण ताम मणि केवलि एहु मुणंति ॥ जाम इत्यादि ॥ जाम यावत्कालं न विनुटंति नैव नश्यं
ति के कर्त्तारः सुहासुहभावडा शुभाशुभविकल्पजालरहितात् परमात्मद्रव्याद्विपरीताः शुभाशुभभावाः परिणामाः क
ति संख्योपेताः अपि समस्ताः अपि ताम तावत्कालं न कोऽपि परमसमाहि शुद्धात्मसम्यक्श्रद्धानज्ञाना
नुचरणरूपः शुद्धोपयोगलक्षणः परमसमाधिः क्व मणि रागादिविकल्परहितत्वेन शुद्धचेतसि केवलि एहु मुणंति के
वलिनो वीतरागसर्वज्ञा एवं कथयंतीति भावार्थः ॥ ३२५ ॥ इति चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमस
माधिप्रतिपादकसूत्रषट्केन अष्टमांतरस्थलं गतं ॥ तदनंतरं अर्हत्पदमिति भावमोक्षः इति जीवन्मोक्षः इति केव
लज्ञानोत्पत्तिरिति कोऽर्थः तस्य चतुर्विधनामान्विधेयस्यार्हत्पदस्य प्रतिपादनमुख्यत्वेन सूत्रत्रयपर्यंतं व्या
ख्यानं करोति ॥ तद्यथा ॥ सयलवियप्पहं जो विलउ परमसमाहि भणंति तेण सुहासुहभावडा मुणि सयलवि मिल्लंति
रहंतु ॥ होइ इत्यादि ॥ होइ भवति कोऽसौ अप्पा आत्मा कथंभूतो भवति अरहंतु अरिमोहनीयं कर्म तस्य हन

परमात्म: नात्र रजसी ज्ञानदृगावरणे तयोरभिहननात् रहस्यशब्देनांतरायस्तस्य हननाच्च देवेंद्रादिनिर्मितां पूजामर्हति
१६० अर्हन् कस्मिन् सति कम्मच तुक्कशंकितकाद् घातिकर्मचतुष्के विलयं गते सति किं कुर्वन् दर्शयन् शिवपथमग्रेवसंतं शिव
शब्दवाच्यं यन्मोक्षपदं तस्य यो सौ सम्यग्दर्शनज्ञानचारित्रत्रितयैकलक्षणो मार्गस्तस्मिन्वसन् सन् केषां सतां स
कलविषयपरिच्छेदकत्वं मस्तविकल्पानां नष्टानां समसरागादिविकल्पविनाशादनंतरं भवतीति भावार्थः ॥ ३२६ गाथा ॥ के
वलणाणिं अणवरउ लोयालोउ मुणंतु णियमें परमाणंदमउ अप्पा हु अरहंतु ॥ केवल इत्यादि ॥ हु भवति कोसौ अप्पा आ
त्मा कथंभूतो भवति अरहंतु सर्वो फललक्षणो अर्हन् किं कुर्वन् लोयालोउ मुणंतु कर्मकरणं अवधानरहितत्वेन कालत्रय
विषयं लोकालोकं वस्तुस्वरूपेण युगपज्जानन् सन् केन केवलणाणिं लोकालोकप्रकाशकस्वरूपं विमलकेवलज्ञाने
न कथं अणवरउ निरंतरं किं विशिष्टो भवति नियमात् परमाणंदमउ वीतरागपरमसमरसीभावलक्षणतात्त्विकपर १६०

मानंदमयः केन नियमें निश्चयेनात्र संदेहो कर्तव्यस्तस्य भावः ॥ ३२७ गाथा ॥ जो जिणु केवलणाणमउ परमाणंदसहाउ
सो परमप्पउ परमपरु सो जिय अप्पसहाउ ॥ जो इत्यादि ॥ जो यः जिणु अनेकभवगहनव्यसनप्रापणहेतून् कर्मारातीन्
न्जयतीति जिनः कथंभूतः केवलणाणमउ केवलज्ञानाविनाभूतानंतगुणमयः पुनरपि कथंभूतः परमाणं
दसहाउ इंद्रियविषयातीतस्वात्मोत्थः रागादिविकल्परहितः परमानंदस्वभावः सो परमप्पउ सर्वो सोऽर्हन्नेव परमात्मा
परमपुरुषपरब्रह्मानंतज्ञानादिगुणरूपा मा लक्ष्मीयस्य स भवति परमसंसारिस्त्वः परउ कृष्णः परइत्सु मते परमभ्रा
सो परस्य परमपरः सोऽस सर्वो सोऽवीतरागः सर्वज्ञः जियहे जीव अप्पसहाउ आत्मस्वभाव इति अन्वयः सो सर्वो भ
णितो भगवान् स एव संसारावस्थायां निश्चयनयेन शक्तिरूपेण जिनइत्सु मते केवलज्ञानावस्थायां व्यक्तिरूपे
ण ॥ तथेवच ॥ परमब्रह्मादिशब्दवाच्यस्स एव तदग्रे स्वयमेव कथयति निश्चयेन सर्वे जीवा जिनस्वरूपाः जिनोपि स

र्वजीवस्वरूप इति भावार्थः ॥ तथा चोक्तं ॥ जीवा जिणवर जो मुणइ जिणवर जीव मुणेइ सो सम भावि परिट्ठियउ लहु णि
व्वाणु लहेइ ॥ ३२८ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये अर्हद्व्याख्यानकथनमुख्यत्वेन सूत्रत्रयेण द्वितीयमंतरस्थ
लं गतं ॥ अथ सकलविकलपरमात्मप्रकाशशब्दस्यार्थकथनमुख्यत्वेन सूत्रत्रयपर्यंतं व्याख्यानं करोति ॥ तद्यथा ॥ सय
लहं कम्महं दोसहं वि जो जिणदेउ विभिण्णु सो परमप्पपयासु तुहुं जोइय णियमें मण्णु ॥ सो इत्यादि ॥ सो तं परमप्पपयासु
परमात्मप्रकाशसंज्ञां तुहुं त्वं कर्त्ता मण्णु मन्यस्व जानीहि जोइय हे योगिन् णियमें निश्चयेन स कः जो जिणदेउ यो जिनदेवः
किंविशिष्टः विभिण्णु विशेषेण भिन्नः केभ्यः सयलहं कम्महं रागादिरहितचिदानंदैकस्वभावपरमात्मनो याभिभिन्नानि स
र्वकर्माणि तेभ्यः न केवलं कर्मभ्यो भिन्नः दोसहवि टंकोत्कीर्णज्ञायकैकस्वभावस्य परमात्मनो येन तद्ज्ञानसुखादि ३५९
गुणास्तत्प्रच्छादका ये दोषास्तेभ्योपि भिन्न इत्यभिप्रायः ॥ ३२९ ॥ अथ ॥ केवलदंसणणाणसुहवीरिउ जो जि अणं

तु सो जिणदेउ वि परममुणि परमपयासु मुणंतु ॥ सो इत्यादि ॥ सो जिणदेउ वि स जिनदेवोपि एकत्वविवक्षितकेवलं जिनदेवो भवति
परमउक्किट्ठो मुनिः प्रत्यक्षज्ञानी किं कुर्वन् सन् मुणंतु मन्यमानो जानन् सन् कं परमपयासु परमउत्कृष्टं लोकप्रकाशकं के
वलज्ञानं यस्य स भवति परमप्रकाशः तं परमप्रकाशं स कः केवलदंसणणाणसुहवीरिउ जो जि केवलज्ञानदर्शन
सुखवीर्यस्वरूपं य एव कथंभूतं तत् केवलज्ञानादिचतुष्टयं अणंतु युगपदनंतद्रव्यक्षेत्रकालभावपरिच्छेदकत्वाद
विनश्वरत्वाच्चानंतमिति भावार्थः ॥ ३३० ॥ अथ ॥ जो परमप्पउ परमपउ हरिहरबंभु वि बुद्धु परमपयासु भणंति सो जिण
देउ विसुद्धु ॥ भणंति इत्यादि ॥ भणंति कथयंति के ते मुणि मुनयः प्रत्यक्षज्ञानिनः कथं भणंति तं भणंति परमपयासु परमप्र
काशः यः कथंभूतः जो परमप्पउ यः परमात्मा कथंभूतः परमपउ परमानंतज्ञानादिगुणाधारत्वेन परमपदस्वभावः पुन
रपि किंविशिष्टः हरिहरसंज्ञः हरू महेश्वर इति अभिधानः बंभु वि परमब्रह्माभिधानो विबुद्धु बुद्धः सुगतसंज्ञः सो जिणदेउ

परमात्म
१६२

सएव पूर्वोक्तः परमात्मा जिनदेवः किंविशिष्टः विशिष्ट समस्तरागादिदोषपरिहारेण विशुद्ध इति अत्र य एव परमात्मप्रका-
शसंज्ञो निर्दोषि परमात्मा व्याख्यातः स एव परमात्मा स एव परमपदं स एव विष्णुसंज्ञः स एव ईश्वराभिधानः स एव
ब्रह्मशब्दवाच्यः स एव सुगतशब्दाभिधेयः स एव जिनेश्वरः स एव विशुद्ध इत्याद्यष्टाधिकसहस्रनामाभिधेयो भव-
ति नानारुचीनां जनानां कस्यापि विवक्षितेन नाम्नाराध्यः स्यादिति भावार्थः ॥ तथा चोक्तं ॥ नामाष्टकसहस्रेण युक्तं
मोक्षपुरेश्वरमित्यादि ॥ २२१ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशशब्दार्थः कथनमुख्यत्वे-
न सूत्रत्रयेण तृतीयमंतरस्थलं गतं ॥ तदनंतरं सिद्धस्वरूपे कथनमुख्यत्वेन सूत्रत्रयपर्यंतं व्याख्यानं करोति ॥ तद्य-
था ॥ झाणिं कम्मक्खउ करिवि मुक्कउ होइ अणंतु जिणवरदेवइं सो जि जिय पभणिउ सिद्धमहंतु ॥ पभणिउ इत्यादि ॥ पभ- १६२
णिउ प्रभणितः कथितः केन कर्तृभूतेन जिणवरदेवेन को सौ भणितः सिद्धु सिद्धः कथंभूतः महंतु महान् महानुरूपाराधित-

त्वात् केवलज्ञानादि महागुणाधारत्वाच्च महान् क एव सो जि स एव स कः यो सौ मुक्कउ होइ ज्ञानावरणादिभिः कर्मभिः मु-
क्तो रहितो भवति सम्यक्त्वाद्यष्टगुणसहितश्च जिय हे जीव कथंभूतः अणंतु न विद्यते तेतो विनाशो यस्य स अनंतश्च स-
न्नेतः किं कृत्वा पूर्वं मुक्तो भवति कम्मक्खउ करिवि विशुद्धज्ञानदर्शनस्वभावादात्मद्रव्याद्विलक्षणं यदार्तरौद्रध्यानद्वयं तेनो-
पार्जितं यत् कर्म तस्य क्षयः कर्मक्षयस्तं कर्मक्षयं कृत्वा केन झाणिं रागादिविकल्परहितस्वसंवेदनज्ञानलक्षणेन ध्यानेनेति
तात्पर्यं ॥ २२२ ॥ अथ ॥ अण्णु वि बंधु वि तिहुयणहं सासयसुक्खसहाउ तित्थु जि सयलु वि कालु जिय णिवसइ लद्धसहाउ ॥ अ-
ण्णु वि इत्यादि ॥ अण्णु वि अन्यदपि पुनरपि स पूर्वोक्तः सिद्धः कथंभूतः बंधु वि बंधुरेव कस्य तिहुयणहं त्रिभुवनस्य भव्यजनस्य
पुनरपि किंविशिष्टः सासयसुक्खसहाउ रागादिरहिताव्याबाधशाश्वतसुखस्वभावः एवंगुणविशिष्टः सन् किं करोतीति सत्त-
गवान्ति त्थु जि तत्रैव मोक्षपदे णिवसइ निवसति कथंभूतः सन् लद्धसहाउ लब्धशुद्धात्मस्वभावः कियंतं कालं निवसति स-

यत्तु विकालु समस्तु अप्पु अनंतानंतकालपर्यंतं जियहु जीवेति अत्रानेन समस्तकाकाल ग्रहणेन किंतु क्षणं भवति ये केचन वदंति मुक्ता
त्मानं पुनरपि संसारे पतनं भवति तन्मतं निरस्तमिति भावार्थः॥ ३३३ अथ॥ जम्मणमरणविवज्जियउ चउगइदुक्खविमुक्कु केवल
दंसणणाणमउ णंदइ तित्थु जि मुक्कु॥ छ॥ पुनरपि कथंभूतः सन् भगवान् जम्मणमरणविवज्जियउ जन्ममरणविवर्जितः पुनरपि किं
विशिष्टः चउगइदुक्खविमुक्कु सहजशुद्धपरमानंदैकस्वभावं यदात्मसुखं तस्माद्विपरीतं यच्चतुर्गतिदुःखं तेन विमुक्तो रहि
तः पुनरपि किं स्वरूपः केवलदंसणणाणमउ क्रमकरणव्यवधानरहितत्वेन जगत्त्रयकालत्रयवर्त्तिपदार्थानां प्रकाशकके
वलदर्शनज्ञानाभ्यां निर्वृत्तः केवलदर्शनज्ञानमयः एवंगुणविशिष्टः सन् किं करोति नंदइ स्वकीयस्वभाविकानंतज्ञानादिगुणैः
सह नंदति वृद्धिं गच्छति क्व तित्थु जि तत्रैव मोक्षपदे नरपि किं विशिष्टः सन् मुक्कु ज्ञानावरणाद्यष्टकर्मनिर्मुक्तो रहितः अव्याबाधा
यनंतगुणैः सहितश्चेति भावार्थः॥ ३३४॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये सिद्धपरमेष्ठिव्याख्यानमुख्यत्वेन सूत्रच

DABHAU DAU

तुष्टयेन चतुर्थमंतरस्थलं गतं॥ अथानंतरं परमात्मप्रकाशभावनारतपुरुषाणां फलं दर्शयन् सूत्रत्रयपर्यंतं व्याख्यानं करोति॥
तथाहि॥ जे परमप्पपयासु मुणि भावि भावहिं सत्थु मोहु जिणेवि णु सयलु जिय ते बुज्झहिं परमत्थु॥ भावहिं इत्यादि॥ भावहिं भावय
ति ध्यायंति के मुणि मुनयः जे ये केचन किं भावयंति सत्थु सारं कथंभूतं शास्त्रं परमप्पपयासु परमात्मा स्वभावप्रकाशकत्वात्पर
मात्मप्रकाशसंज्ञं केन भावयंति भाविं समस्तरागाद्यपध्यानरहितशुद्धभावेन किं कृत्वा पूर्वं जिणेवि णु जित्वा कं मोहु निर्मोहप
रमात्मतत्त्वाद्विलक्षणं मोहं कतिसंख्योपेतं सयलु समस्तं निरवशेषं जियहु जीवेति तेन एवंगुणविशिष्टास्तपोधनाः बुज्झहिं बु
ध्यंति किं परमत्थु परमार्थशब्दवाच्यं चिदानंदैकस्वभावं परमात्मानमिति भावार्थः॥ ३३५ अथ॥ अण्णु जि भत्तिए जे मुणहिं इहु
परमप्पपयासु लोयालोयपयासयरु पावहिं ते वि पयासु॥ अण्णु जि इत्यादि॥ अण्णु जि अन्यदपि विशेषफलं कथ्यते भत्ति
ए जे मुणहिं भक्त्या ये मन्यंते जानंति किं इहु परमप्पपयासु इमं प्रत्यक्षीभूतं परमात्मप्रकाशग्रंथं सु परमात्मप्रकाशशब्दवाच्यं

परमात्मतत्त्वं पावहिं प्राप्नुवंति ते विते पिवं पयासु प्रकाश शब्द वाच्यं केवलज्ञानदाधार परमात्मानं वा कथं भूते परमात्म प्रकाशं
लोकालोक प्रकाशक स्वरूप अनंत गुणपर्याय सहितः त्रिकालविषय लोक प्रकाशकमिति तात्पर्यं ॥ ३३६ ॥ अथ ॥ जे परमप्प
पयासयहं अणुदिणु णाउ लयंति तुट्टइ मोहु तडत्ति तहं तिहुयणणाह हवंति ॥ लयंतित्यादि ॥ लयंति गृहंति जे ये केचन
णाउ नाम कस्य परमप्पयासयहं व्यवहारेण परमात्मप्रकाशाभिधानग्रंथस्य निश्चयेन तु परमात्मप्रकाशशब्दवाच्यस्य केव
लज्ञानाद्यनंतगुणस्वरूपस्य परमात्मपदार्थस्य कथं अणुदिणु अनवरतं तेषां किं फलं भवति तुट्टइ नश्यति कोसौ मोहु नि
र्मोहात्मद्रव्याद्विलक्षणो मोहः तडत्ति झटिति तहं तेषां केवलं मोहो न नश्यति तिहुयणणाह हवंति तेन सर्वोक्तेन निर्मोहशु
द्धात्मतत्त्वभावनाफलेन पूर्वं देवेंद्रचक्रवर्त्यादिविभूतिविशेषं लब्ध्वा पश्चाज्जिनदीक्षां गृहीत्वा च केवलज्ञानमुत्पाद्य त्रि
भुवननाथाः भवंतीति भावार्थः ॥ ३३७ ॥ एवं चतुर्विंशतिसूत्रप्रमितमहास्थलमध्ये परमात्मप्रकाशभावनाफलकथ

नमुख्यत्वेन सूत्रत्रयेण पंचमस्थलं गतं ॥ अथ परमात्मप्रकाशशब्दवाच्यो योसौ परमात्मतदाराधक पुरुषल
क्षणज्ञापनार्थं सूत्रत्रयेण व्याख्यानं करोति ॥ तद्यथा ॥ जे भवदुक्खहं बीहिया पउ इच्छहिं णिव्वाणु इह परमप्पपयास
यहं ते पर जोग्ग वियाणु ॥ ते परइत्यादि ॥ ते पर त एव जोग्ग वियाणु योग्याः भवंतीति विज्ञानीहि कस्य इह परमप्पपयासय
हं व्यवहारेण परमात्मप्रकाशाभिधानग्रंथस्य परमार्थेन तु परमात्मप्रकाशशब्दवाच्यस्यानिर्दोषिपरमात्मनः
ते के जे बीहिया ये भीताः केभ्यः भवदुक्खहं रागादिविकल्परहितपरमाह्लादरूपशुद्धात्मभावनोत्थपारमार्थिकसुखवि
लक्षणानां नारकादिभवदुःखानां पुनरपि किं कुर्वंति जे इच्छहिं ये इच्छंति किं पउ पदं स्थानं कथंभूतं णिव्वाणु निर्वृतिगत पर
मात्माधारभूतं निर्वाणशब्दवाच्यं मुक्तिस्थानमित्यभिप्रायः ॥ ३३८ ॥ अथ ॥ जे परमप्पहं भत्तियर विसयसजे वि रमंति ते पर
मप्पपयासयहं मुणिवर जोग्ग हवंति ॥ हवंतीत्यादि ॥ हवंति भवंति जोग्गा योग्याः के ते मुणिवर मुनिप्रधानाः के ते ते सर्वोक्ताः

परमात्म कस्पयोग्या: तचंत्रिपरमप्पपयाससहं व्यवहारेण परमात्मप्रकाशसंज्ञा ग्रंथस्य परमार्थेन तु परमात्मप्रकाशशब्दवाच्य
१६६ स्य शुद्धात्मस्वभावस्य कथंभूता ये जे परमप्पह भत्तियर ये परमात्मनो भक्ता: पुनरपि कहंभूता विसयण जे विरमंति नि
र्विषय परमात्मतत्वानुभूतिसमुत्पन्नातींद्रियपरमानंदसुखरसास्वादतृप्ता: संत: सुंदरान्मनोहरानपि विषया
नमतीतस्मिन्नितिभाव:॥ तथा॥ णाणवियरवरणुसुहमणु जो उणुएहउ काइ सो परमप्पपयासयहं जो णु भणंति जिणजोइ॥४
॥ भणंतीत्यादि॥ भणंति कथयंति जे जोइये परमयोगिन: कं भणंति जो णु यो ग्रंथ कस्य परमप्पपयासहं व्यवहारनयेन
परमात्मप्रकाशाभिधानशास्त्रस्य निश्चयनयेन तु परमात्मप्रकाशशब्दवाच्यस्य शुद्धात्मस्वरूपस्य कं पुरुषं योगं भ
णंति सो तं तं कं जाउ णएहतु बोह बोजनस्खं भूत: कथंभूत: णाणवियरवरु स्वसंवेदनज्ञानविचक्षण: पुनरपि क १६६
थंभूत: सुहमणु परमात्मानुभूतिविलक्षणरागद्वेषमोहस्वरूपसमस्तविकल्पजालपरिहारेण शुद्धात्मा इसगति धा

य: [illegible] चतुर्विंशतिसहस्रप्रमितमहाशास्त्रानन्त्यो परमात्माराधकपुरुषलक्षणं कथनरूपेण सूत्रत्रयेण वष्टमंतरस्था
लेंगतं॥ अथ [illegible] परिहारेण च सप्तदशपर्यंत आरमां
करोति॥ तद्यथा॥ लक्खणछंदविवज्जियउ यहु परमप्पपयासु कुणइ सुहाविं भावियउ चउगइदुक्खविणासु॥ लक्खणइत्या
दि॥ लक्खणछंदविवज्जियउ लक्षणछंदोविवर्जितो यो अयं क: यहु परमप्पपयासु एष: परमात्मप्रकाश: एवं गुणविशिष्टो यं किं
करोति कुणइ करोति कं चउगइदुक्खविनाशं कथंभूतसन् भावियउ भावित: केन सहाविं शुद्धस्वभावेनेति॥ तथा हि॥ यद्यप्य
यं परमात्मप्रकाशग्रंथ: शास्त्रक्रमव्यवहारेण दोहकछंदसा प्राकृतलक्षणेन युक्त: तथापि निश्चयेन परमात्मप्रकाशशब्दवाच्यं
शुद्धात्मस्वरूपं पद्यापे ह्ययालक्षणछंदोविवर्जित: एवंभूत: सन्नयं किं करोति भद्रनाचनया भावित: सन् शुद्धात्मसंवित्तिसमुत्पन्न
रागादिविकल्परहितपरमानंदैकलक्षणसुखवृप्ति [illegible] तानां चतुर्गतिदु:खानां विनाशं करोतीति भावार्थ:॥ ३३ ॥ [illegible] श्री

इत्थु न लेवउ पंडियहिं गुणदोसु वि पुणरुत्तु भट्टपभायरकारणइं मइं पुणु पुणु वि पउत्तु ॥२११॥
दि॥२२
परमात्म: योगीन्द्रदेवः कृतपरिहारं करोति ॥ इत्थु अत्र ग्रंथे न लेवउ न ग्राह्यः कैः पंडियहिं पंडितैर्विवेकिभिः कोसौ गुणदोसु गुणदोषोपि क
३६६ थंभूतः पुणरुत्तु पुनरुक्तः कस्मान्न ग्राह्यः यतः [illegible] मइं पुणु पुणु वि पउत्तु मया पुनः पुनः प्रोक्तं किं तत् वीतरागपरमात्म
तत्वं किमर्थं भट्टपभाय कारणइं प्रभाकरभट्टनिमित्तेनेति अत्र तावद् ग्रंथे समाधिशतकादिवत् पुनरुक्तदूषणं नास्ति
इति तदपि कस्मादिति चेत् अर्थं पुनः पुनश्चिंतितं स्वलक्षणमिति वचनादिति मत्वा प्रभाकरभट्टव्याजेन समस्तजनानां सुख
बोधार्थं बहिरंतः परमात्मभेदेन त्रिविधात्मतत्वं बहुधा व्याख्यातमिति तात्पर्यार्थः ॥२११॥ जं मइं किं पि विजंपियउ जुत्ताजुत्तु वि इ
त्थु तं वरणाणि खमंतु महु जे बुज्झहिं परमत्थु ॥जं मइं इत्यादि॥ जं मइं किं पि विजंपियउ यन्मया किमपि जल्पितं किं जल्पितं
जुत्ताजुत्तु वि शब्दविषये अर्थविषये वा युक्तायुक्तमपि इत्थु अत्र परमात्मप्रकाशाभिधानग्रंथे खमंतु क्षमां कुर्वं ३६६
तु किं तत् पूर्वोक्तदूषणं के वरणाणि वीतरागनिर्विकल्पस्वसंवेदनज्ञानयुक्ता विशिष्टज्ञानिनः कस्य महु मम योगीन्द्रदे

वाभिधानस्य कथंभूता ये ज्ञानिनः जे बुज्झहिं ये केचन बुध्यंते जानंति किं परमत्थु रागादिदोषरहितमनंतज्ञानदर्शनसुख
वीर्यसहितं च परमार्थशब्दवाच्यं शुद्धात्मानमिति तात्पर्यार्थः ॥२१२॥ इति सूत्रचतुष्टयेन सप्तमस्थलं गतं ॥ एवं सप्त
निरंतर स्थले चतुर्विंशतिसूत्रप्रमितमहास्थलं समाप्तं ॥ ॥अथैकदशेनात्साहनार्थं पुनरपि फलं दर्शयति ॥२१३॥
जं तत्तं णाणरूवं परमसुणिगणा णिच्चु झायंति चित्ते जं तत्तं देहचत्तं णिवसइ भुवणे सव्वदेहीण देहे जं तत्तं दिव्वदेहं तिहुवण
गुरुगं सिज्झए संतजीवे तं तत्तं जस्स सुद्धं फुरइ णियमणे पावए सो हि सिद्धिं ॥पावए इत्यादि॥ पावए सो प्राप्नोति सः स्फु
टं कां सिद्धिं मुक्तिं यस्य किं जस्स णियमणे फुरइ यस्य निजमनसि स्फुरति प्रतिभाति किं कर्तृतापन्नं तं तत्तं तत्तत्वं क
थंभूतं सुद्धं रागादिरहितं पुनरपि कथंभूतं यत् जं तत्तं णाणरूवं यदात्मतत्वं ज्ञानस्वरूपं पुनरपि किंविशिष्टं यत्
णिच्चु झायंति नित्यं ध्यायंति क्व चित्ते मनसि के ध्यायंति परममुनिसमूहाः पुनरपि किंविशिष्टं यत् जं तत्तं देहचत्तं य

परमात्म परमात्मतत्वं देहस्थं कं देहान्भिन्नं पुनः अपि कथंभूतं यत् निवसन्नपि वसति कस्मिन् त्रिभुवने सू च देही त्रिभुवने सर्वे देहिनां संसारिणां
३५७ देहे पुनरपि कीदृशं यत् जेतं नं दिव्वदेहं यत् शुद्धात्मतत्वं दिव्यदेहं दिव्यं केवलज्ञानादि शरीरं शरीरमिति कोर्थः स्वरूपं पुनश्च
कीदृशं यत् तिहुयणगुरूगं अव्याबाधानंतसुखादिगुणेन त्रिभुवनादपि गुरुं प्रज्ञप्तमिति त्रिभुवनगुरुकं पुनरपि किंरू
पं यत् सिझ्झए सिध्यति निष्पत्तिं याति वसंतजीवे अत्रैव वसन् जीवः जालाजादि समस्तमनोरथविकल्पजालरहितत्वेन परमोप
शांतजीवस्वरूपं इत्यभिप्रायः ॥२४४॥ अथ ग्रंथस्यावसाने मंगलार्थमाशीर्वादरूपेण नमस्कारं करोति ॥ ॥ परम
पयगयाणं भासउ दिव्वकाउ मणसि मुणिवराणं मुक्खदो दिव्वजोउ विसयसुह रयाणं ज्जेहो जो ज्ज लोए जयउ सिवसरूवो केवलो
को विवोहो ॥ जयवइत्यादि ॥ जयउ सर्वोत्कर्षेण वृद्धिं गच्छउ को सौ दिव्वकाउ परमौदारिकशरीराभिधानो दिव्यकायस्तदाधारो ३५७
भगवान् कथंभूतः भासउ दिवाकरसहस्रादप्यधिकतेजस्त्वात् भासकः प्रकाशकः केषां कायः परमपयगयाणं परमानंतज्ञाना

दिगुणास्पदं यदर्हत्पदं तत्र गतानां केवलं दिव्वकाउ जयउ दिव्वजोउ दिव्यो शुक्लध्यानाभिधानो वीतरागनिर्विकल्पसमाधिरूपो दि
व्ययोगः कथंभूतः मोक्खदो मोक्षप्रदायकः क्व जयतु मणसि मनसि केषां मुणिवराणं मुनिपुंगवानां न केवलं योगो जयतु केव
लो केवलज्ञानाभिधानः को प्यद्वितीयो बोधः कथंभूतः सिवसरूवो शिवशब्दवाच्यं यदनंतसुखं तत्स्वरूपः पुनरपि कथं
भूतः उज्जोहो जो ज्ज लोए उद्योतकः लोके उत्पाप्यः यः ज्ज स्फुटं क्व लोके केषां ज्जेत्तः विसयसुहरयाणं विषयसुखातीत परमात्मभावनो
त्पन्नपरमानंदैकरूपसुखास्वादरहितत्वेन पंचेंद्रियविषयासक्तानामिति भावार्थः ॥३४४॥ इति परमात्मप्रकाशवृत्तौ मु
मुक्षुपरंपरा सूचयंति ॥ इत्यादिकारांतिसूत्रपर्यंतं समान्यविदभावना ॥१॥ तदनंतरं परमसमाहि सर इत्यादि चतुर्विंश
तिसूत्रपर्यंतं महास्थलं ॥१॥ ॥ तदनंतरं स्थलद्वयं चेति सर्वसमुदायेन सप्ताधिकसूत्रशतेन द्वितीय महाधिकारे चूलिका गतेति ॥
१॥ ॥ एवमत्र परमात्मप्रकाशाभिधानग्रंथे प्रथमतस्तावत् जे जाया झाणग्गियए इत्यादि त्रयोविंशत्यधिकसूत्रशतेन प्रक्षेपक

परमात्म
१५८

त्रयसहितेन प्रथममहाधिकारो गतः ॥ १ ॥ ॥ एवं पंचाधिक चत्वारिंशत सहित शत त्रय प्रमित श्री योगीन्द्रदेव विरचित दोहक
सूत्राणां विवरणं कृता परमात्म प्रकाश वृत्तिः समाप्ता ॥ अथ ग्रंथे प्रचुरेण पदानां संधिर्न कृतः वाक्यानि च भिन्नभिन्नानि कृता
नि सुखबोधार्थं किंच परिभाषा सूत्रे पदयोः संधिर्विवक्षितो न समासं तरंगयोस्तेन कारणेन लिंग वचन क्रिया कारक संधिस
मास विशेष्य विशेषण वाक्य समाप्त्यादिकं दूषणमत्र न ग्राह्यं विद्वद्भिरिति ॥ ॥ इदं परमात्मप्रकाश वृत्तेर्व्याख्यानं ज्ञात्वा किं कर
्तव्यं भव्यजनैः सहज शुद्ध ज्ञानानंदैक स्वभावोऽहं निर्विकल्पोऽहं उदासीनोऽहं निरंजन शुद्धात्म सम्यक् श्रद्धान ज्ञानानुष्ठान रू
प निश्चय रत्नत्रयात्मक निर्विकल्प समाधि संजात वीतराग सहजानंद रूप सुखानुभूति मात्र लक्षणेन स्वसंवेद्यो गम्यः प्राप्यो
भरितावस्थोऽहं राग द्वेष मोह क्रोध मान माया लोभ पंचेंद्रिय विषय व्यापार मनो वचन काय व्यापार द्रव्य कर्म भाव कर्म नोक १५८
र्म ख्याति पूजा लाभ दृष्ट श्रुतानुभूत भोगाकांक्षा रूप निदान माया मिथ्या शल्य त्रयादि विभाव परिणाम रहित शून्योऽहं ॥

जगत्त्रये कालत्रयेपि मनो वचन कायैः कृत कारितानुमतैश्च शुद्ध निश्चयनयेन तथा सर्वेपि जीवा इति निरंतरं भा
वना कर्तव्येति ॥ छ ॥ ॥ पांडव राम हिं णर वरा हिं । बुद्धि ● उत्तनि तंरहि । सिरि सासस्सुद्धि णत्ता । सयनु । णंदउ सु
रकसर्गहिं ॥ इति श्री परमात्मप्रकाश ग्रंथस्य विवरण समाप्त ॥ संवत १८२० वर्षे चैत्रासित पक्षे तिथौ पूरणमायां
शान वारे इदं पुस्तकं संपूर्णं ॥ ॥ श्रीरस्तु ॥ ॥ कल्याणमस्तु ॥ ॥ शुभं भवतु ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री
ग्रंथसंख्या २८०० जा द टर भाउ दाजी येथा मिरं उस्ताकंजे मल मीर राजपान्यांलि पीकृतं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

परमात्म
३६[illegible]

Dr. BHAU DAJ[illegible]
MEMORIAL